Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

130431

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

(त्रैमासिकी)

संस्कृत मञ्जरी

वर्षम् १ अङ्कः २

232
2000
10/4/03

संस्कृत लघुकथा विशेषाङ्कः

दिल्ली संस्कृत अकादमी

(राष्ट्रिय राजधानी क्षेत्र दिल्ली सर्वकारः)

Public Domain. Gurukul K

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करण संख्या/एफ-२ (एस) (३७) प्रेस/९०/२०१७

वर्षं नवमम् (द्वितीयाङ्कः)

संस्कृत-मञ्जरी

(त्रैमासिकी)

संस्कृत-लघुकथा-विशेषाङ्कः

सम्पादकः

श्रीकृष्णसेमवालः

सचिवः

130431

दिल्ली-संस्कृत-अकादमी

(राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-सर्वकारः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशकः—
सचिवः
दिल्ली-संस्कृत-अकादमी
(राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-सर्वकारः)

© **दिल्ली-संस्कृत-अकादमी**

प्राप्तिस्थानम्—
विक्रय-विभागः
दिल्ली-संस्कृत-अकादमी
(राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-सर्वकारः)
पूर्व-भारती-महिला-महाविद्यालयभवनम्
प्लाट सं० ५ झण्डेवालानम् करोलबाग़ोपनगरम्, नव दिल्ली-११०००५
दूरभाषः ३५५५६७६/७५३५५९२

मूल्यम् — ८.०० रूप्यकाणि

मुद्रकः—
अमर-प्रिण्टिङ्ग-प्रेस्स्
विजयनगरम्, दिल्ली-११०००९
दूरभाष : ७२५२३६२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

130431

सम्पादकीयम्

अयि संस्कृत-साहित्य-सेवा-समाराधनतत्परा: विद्वद्वर्या: ! तत्र भवतां भवतीनाञ्च करकमलेषु संस्कृत-मञ्जर्या: नवमवर्षस्य द्वितीयाङ्कं समर्पयन्नतितरां मोदमनुभवामि यदस्या: पत्रिकाया: अष्टमवर्षस्य प्रथमाङ्कत: क्रमेण प्रकाशितानां विज्ञान-शासन-प्रबन्धन-पद्धति-संस्कृतशिक्षणस्यमहत्ता-गणतन्त्र-दिवस-कवि-सम्मेलन-विशेषाङ्कानां शृङ्खलायां संस्कृत-लघुकथा-विशेषाङ्कोऽयं संस्कृत-शिक्षण-संस्थाभ्य: संस्कृतविश्वविद्यालयेभ्य: संस्कृतविभागेभ्यश्च निश्चप्रचमुपयोगी भविष्यति। संस्कृत कथा-साहित्यस्य विषये तत्र भवन्तो भवत्यश्च जानन्त्येव यत् प्राचीन-भारते संस्कृत-शिक्षणस्य पद्धतौ कथानामत्यधिकं महत्त्वमासीत्। उपनिषत्सु पुराणेष्वन्येषु च संस्कृतशास्त्रेष्वनेका: संस्कृत-कथा: सन्ति। कथामाध्यमेन पञ्चतन्त्रस्य शिक्षणपद्धति: प्राचीनभारते लोकप्रिया शिक्षण-शैली आसीत्। गुरुकुलानां स्थानं सुदूरे वनपरिवेशे भवति स्म, यत्र राजकुमारा: सम्भ्रान्ता: सामान्याश्च बालका: सहैवान्तेवासिन: भवन्तिस्म। तत्र रात्रौ ते परस्परं कथानां कथनेन श्रवणेन च मनोरञ्जनं कुर्वन्ति स्म। गुरुकुलेषु तु ज्ञान-विज्ञानपरक-विषयाणामपि शिक्षणकार्यं कथामाध्यमेनैव भवति स्म। गृहेष्वपि पितामह-पितामही-मातामह-मातामहीनां कथा: बालानां कृतेऽत्यन्तं प्रेरणास्पदा: भवन्ति स्म। युगपरिवर्तनेन सह सामाजिकमूल्यानां मान्यतानाञ्च प्रभाव: शिक्षायामपि न्यपतत्। किन्तु शिक्षायां कथानां सार्थकताद्याप्यनुभूयते। संस्कृतसाहित्यस्य कथा: विविधासु भाषास्वनूदिता: सञ्जाता:। सम्प्रति सर्वासां भाषाणां विषयाणाञ्च पाठ्यक्रमेषु कथानां लघुकथानां विशिष्टं स्थानं विद्यते। लघुकथानां महत्त्वं विचार्यैवाकादम्याखिल-भारतीय-संस्कृत-लघुकथा-प्रतियोगितायोजिता। यस्यां पुरस्कृता: सरससंस्कृत-लघुकथा: पत्रिकायामस्यां प्रकाश्याधुनिक-शिक्षण-प्रणाल्यां संस्कृतस्य प्रसारे च लघुकथानामुपयोगाय निवेदयत्ययं जन:।

विविध-भाव-विभाव-विभाविनी
सरसकाव्यकथादिविकासिनी।
सकलमानवमानसमोदिनी।
विजयतां भुवि संस्कृतमञ्जरी ॥

निवेदक:

श्रीकृष्णसेमवाल:

सचिव:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

सम्पादकीयम्		III
१. परिवर्तनम्	श्रीपरमानन्दझा	१
२. अतिथिसेवनम्	डॉ. रामकिशोर मिश्रः	४
३. मोहभङ्गः	श्री ओम्प्रकाशठाकुरः	७
४. किम् कस्य श्वो भविष्यति ?	श्रीकृष्णदत्तशर्मा	१०
५. श्रद्धावांल्लभते विद्याम्	श्रीहरिहरशर्मा अर्यालः	१४
६. प्रेमराशीभवन्ति	श्रीचन्द्रभानुत्रिपाठी	१७
७. भवितव्यता	श्रीबाबूरामावस्थी	२२
८. शिक्षा	श्रीमदनमोहनजोशी	२६
९. सत्यमेव जयते	डॉ. रामाशीषपाण्डेयः	३०
१०. श्रेयस्करी पितुराज्ञा	डॉ. बलवीरदत्तशास्त्री	३३
११. प्रवीरस्य सौभाग्यम्	श्री रमाशंकरमिश्रः	३८
१२. आर्याक्का	श्री. के. रा. जोशी	४१
१३. उपक्रमः	डॉ. ओम्प्रकाश शास्त्री	४५
१४. हा हन्त हन्त विधिना परिवञ्चितोऽस्मि	डॉ. गोपराजू. रामा	४८
१५. दैवदुर्विपाकः	डॉ. कीर्तिवल्लभशक्टा	५१
१६. संकल्पः	डॉ. नवलता	५४
१७. जयन्ती	श्रीविष्णुकान्तझा	६०
१८. टिन् टिन् वृद्धः	डॉ. वनमालीविश्वालः	६३
१९. दिल्लीसंस्कृताकादम्याः समाचाराः	डॉ. जीतरामभट्टः	६७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अयि देववाणीसमाराधनैकव्रतास्तत्र भवन्तो भवत्यश्च दिल्ली-संस्कृत-अकादमी प्रतिवर्षं संस्कृतस्य प्रचाराय प्रसाराय च विविधानां कार्यक्रमाणामायोजनं करोति । तेष्वनेके कार्यक्रमाः विदुषां विदुषीनां कवीनां कवयित्रीणाञ्च कृते भवन्ति । ज्ञान-विज्ञानयोः विषयाणामनुसन्धानाय परिष्काराय च पुरा समस्यापूर्ति-शास्त्रार्थ-वाद-विवाद-प्रतियोगिताभिः प्रतिभानां योग्यतानाञ्च प्राकट्यं भवति स्म । संस्कृतभाषायाः या श्लोकसमस्यापूर्तिप्रतियोगिता प्राचीनकाले कवित्वपरीक्षणाय निकषा आसीत्, तामेवाधार्याकादमी प्रतिवर्षमखिलभारतीयस्तरीयां प्रतियोगितामायोजयति । गतवर्षेऽस्याः प्रतियोगितायाः विषयः आसीत् 'स्वतन्त्रता:', भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः द्विशताधिकाः प्रविष्ट्यः प्रतियोगितायामस्यां सम्प्राप्ताः । अकादम्या मूल्यांकनानन्तरमधिगताङ्कानां क्रमेणैकपञ्चाशत् कवीनां कवयित्रीणाञ्च श्लोकान् संगृह्य सम्पाद्य च प्रकाशितः संस्कृतमञ्जर्याः अङ्कोऽयमपि सर्वेभ्यः विद्वद्भ्यः संस्कृतानुरागिभ्यश्च ज्ञानरञ्जनार्थमुपयोगी भविष्यतीति मे दृढो विश्वासः । गणतन्त्रस्य स्वर्णजयन्त्याः वर्षेऽस्मिन्नेतेषां श्लोकानामनुशीलनाय प्रसाराय च निवेदयत्ययं जनः ।

विविध-भाव-विभाव-विभाविनी
सरसकाव्यकथादिविकासिनी ।
सकलमानव-मानस-मोदिनी
विजयतां भुवि संस्कृतमञ्जरी ॥

निवेदकः
श्रीकृष्णसेमवालः
सचिवः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमणिका

(विषयः स्वतन्त्रता)

सम्पादकीयम् III

१. डॉ० मिश्रोऽभिराजेन्द्रः १

२. श्री परमानन्दशास्त्री ४

३. श्री परमानन्दझा ७

४. श्री ओम्प्रकाशत्रिवेदी १०

५. आचार्यबाबूरामावस्थी १३

६. डॉ० जगदीशप्रसादसेमवालः १६

७. डॉ. शिवसागरत्रिपाठी १९

८. डॉ. कृष्णलालः २२

९. श्री पद्मशास्त्री २५

१०. डॉ० कृपारामत्रिपाठी २८

११. पं० श्रीरामदवे ३१

१२. डॉ० नारायणशास्त्री काङ्करो विद्यालङ्कारः ३३

१३. डॉ० गोस्वामिबलभद्रप्रसादशास्त्री ३६

१४. आचार्य श्यामसुन्दरझा ३९

१५. डॉ० मनुलता शर्मा ४२

१६. डॉ० हरिश्चन्द्रदीक्षितशास्त्री ४५

१७. डॉ० बालकृष्णशर्मा ४८

१८. पं० सूर्यनारायणशास्त्री ५१

१९. डॉ० उमारमणझा ५४

२०. डॉ. जी.एस.आर. कृष्णमूर्तिः ५७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२१. श्री सन्तोषकुमारपाण्डेयः ६०
२२. डॉ० रामाशीषपाण्डेयः ६३
२३. श्री गङ्गाधरद्विवेदी ६६
२४. डॉ० अशोककुमारडबरालः ६९
२५. आचार्यगिरिजाशङ्करमिश्रः ७२
२६. श्री गिरिजाप्रसादगिरीशः ७५
२७. डॉ० कृष्णचन्द्रचतुर्वेदी ७८
२८. डॉ० मिथिलाप्रसादत्रिपाठी ८१
२९. आचार्यनारायणदत्तपाण्डेयः ८४
३०. श्री गोपबन्धुमिश्रः ८७
३१. श्री सत्यनारायणशास्त्री ८९
३२. डॉ० बनमाली विश्वालः ९२
३३. श्री माधवजनार्दनरटाटे ९५
३४. आचार्यः डॉ० सहदेवकृष्णचतुर्वेदी ९८
३५. श्री गोपालसिंहः १०१
३६. डॉ० रामदेवसाहू १०४
३७. श्री रामेश्वरदत्तशर्मा १०७
३८. श्री विपिनकुमारझा ११०
३९. डॉ० मृदुला शर्मा ११३
४०. डॉ० केशव प्रसादगुप्तः ११६
४१. रसराजः डॉ० जयदेवजानी ११९
४२. डॉ० रामकिशोरमिश्रः १२२
४३. श्रीकिशोरीरमणझा १२५
४४. डॉ० रामस्वरूपदोतोलिया १२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिषिञ्चति, प्रचण्डरविकिरणेभ्यः समधिकतुषारपातेभ्यो वा परिवर्जयति, एवं वात्सल्यरसपरिप्लुतायाः रेणुकायाः स्निग्धाङ्कतले साधु समेधमानः तस्य पुत्रः अद्य पञ्चदशवर्षदेशीयः सञ्जातः ।

मातृभावोचितचारुवात्सल्यरसः यावतांशेन रेणुकातः विकासेन अधिगतः, न ततः किञ्चिदपि न्यूनं पितुः अनुरूपं सत्पथोपदेशपेशलम् अनुशासनम् अपि कदाचिद् अनुभूतम् । पितुः अभावे सकलदृष्ट्या विपन्नतायाः स्थितौ सत्याम् अपि अद्य विकासः स्वविद्यालये सर्वेषां छात्राणाम् अग्रेसरः वर्गप्रमुखश्च विद्यते, सः अतीव परिश्रमशीलः अस्ति । शिक्षकाः तस्य सर्वदैव सद्गुणान् श्लाघयन्तः, तस्मिन् भृशम् आकृष्टाः सन्ति । यथैव अयम् अध्ययने तद्वदेव अन्येषु अपि संगीत-चित्रण-क्रीडादिक्षेत्रेषु कुशलः अस्ति । एतैः सद्गुणैः समम् अस्य मधुमधुरः स्वभावस्तु सुवर्णे सौरभसंयोगमिव सम्पादयति ।

स्ववर्गे अस्य सहजमधुरेण व्यवहारेण यद्यपि सर्वे अपि छात्राः अस्मिन् वशीभूताः सन्तः एतस्य सुहृद्भूता एव, परन्तु तन्मध्ये एकः विक्रमो नाम यः खलु अस्य प्रवेशिन एव पुत्रः अस्ति—अकारणमेव अस्मिन् ईर्ष्याकुलस्तिष्ठति । आढ्यस्य पितुः एकः एव असौ पुत्रः दिनपर्यन्तं वर्गाद् बहिः द्वित्रैः मित्रैः सह इतस्ततः समयम् अतिवाहयन् एतद्विरुद्धं दुष्प्रपञ्चं सर्वदा रचयन् दृश्यते ।

एकदा जनवरीमासे गणतन्त्रदिवसोपलक्ष्ये विद्यालये छात्राणां कृते एका द्रुतधावनस्पर्धा आयोज्यमाना आसीत् । सर्वे छात्राः तत्र सोत्साहं भागमग्रहीषुः । विकासोऽपि क्रीडादौ अतीव रुचिं धारयित स्म, अतः सोऽपि स्वकीयनाम प्रतिस्पर्धि-तालिकायाम् उदटङ्कयत् । इतः ईर्ष्यालुः विक्रमः विकासस्य नाम दृष्ट्वा तस्य अपकाराय स्वर्णिमम् अवसरं प्राप्तः स्वमित्रमण्डलेन सह किमपि गुप्तमन्त्रणाम् अकरोत् ।

स्पर्धायाः कृते सर्वा अपि व्यवस्था पूर्णा-जाता । प्रतिस्पर्धिनः एकस्यां पङ्क्तौ समवस्थिताः सन्तः अध्यक्षानुमतिं प्रतीक्षमाणाः आसन् । श्रुतमात्रे सङ्केते, प्रतिस्पर्धिमण्डले सर्वैरपिच्छात्रैः अहमहमिकया यथाशक्ति धावनं प्रारब्धम् । विक्रमस्तु अमुम् एव अवसरं चिरात् प्रतीक्षमाणः आसीत्, स अतिशीघ्रं विकासस्य समीपं गत्वा एकेन पादाघातेन तम् अधः न्यपातयत् । एतद् वीक्ष्य छात्रसम्मर्दे महान् कोलाहलः सञ्जातः । विकासः पीडाकुलः सन् स्खलितः अभूत् । सर्वेऽपि छात्राः तत्साहाय्यार्थम् अधावन् । स्पर्धासञ्चालकः अपि छात्रान् एकत्र सम्मिलितान् दृष्ट्वा समीपम् आगतः वस्तुस्थितिं विज्ञाय, विक्रमम् आहूय तर्जयन् अतीव क्रुद्धः सन् तम् अचेतयत्-प्रथमः अपराधः इति कृत्वा त्यज्यसे, यदि पुनः कदाचित् इमम् अपराधम् आवर्त्तयन् उपलब्धः, तदा कठोरतया दण्डयिष्यसे, विद्यालयाद् निष्कासितश्च भविष्यसीति । इत्थं तस्मिन् दिवसे सा स्पर्धा स्थगिता जाता, अपरा च तिथिः तदर्थम् उद्घोषिता । सर्वे गृहं गतवन्तः । विकासोऽपि तावता कालेन मन्दपीडः शनैः उत्थाय द्वित्रैः मित्रैः सह गृहम् आगच्छत् ।

तदनन्तरं वर्गे कोऽपि विक्रमं न आद्रियते । विक्रमस्तु अनेन प्रसङ्गेन पूर्वतः अपि अधिकतरं विकासं प्रति ईर्ष्याकुलः दृश्यते । सर्वेषां समक्षं सः शिक्षकेण ताडितः स्वकीयं भृशम् अपमानं मन्यते स्म । यद्यपि एतद् घटनाप्रसङ्गे मातुः समक्षं विकासेन कदापि चर्चा न कृता, परं स मनसा अतीव व्याकुलः आसीत् । प्रतिदिनं रात्रौ सः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतद्विषये मनसि चिन्तयति स्म-अयं विक्रमः कथम् अकारणमेव मह्यम् ईर्ष्यति, केनोपायेन सः मां प्रति इमं दुर्भावं दूरयेत् इति ।

एकदा प्रातः काले विकासः आपणात् आगच्छन् आसीत् । मार्गे सहसा एव तस्य दृष्टिः किञ्चिद् दूरस्थे जनसम्मर्दे न्यपतत् । कौतूहलवशाद् अयम् अपि तत्र अगच्छत् । परं तत्र प्राप्तः, तत्रत्यां स्थितिं वीक्ष्य चकितो जातः । विक्रमः त्रिचतुरैः क्रुद्धजनैः बद्ध एकेन ताड्यमानः आसीत् । सर्वे जनाः परस्परम् आक्रोशं प्रकटयन्तः श्रूयन्ते स्म ।

एकः—अद्य नैव त्याज्यः अयं दुष्टः । बहुवारं प्रतिवेशिपुत्रबुद्ध्या क्षान्तः ।

द्वितीयः—पश्यामि अद्य कः अस्य रक्षां करोति । पिता कार्यालयं गतः, माता अपि आपणात् न निवृत्ता अस्ति । ताडय, ताडय । अद्य न क्षन्तव्यः ।

तृतीयः—साधु, साधु भणसि भ्रातः । परह्यः ममापि पुत्रम् अयम् अकारणम् एव अताडयत् । अतीव दुष्टः अस्ति ।

इदं दृष्ट्वा विकासः झटिति समीपम् उपसृत्य, ताडयतः करं धृत्वा निवारयन् अवोचत् "श्रीमन् ! क्षम्यताम् अयम् । मम सहपाठी अपि अस्ति । कथं ताडयन्ति भवन्तः इमम् ?"

"विकास ! त्वम् ! ! ! त्वं वारयसि माम् । मया तु श्रुतं, त्वामपि एकदा अयं दुष्टः पातितवान् आसीत् । पश्य, अद्य निष्कारणं मम वातायने लोष्ठं प्रक्षिप्य अनेन बहुमूल्यः काचः भञ्जितः । सर्वे अपि अस्य दुर्व्यवहारेण उद्विग्नाः सञ्जाताः । अद्य नाहं वारयितव्यः ।"

"महोदय ! अस्माभिः वर्गे गुरोः पठितम्—अपकारिषु यः साधुः, स साधुः साधुरुच्यते ।' तस्माद् अहम् अस्य साहाय्यं कर्तुम् आगतः अस्मि । भवतः चरणौ गृह्णामि, अद्य केवलम् अयं त्यज्यताम् । अहं वचनं ददामि, एतदनन्तरम् अयं न विधास्यति उत्पातम् । कृपा विधीयताम् ।"

इत्थं विकासस्य भूयो भूयः अनुरोधवचनं श्रुत्वा सर्वे शान्ताः सञ्जाताः । गृहपतिः अपि तस्य अनुरोधं स्वीकृत्य तम् अत्यजत् । सर्वे विकासस्य प्रशंसां कुर्वन्तः ततः स्वस्वगृहं प्रस्थिताः ।

इतः विकासस्य अमुम् आश्चर्यावहं व्यवहारं विलोक्य विक्रमः अतीव लज्जितः आसीत् । स तम्प्रति स्वकीयं दुर्व्यवहारं स्मारं स्मारं पश्चात्तापेन दह्यमानः आसीत् । असौ सहसा विकासस्य पादयोः निपत्य क्षमां याचितुम् आरभत । विकासः तस्य भुजौ गृहीत्वा उत्थाप्य भृशम् असान्त्वयत् । उभौ अपि आनन्दमग्नौ परस्परम् आलिङ्गितौ जातौ । अद्य विक्रमस्य प्राक्तनः सकलः दुर्भावः, दुःस्वभावः, दुर्गुणश्च ताभिः एव अश्रुधाराभिः विगलितो जातः ।

अतः परं विक्रमः अतीव शान्तः सञ्जातः । वर्गेऽपिच्छात्रैः सह तदीयो व्यवहारः सौहार्दपूर्णः दृश्यते । तस्मिन् अकस्माद् इदं परिवर्तनम् अवलोक्य वर्गे समाजे गृहे वा सर्वे जनाः चकितचकिताः सन्ति । विकासः अद्य विशेषेण प्रहृष्टमनाः विलोक्यते । चिराद् अन्विष्यमाणं समाधानम् अद्य तस्य पुरः प्रस्तुतमासीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिथिसेवनम्

डॉ. रामकिशोरमिश्रः
संस्कृत-विभागाध्यक्षः, म. मा. डिग्री कॉलिज, खेकड़ा
खेकड़ा-२०११०१ (बागपत) उ. प्र.

(१)

कृपानाथो नामैको ब्राह्मणो गङ्गातीरे लहरेश्वरे वसति स्म। तस्य ब्राह्मणी दयावती नामाऽसीत्। द्वयोरासीत् किमपि नाऽपत्यम्। भिक्षैव तयोर्जीविकाऽभूत्। भगवतः शिवस्य भक्तिं पूजां च विना नाऽऽसीत्किमपि कार्यं तयोः। प्रतिदिनं तौ प्रातरुत्थाय शौचादिना निवृत्तौ भूत्वा गङ्गां गत्वा स्नातः स्म। तदनन्तरं बिल्वपत्रपुष्पादिभिश्चन्दनधूपनैवेद्यादिभिश्च श्रीलहरेश्वरमहादेवस्य लिङ्गपूजनं मनसा वाचा कर्मणा कुरुतः स्म।

भगवतः शङ्करस्य त्रिपुण्डतिलकं स्वमस्तकेऽङ्कितं कृत्वा शिवसमं नग्नरूपं निधाय 'जय जय शिव शङ्कर महादेव !' इति वदन् स कृपानाथो भिक्षायै नगरमटति स्म।

तत्तुल्यो न कोऽप्यासीदन्यो दरिद्रोजनः। भिक्षायां स यत् किञ्चित्प्राप्नोति स्म, तेनैव स सर्वथा सन्तुष्टो भवति स्म। तस्य भार्याऽपि सा दयावती तद्भिक्षाप्राप्तान्नेनैव स्वगेहं व्ययते स्म। भिक्षान्नमेव पक्त्वा तच्च भगवते शिवाय भोगे समर्प्य तदेव द्वावेव भक्षयतः स्म।

यस्मिन् कस्मिन्दिने यदि कोऽप्यतिथिस्तद्गृहमायाति स्म, तत्प्रथमं तौ तमेव भोजयतः स्म। ततोऽवशिष्टमन्नं प्रसादरूपं तौ गृह्णीतः स्म। यदानीमतिथिभोजनादन्नं नाऽवशिनष्टि स्म, तदानीं तौ दम्पती सहर्षमुपवसतः स्म। तस्मिन्नुपवासदिने शिवभजनेन स्वकालं तौ यापयतः स्म। कदापि तौ शिवभजनात्पृथक्परचर्चां परनिन्दां च न कुर्वतः स्म। शिवं भजन्तौ तौ शिवस्तोत्रमपि पठतः स्म—

शम्भुं शिवं पशुपतिं जगदेकनाथम्,
शर्वं मृडं गिरिशमीश्वरमादिदेवम्,
गौरीपतिं स्वहृदि यं मनसा स्मरामि,
तं पार्वतीश्वरमहं शिरसा नमामि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतेश्वराय गिरिशाय दिगम्बराय,
योगेश्वराय वसुमूर्तिविभूषिताय,
गङ्गाधराय विधुभूषितमस्तकाय,
तस्मै नमो भगवते वृषभध्वजाय ॥

(२)

अये देवि दयावति ! किञ्चिन्न प्राप्तमन्नमद्य । तदेहि कुटीराद् बहिरत्र । भगवति ! शिवभजनमेव मादृशानां दरिद्राणामेक आश्रयः । आगच्छ प्रिये ! शिवं शङ्करं प्रार्थयावः । हे शिव शङ्कर भगवन् ! त्वमसि नौ स्वामी । अनुग्रहं निग्रहं च मयि यत्किञ्चिच्चिकीर्षसि, तत्कर्तुमर्हसि । त्वामन्तरेण को मम दीनस्य ? त्वमपारकरुणासागरो दीनबन्धुरसि । यस्य रक्षको न कोऽपि, तस्य त्वमेव रक्षकोऽसि । प्रभो ! त्वं दुर्जनदर्दुराणां कालसर्पोऽसि, मदोन्मत्तमनुष्यमातङ्गानामाक्रान्ता सिंहोऽसि, परमद्य किं कृतं त्वया ? यदावयोः क्षुधाकुलयोरन्नमपि न । नाऽहं क्षुधातो बिभेमि, परमद्य कोऽप्यतिथिरागच्छेच्चेत्तदहं तं किं भोजयिष्यामि ? त्राहि मां, त्राहि मां देव ! मयि दयस्व कृपासिन्धो !

तदानीमेव कश्चिज्जराजीर्णस्तेस्वी कोऽपि साधुरागच्छत् । स च कृपानाथस्य कुटीरद्वारे समुपातिष्ठत् । स साधोः स्वागतं व्याहरत्—आगम्यताम्, आगम्यतां भगवन् ! समलङ्क्रियतामासनमिदम्, आज्ञाप्यतां स्वामिन् ! सेवकोऽयं किं सेवेत ? इति तस्य वचनं श्रुत्वा साधुरब्रवीद् भद्र ! मया तप कीर्तिः श्रुता यत्त्वमभ्यागतं भक्त्या श्रद्धया समादरेण च सदन्नं भोजयसि । यस्याऽतिथिसेवायां श्रद्धा नाऽस्ति, तस्य गृहं नाऽहं गच्छामि, परं त्वादृशस्य परमश्रद्धालुभक्तस्याऽन्नन्तु याचित्वाऽपि खादामि । अत एव तव गृहं भोजनार्थमागतोऽस्मि । किं भोजयिष्यसि माम् ?

तद्वचनं निशम्य-"भगवन् ! यदा भवानस्य सेवकस्य गृहमागतोऽस्ति, तदहं किं भोजनमपि न कारयिष्यामि ? महाराज ! भवानस्मिन् कुशासने तावदुपविशतु, यावदहं भवतो भोजनव्यवस्थायै ब्राह्मणीं कथयामि" इत्युक्त्वा कृपानाथः कुटीरान्तर्गत्वा स्वभार्यामकथयत्—"देवि ! द्वारे स्थितोऽतिथिरेकः । स भोजनं चिकीर्षति, परमद्य तव गृहेऽन्नस्य नास्तिकण एकोऽपि । कथमद्य तस्य भोजनं कारयिष्यसि ? दयावति ! तव दयाया अद्य परीक्षादिनम् ।"

पत्युरुक्तमाकर्ण्य दयावत्या दयायाः सीमाऽपि नाऽवशिष्टा । सा प्रोक्तवती—"प्राणनाथ ! चिन्तया किम् ? मम गृहे तु न किञ्चिदस्ति, परमतिथिमवश्यमेव भोजयिष्यामि ।" 'कथं भोजयिष्यसि भगवति ?' इति प्रश्ने कृते-'प्रियतम ! जीवनमावयोः संन्यासिजीवनतुल्यमेव । तदेतान्मे केशान् कर्तयित्वा नगरापणे विक्रीय गोधूमचूर्णं माषद्विदलानि लवणं च क्रीत्वा शीघ्रमानय, येनाहं तमतिथिं भोजयितुं शक्नुयाम् ।' 'किमुक्तं प्रिये ! तव केशान् विक्रीय भोजनं भविष्यति ?' इति कथिते सम्प्रति मम शिरोबालाः एव भोजनकार्यं साधयिष्यन्ति, पुनस्ते कालान्तरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरसि रूढाः भविष्यन्ति । अत्र का हानिः ? अत एतान् गृहीत्वाऽऽपणं गच्छ । भोजनसामग्रीमानीय मह्यं देहि, येनाऽतिथये त्वशनं पक्ष्यामि ।

(३)

पतिस्तथा कृतवान्, यथा पत्नी कथितवती । अतिथिं भोजयित्वा कृपानाथस्तं पृष्टवान्—"भगवन् ! कोऽसि ? स्वपरिचयं कृपया कारय ।" इति श्रुत्वा स साधुरुक्तवान्—"भद्र ! शूकरक्षेत्रीयमन्दिरमण्डलाधिपतिरहम् । तव कृतयाऽतिथिसेवयाऽतीव प्रीतोऽस्मि । तवाऽतिथिसेवाकीर्तिं श्रुत्वा त्वां नेतुमागतोऽस्मि । त्वमकिञ्चनोऽपि स्वस्त्रीकेशान् विक्रीय मामभोजयः । अनेन ज्ञायते यदत्र त्वया जीवनधारणाय भिक्षापि न प्राप्यते । तत्त्वामहं शूकरक्षेत्रे वाराहकुण्डे भगवतः सोमेश्वरस्य मन्दिरस्य पूजकं विधातुमिच्छामि । तन्मया सह तत्र गत्वा तत्पूजकपदमलङ्कुरु । तत्र निवासार्थमावासोऽपि प्राप्स्यते । अतः सपत्नीक एव तत्र ससुखं वस, भगवन्तं सोमेश्वरं च पूजय । भक्तैरर्पितेन धनादिकेन स्वजीवनं भोजनचिन्तारहितमेव यापय । कथय, सोमेश्वरपूजकत्वमङ्गीकृतं त्वया न वेति ?"

'स्वामिन् ! सोमेश्वरे लहरेश्वरे च न किमप्यन्तरम् । यो लहरेश्वरोऽस्ति, स एव सोमेश्वरोऽस्ति । शूकरक्षेत्रं गत्वा तत्र सोमेश्वरसेवास्वीकारेण कोऽत्र लहरेश्वरं सेविष्यते ? अतो भगवन् ! क्षमस्व माम् । अत्राहं लहरेश्वररूपेण सोमेश्वरपूजनमेव कुर्वे । श्रीलहरेश्वरस्य कृपया भोजनचिन्ता मां न बाधते । यत्किञ्चिदत्रैव प्राप्यते, तेनैव बुभुक्षां परिसमाप्य परमानन्दमनुभवामि' इति निशम्य 'भद्र त्वमसि तत्वज्ञानी, यल्लहरेश्वरं त्यक्त्वा कुत्रापि न जिगमिषसि । धनाभावेऽपि सन्तोषसुखमनुभवसि ।' इति निगद्य साधुः स्वस्थानमगच्छत् । कृपानाथः पत्न्या सह लहरेश्वरमन्दिरं गत्वा भगवन्तं शिवमित्थं स्तुतवान्—

रुद्राय लोकसुखदाय जटाधिपाय,
भाले त्रिपुण्डलसिताय नमः शिवाय ।
यं शङ्करं हि लहरेश्वरमत्र वन्दे,
तस्मै नमो भगवते वृषभध्वजाय ॥

(भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी
काव्यकथोपन्यासरचयिता नाटककारो धीमान्,
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
दिल्ली-संस्कृत-अकादमीकृतेऽतिथिसेवनं कृतवान् ॥)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहभङ्गः

—ओम्प्रकाशठाकुरः

डी—७५७ सरस्वती विहारः, दिल्ली

पुरा कस्यचिद् देशस्य नृपः अहम्मानी अत्याचारपरायणः, प्रमादी भोगैश्वर्यप्रसक्तश्चासीत् । राजकर्मसु अनवधानात् सर्वा शासनव्यवस्था विकृतिमापद्यत । अधिकारिणो राजकर्मचारिणश्च राजकीयेषु नियोगेषु राज्ञः उपेक्षावृत्तिमालक्ष्य स्वेच्छाचारिणो जाताः । तेषां निरङ्कुशतया जनहितकार्याणि अवरुद्धानि जातानि ।

उपेक्षापरे राज्ञि प्रजाऽपि स्वैरिणी संजाता । उत्कोचस्य आदान-प्रदाने प्रवृत्ते अभूताम् । सर्वत्र सबलः ऊनं बबाधे । निर्बलानाम् असहायानां च नासीत् कोऽप्यभ्युपपत्ता । सर्वत्र व्याप्तं हाहाकारं कः शृणुयात् ? न्यायव्यवस्था तु मूका बधिरा चासीत् । ईदृगवस्थे तस्मिन् राज्ये अपराधिनः यत्र तत्र स्वैरं विहरन्ते स्म । जनेषु असुरक्षाया भावना बलवत् पदम् अधात् ।

एकस्मिन् अहनि नृपतिः कैश्चित् सहचरैः साकम् अश्वेन मृगयायै वनं जगाम । अनेके पशवः तेषां निशितैः शरप्रहारैः निहता जाताः । तस्मिन् विशालेऽरण्ये पशूनामन्वेषणपरः राजा सुदूरमग्रे निर्गतः । शनैः शनैरम्बरमणिः वियन्मध्यमाससाद । निदाघताप-तप्तः नृपः वैक्लव्यमाप । श्रान्तः सन् अश्वादवतीर्य भूमावुपाविशत् । इतस्ततः पश्यन् स कमपि सहचरं तत्रायान्तं न व्यलोकयत् ।

होराद्वयं तत्र विश्रम्य एकलः नृपः पुनः अश्वेन कांचित् दिशं प्रति चचाल । तस्माद् बृहतो विपिनाद् बहिर्गमनमार्गं न स वेत्ति स्म ।

अथ क्रमशः भूतले प्रततान् किरणान् संहृत्य यदा भगवान् मरीचिमाली अस्ताचलं प्रति गमनोन्मुखोऽजायत, तदा नृपस्य मनसि काऽपि भीतिः पदं दधे । प्रतिक्षणम् एधमानं तमः तं भीषयति स्म । सघनतरु-लता-गुल्मसंकुले वने एकले विचरति तस्मिन् हिंस्रपशोः आक्रमणभयमपि तस्य मानसं विचलितमकार्षीत् ।

सोऽचिन्तयत्, अद्य सर्वं दिनं वने परिभ्रन्नहं न केवलं श्रान्तोऽस्मि क्षुधापिपासाऽर्दितोऽपि । किं कुर्याम् ? नूनं मम सहचरा अपि विशालामिमामटवीं गाहमाना मदन्वेषणपराभविष्यन्ति, अथवा अहमिव मार्गभ्रष्टा क्वचित् स्थिताः सन्ति, उत वनान्निर्गत्य गृहेषु विश्रामपराः स्युः ! अत्र तु रात्रिकालयापनाय शरणमपि नास्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं विविधविचारेषु मग्नो नृपः क्वचिद् गन्तुं शरणमधिगन्तुं च निश्चयं चकार। हयमारुह्य जवेन वनमगाहत। ततश्चिरेण तेन वनैकदेशे ज्वलदनलो व्यलोकि। अनलसंनिधाने मानवस्य स्थितिमनुमीय स तां दिशं प्रति गन्तुमारेभे।

पंचभिः कलाभिः स एकस्य कुटीरस्य पुरतः आसीत्। कुट्या बहिः उदग्रार्चिः हुताशनः ज्वलति स्म। तत्समीपे विशालः इन्धनसञ्चयोऽवर्तत। तत्र स ज्वलदग्नौ इन्धनानि क्षिपन्तीम् एकां जरतीमद्राक्षीत्। हिंसकश्वापदप्रतिभये घोरे विजने वने वृद्धां वीक्ष्य स विस्मयोत्फुल्ललोचनः समजायत। तन्मनसि नैके विचाराः प्रास्फुरन्—नात्र कश्चिदन्यः विलोक्यते। कथमेषा एकाकिनी वसतीति चित्रम्। मया तु रात्रियापनाय शरणं लब्धम् इत्यादयः।

अथ राजा तामुपसृत्य प्रार्थयत्, 'मातः, अटवीमागतोऽहं बहिर्गमनमार्गमन्विष्यन् इहागतोऽस्मि। मम सहचरा अपि अत्रारण्ये क्वचित् मार्गान्वेषणपराः स्युः। बहु भ्रान्त्वाऽपि मार्गं न अलभे। रात्रिः संजाता। अहमिह रात्रौ विश्रम्य प्रभाते स्वगन्तव्यं यातुमिच्छामि।'

वृद्धोवाच, 'भद्र! बहुचिरान्मया अतिथिर्भवान् आसादितः। प्रसन्नाऽस्मि तवागमनेन। अश्वं बधान। जलमानयामि। पाणिपादं प्रक्षाल्य मार्गश्रममपाकुरु। यदपि फलादिकमशनीयं विद्यते तेन बुभुक्षां शमय। पश्चात् कुट्याम् आस्तरेण स्वपिहि। अत्र कोमलं शयनं नास्ति किन्तु श्रान्तस्य जनस्य निद्रा प्रस्तरेष्वपि सुलभा भवति।'

नृपतिः वृद्धयोपहितम् अशनम् अशित्वा स्वादु मधुरं पानीयं च निपीय तृप्तिमभजत्। ततः किंचित् प्रहृष्टमनाः असौ आस्तरणे स्थितोऽभवत्। अथ कदा निद्रासुन्दरी श्रान्तस्य तस्य महीपस्य नयने निमीलितवती इति नासावजानात्।

प्रभाते प्रबुध्य नृपः आतिथेयीं प्रणम्य प्रोवाच, 'मातः! त्वत्प्रसादात् अहं सुखेन निशामनयम्। सम्प्रति मां गन्तुमनुजानीहि बहिर्गमनमार्गं च निर्दिश। परमितः पूर्वं मम चेतसि कापि जिज्ञासा वर्तते, तां शमयतु भवती। ननु पृच्छामि, केन कारणेन भवती भीषणहिंस्रजीवसमाकुले विजने वनेऽत्र एकाकिनी वसति? किं भीतिर्न बाधते भवतीम्?'

तन्निशम्य दीर्घं निःश्वस्य वृद्धा निजगाद, 'भद्र! कोऽस्यां भुवि भयनिर्मुक्तः। अहमपि सततं प्राणसंशयमापन्ना बिभेमि। सम्प्रत्यहं कतिपयकालादेकाकिनी वसामि। वर्षद्वयपूर्वमत्राहं श्वशुरेण, पत्या, पुत्रेण, पुत्रवध्वा च सहिता आसम्। देवहतकेन समे मम बन्धवः क्रमशः हताः। अत्रत्यैः श्वापदैः आक्रम्य व्यापाद्य च ते उदरसाद् विहिताः। केवलमहं मन्दभागिनी तद्दिनं प्रतीक्षमाणाऽस्मि यदा कश्चित् सिंहो वा व्याघ्रो वा चित्रको वा वृको वा मम पिशितेन स्वोदरं पूरयेत्।'

तद्वचांसि संश्रुत्य राज्ञो मानसं कारुण्योद्वेलितं जातम्। साश्रुनयनः सगद्गदकण्ठः स पुनस्तामपृच्छत्, 'वदतु वदतु भवती, नगरनिवासं परिहाय केन हेतुनाऽस्मिन् भयंकरे विपिने वस्तुमध्यवसितमत्र भवत्या?'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साऽवदत्, 'किं करिष्यसि ज्ञात्वाऽपि यदीच्छसि, शृणु ! अत्रत्यः भूपतिः क्रूरः नृशंसः जनहितानामुपेक्षापरः वैभवोन्मत्तश्चास्ति । तस्य अराजके देशे प्रजानां प्रत्येकम् श्वासोच्छ्वासः अपि भयमिश्रितोऽस्ति । मदीयेन श्वशुरेणोक्तं यत् निरंकुशस्य निर्मर्यादस्य राज्ञो राज्ये निवासापेक्षया हिंस्रजीवसमाश्रये वनेऽधिवासो वरेण्यः । एषोऽस्त्यस्माकं वननिवासहेतुः । एकाकिनी वृद्धाऽहं कदा कस्य पशोः भक्ष्यतां प्रयामि' इति वदन्त्याः तस्याः नयनाभ्याम् स्रवन्ती अश्रुधारा तस्या उरोऽभ्यषेचयत् । पटान्तेन वदनमावृत्य आनतशिरोधरा सकरुणं रुरोद ।

राज्ञा सर्वं श्रुतमवगतं च । तन्मनसि घोरः कश्चन कोलाहलः प्रादुरास । नेत्राभ्याम् अजस्राऽश्रुधारा प्रावहत् ।

कथमपि चित्तं प्रधार्य भूपतिः जगाद—'अम्ब । अहमस्मि तवापराधी । अहमस्मि तावकस्य कुलस्य निहन्ता । दण्डय माम् । मम कारणादेव भवती वनमाश्रिता । मम प्रमादादेव प्रजा सन्तप्यते । अद्य भवत्या मम चक्षुषी समुन्मीलिते । आत्मकृत्येषु भूयोऽनुतपामि । अद्याहं भवत्याः पुरतः प्रतिजाने यत् मम राज्ये सम्प्रति कोऽपि नागरिकः भयसंत्रस्तः न भविष्यति । सर्वत्र सुखशान्तिसमृद्धयः खेलिष्यन्ति । अपराधिनः दण्डयिष्यन्ते ।'

स पुनरभ्यधात्, "मातः ! भवत्या वनवासावधिः अवसानं गतः । अधुनाऽहंभवत्या सहैव राज्यं गमिष्यामि । मदीये भवने भवती निवत्स्यति ।"

राज्ञोऽनुरोधं निहन्तुम् अशक्नुवती सा तेन सह नगरं प्रति प्रातिष्ठत ।

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARIDWAR

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं कस्य श्वो भविष्यति

—कृष्णदत्तः शर्म्मा शास्त्री

८१ जवाहरगंज, हापुड़ नगरम्, (गाजियाबाद) उ०प्र०

इन्द्रप्रस्थमहानगरस्योपान्तस्थे मलिनक्षेत्रे एकस्मिन्नुटजे नानकप्रख्यः कश्चिच्छ्रमिकः सदारपुत्रो न्यवसत्। सः भाग्यहतकोऽशिक्षितस्तु सममेव नैर्धन्यदृष्टिपतितोऽपि आसीत्। तस्याशिक्षितत्वात् तन्मनः सदैव शल्य वदव्यात्सीत्। यद्यपि तस्य भार्याऽपि तद्वृत्तिसहायिकाऽभवत् तदापि तेषां जीवनमभावग्रस्तमेवासीत्।

तयोरेक एव पुत्र आसीद् 'दिनेश' इति नामधेयः। दशवर्षीयोऽसौ बालकः पञ्चमकक्षीयः छात्र आसीत्। दिनेशः प्रखरबुद्धिः, सौम्यः, सद्वृत्तश्चासीत्। स एकस्यां सामान्यस्तरीयप्राथमिकपाठशालायामध्ययनरत आसीत्।

श्रमिको नित्यप्रति प्रातरशनं संगृह्य स्वनियोगस्थानम् प्रातिष्ठत्। स एकेन कृतसमयकेन (ठेकेदार) नियुक्तो भवननिर्माणकर्मणि अकुशलश्रमिक इव दैनिकवृत्तिभोगीव आसीत्।

दौर्भाग्येनैकदा निर्माणाधीनैका भित्तिः सहसा ध्वस्ताऽभवत्। तद्भित्तिभारेण त्रयः श्रमिकास्तत्रैव तत्क्षणमेव पञ्चत्वमापुः। तेषु नानकनामधेयोऽपि श्रमिक आसीत्। श्रमिकभार्या वैधव्यानलदग्धचित्ता पुत्रेण सह करुणं विललाप। तौ परित्यज्य नासीत् कश्चिदन्य यस्तस्मै मृताय नयनाम्बु अमुञ्चत्। कृतसमयकेनापि तौ सर्वथाऽसहायौ विज्ञाय ताभ्याम् न कोपि क्षतिपूरणधनराशिः प्रदत्तः। विवशौ तौ न किमपि प्रतिकर्तुं क्षमौ अरण्यरोदनमेव कृत्वा, भाग्यमेव सर्वमिति मत्वा शान्तावतिष्ठताम्।

दुर्दैवदृग्गोचरतां गता श्रमिकभार्या येन केनापि प्रकारेण सपुत्रा स्वजीवनं यापयन्ती पुत्रं यथावत् अपाठयत्। दिनेशोऽपि मातुराज्ञामनुपालयन् द्विगुणोत्साहेन विद्यां जग्राह। सौम्यस्वभावेन, सद्व्यवहारेणाऽसौ सर्वजनप्रियोऽभवत्।

'प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः' इति सूक्तिरेकस्मिन् दिने दिनेशस्यापि जीवने चरितार्थाऽभवत्। तस्य माता परिश्रमाधिक्येन प्रभाविता रोगाक्रान्ता अभवत्। पुत्रः स्वमातरमहर्निशमगणयन् बहुश उपसिषेवे परन्तु रोगः शान्तिं नाप।

एकस्मिन् दिने दिनेशः स्वमातुरनुज्ञां सम्प्राप्य धर्मार्थौषध्यालयत औषधमानेतुं गृहात् प्रतस्थे। यथैवासौ राजपथमाप तावद् दूरादेव अपश्यद् यत्कश्चिद् भद्रो जनः स्वमोटरसाइकलयानं न्यक्कृत्य तदवरुद्धकारणमवलोकनरत आसीत्। तेन स्वलघुपत्रमञ्जूषा (ब्रीफ केस) यानपृष्ठभागे संस्थापिता। प्रस्थानकाले

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषा सा भूपतिता तेन नावलोकिता । राजपथपतितां तां तत्रैव हित्वा प्रचालितयानारूढस्त्वरया अलक्षितोऽभवत् । दिनेशस्तां मञ्जूषामादाय मातरं प्रत्युपाजगाम ।

माता— वत्स !स्वल्पकालेनैव कथं प्रत्यायातः ? औषधं नानीतम् ?

पुत्रः— कारणविशेषादौषधं नाऽऽनीतम् ।

माता— वत्स ! किं कारणमापतितम् ?

पुत्रः—मातः । राजपथे कस्यचित् सज्जनस्य मोटर साइकलयानात्मञ्जूषेयं विच्युता जाता । एतत्पतनं तेन न ज्ञातम् । मया दृष्टा गृहीता, गृहमानीता च ।

माता— यस्य कस्यापीयं तस्मै समर्पणीया । स्मर्तव्यं भवेत् पर 'द्रव्येषु लोष्ठवत्' व्यवहर्तव्यम् ।

पुत्रः—मातः । मञ्जूषास्वामी तु सर्वथा अज्ञातः । कथं कस्मै समर्पणीयेयम् ?

माता— वत्स ! निस्पृहभावेन इमामुद्घाटय, विलोकय तावत् तत्र किमप्यभिज्ञानपत्रकम् भवेत् ।

पुत्रो मात्रादिष्टो यावद् मञ्जूषामुद्घाटयति तावत् तत्र बहूनि पञ्चशत-मुद्रांकितानि रूप्यक-प्रपत्राणि विलोकयति । तानि बहिर्निःसारयन् स एकमभिज्ञानपत्रमवाप्य मातरमाह—मातः ! अस्त्यत्रैकम् संकेतपत्रम् ।

माता— किं तावत् ?

पुत्रः—'रमणकिशोर थालिया २२५/१० न्यू धर्मपुरी, नई दिल्ली ।' इति मुद्रितं वर्तते मातः ।

माता— -वत्स ! मामचिन्तयित्वा अभिज्ञानपत्रमादाय सम्प्रत्येव संकेतस्थानमुपेत्य सर्वं निवेदय, सत्वरं प्रत्यायाहि ।

मात्राज्ञप्तो दिनेशो मञ्जूषां मातरं समर्प्य यथा कथञ्चित् संकेतस्थानमुपेत् । तद्भवनमतीव विशालं भव्यञ्चासीत् द्वारि शस्त्रहस्तो द्वारपाल उपविष्ट आसीत् । अल्पवयस्कं बालकम् द्वारस्थं विलोक्य सगर्वमपृच्छत्-'कस्त्वम् ? किमीहसे ?'

दिनेशः— श्रीरमणकिशोरथालियामहाभागं द्रष्टुं कामये ।

द्वारपालः— किं ते प्रयोजनम् ?

दिनेशः—तेषां दर्शनमत्यावश्यकमनिवार्यं च । तद्दर्शनान्न मे कोऽपि लाभः । तेषामेव कार्यसिद्धिः सम्भविष्यति ।

एतस्मिन्नेव काले कश्चिद् भव्याकृतिः प्रौढो भवनाद् बहिर्गन्तुकामः समायातः । समुपस्थितं बालकं विलोक्य प्रौढस्तं पप्रच्छ, 'कस्त्वम् ? किमर्थमत्र ?'

तदभिज्ञानपत्रकं प्रदर्शयन् दिनेशः सप्रश्रयमवादीत्-'श्रीमन् । एनं श्रीमन्तं द्रष्टुमिच्छामि ।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रौढो जनो बालकं स्वपितरमुपानयत् । तं वृद्धश्रेष्ठिनम् सादरं नमस्कृत्य दिनेशः स्वायत्तम् अभिज्ञानपत्रकं प्रदर्शयन् अवोचत् 'श्रीमन् ? अप्येतद् भवदीयमेव ?

प्रौढः—ओम् ! एतदस्मदीयमेव । कुतस्त्वयाप्तम् ?

वृद्धः—'पुत्र प्रकाश ! कथं मलिनमुखरागः ? किं दुर्घटितम् ?

प्रकाशः—पितृदेव ! न जाने, सा मञ्जूषा क्व गता यस्यां नूतनोद्योगशालासम्बन्धीनि अनुबन्धपत्राणि, द्विलक्षसावधिनिक्षिप्तधनपत्रकाणि, रूप्यकाणि च आसन् ।

वृद्धः— वत्स ! महाननर्थः समुपस्थितः । तदपि मा चिन्तय । प्रभुर्बलीयान् ।

दिनेशः—श्रीमन् ! नानर्थः समुपस्थितः, कल्याणमेव समुपस्थितम् । न्यायोपार्जिता लक्ष्मीः स्वामिनमेवानुरज्यते । भवतां तन्मञ्जूषा मम मातुः समीपे सुरक्षिता वर्तते । कृपया तां स्वीकृत्य आवाम् विमुक्तचिन्तौ विदध्यात् ।

प्रवृद्धहर्षः प्रकाशः बालकं तं हस्ताभ्यां समुत्तोलयत् । वृद्धश्च तं बहुतरं प्राशंसत ।

वृद्धः—वत्स ! 'आवाम्' इति कथम् ? किं ते पिता नास्ति ?

दिनेशः—आम् श्रीमन् ! पितृविहीनो निर्धनजननीसहायः श्रमिकपुत्रोऽहम् ।

वृद्धः—(किञ्चिद् विचार्य स्वपुत्रमादिशति) वत्स ! पूर्वं कार्यं साधय ततः करणीयं कर्तव्यम् ।

श्रेष्ठिपुत्रः दिनेशेन सह स्वकारयानस्थस्तस्य रोगाक्रांन्तां मातरमुपगम्य सादरमभिवन्द्य स्वमञ्जूषां सुरक्षिताम् यथावदवाप्नोति, गृहं प्रत्यायाति च ।

श्रमिकभार्या दिनेशश्च निष्कृतभरौ भूत्वा सुखमन्वभवताम् । अन्येद्युः प्रातरेवैकं कारयानमुटजमुपेत्या-तिष्ठत् । तत एकः प्रौढ एकश्चिकित्सकश्च उटजं प्राविशताम् । किमप्यनुक्त्वा चिकित्सकः रोगनिदानं कृत्वा श्रमिकभार्यामौषधमपाययत् । प्रौढः फलानि, दुग्धम्, आहारवस्तूनि च तामुपाहरत् । 'सायंकाले पुनरागमिष्यामि' इत्युक्त्वा तौ द्वौ यथागतौ तथैव प्रत्यगच्छताम् ।

सायंकाले 'थालिया' महाभागः सपुत्रः कारयानेन तत्रागच्छत् । 'थालिया' महाभागस्तौ द्वौ माता पुत्रौ स्वस्थानमनयत् । तत्रैव स्वभवने तयोरावासव्यवस्था कारिता । दिनेशस्यापि च शिक्षायाः सुव्यवस्था कृता ।

गच्छता कालेन दिनेशो विज्ञानस्नातको भूत्वा क्वचित् जीविकोपार्जनाय वृत्तिमवाप्तुं प्रयत्नशीलोऽभवत् । यदा थालियामहाभागेन तद् ज्ञातं तदा तेन दिनेश आहूत उक्तश्च—'वत्स ! कस्यापि सेवकत्वेन अलम् । त्वं स्वयमेव अन्येभ्यो वृत्तिं दातुं क्षमः । सम्प्रति त्वं लक्षत्रयाधिपतिः ।

दिनेशः—श्रीमन् ! भवान् मे अन्नदाता, पालकश्च । यो कोऽप्यहमस्मि तद् भवतामनुग्रहेणैव । तत्कथं भवितुं शक्यते ?'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेष्ठी—वत्स! यस्मिन् दिने त्वया सामञ्जूषा समर्पिता तस्मिन्नेव दिने मया नूतनोद्योगशालोत्पादनलाभाद् द्विप्रतिशतलाभांशः त्वयि न्यासीकृत आसीत्। लाभांशराशिरेव तत् सर्वम्। किमपि स्वकीयं कार्यं प्रारभस्व। यस्मिन् गृहे त्वं मात्रा सह निवससि तदपि त्वदीयमेव। त्वद्धनेनैव तन्निर्मितम्।

एतदाकर्ण्य साश्रुनेत्रः किमप्यनुक्त्वा दिनेशः थालियामहाभागस्य चरणयोः पपात।

धन-मान-प्रतिभासम्पन्नं युवकं दिनेशं विभाव्य कश्चित् सजातीयो धनिको जनः तस्मै स्वपुत्रीं दातुमैच्छत्। सः श्रमिकभार्यामुपेत्य स्वाभिलाषं प्रास्तावीत्। यौतुकरूपेण विपुलं धनमपि दातुम् अकथयत्।

दिनेशोऽपि तत्रासीत्। तेन सर्वं स्पष्टं कथितं यदसौ कस्यापि श्रमिकस्य पुत्रीमुद्वोढुमिच्छति।

यदा श्रमिकभार्या रहस्यमेतद् ज्ञातवती यदयं स एव कृतसमयकः यस्तस्याः पत्युः मरणकाले क्षतिपूरणरूपेण पणकमप्यदत्वा रुदतीं निराश्रितां नाशृणोत् तदा सा अवादीत्-'श्रीमन्! भवान् न मां परिचिनोति न च मे पुत्रम्,' अहम् नानकनामधेयस्य श्रमिकस्य पत्नी यः त्वत्सम्पाद्यमाने निर्माणस्थले ध्वस्तभित्तिभारतले प्राणानत्यजत्। श्रीमन्! अन्यायोपार्जितं वित्तं तत्पालितां च ते कन्यां नाहं स्वीकरिष्ये न च मे पुत्र एव स्वीकरिष्यति। अहं तु कामपि निर्धनश्रमिककन्यामेव स्वपुत्रवधूरूपेण सहर्षं स्वीकरिष्यामि। भवान् गन्तुं शक्नोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रद्धावाँल्लभते विद्याम्

—हरिहरशर्मा अर्याल:
श्रीरामशङ्करसाङ्गवेदविद्यापीठम् कोडरा, पत्रालय:- पोपया,
जनपदम् - कबीरनगरम्-२७२१७५

"महाराजस्योपवने विद्यमानानि रसालफलानि मनो मम समास्वादयितुमिच्छति"।

"परन्तु महाराजोपवनस्थितानाम् आम्रफलानां प्राप्ति: साधारणजनस्य नैव सम्भाव्यते। तत्रापि वयमस्पृश्या:। अस्पृश्याय मातङ्गाय को नाम दास्यति रसभरितानि रसालानि? तानि तु नृपतेराखादनार्थं शाखास्वेव परिणमयितुं सन्ति सुरक्षितानि।"

"यथा तथा वा स्याद्, आम्राणि मे देहि। वृक्षेष्वेव परिपक्वतां गतानि रसालसानि रसालफलानि दर्शं दर्शं लुभ्यति मे चेत:। कथमिव परिणतानि सन्ति? कियन्ति स्वादिष्टानि भविष्यन्ति?"

सकृद् दीर्घमुच्छ्वस्य मातङ्ग आह—"परन्तु प्रिये! इदं कार्यमस्मादृशानां कृते न सुकरम्। अस्पृश्यं मत्वा समाजोऽस्मान् अवहेलयति।"

मातङ्गसङ्गिनी प्रोवाच—"सम्भवत्येतत्। भवानेव कार्यमेतत् कर्तुं प्रभवति।"

"कथमेतत्?" मातङ्गो जिज्ञासां विकासयामास।

"पतिदेव! तां विद्यां जानाति भवान्, यया विद्यया वृक्षस्य शाखानामवनमनम् उन्नमनं वा विधातुं शक्यते। आश्चर्यकारिणी इयमद्भुतविद्या महता पुण्येन साधनया च स्वगुरोरधीता भवता। नहि सा कदाचिदपि प्रयोगमानीता।"

"एतत् त्वस्ति। जानामि तामद्भुतकार्यकारिणीं विद्याम्। निरन्तरं सुचिरसाधनां विदधानोऽहमेनां पूर्णतया साधयितुं प्राभूवम्।"

"तर्हि तद्विद्याया: चमत्कारं किमिति न प्रदर्शयति प्राणप्रिय: स्वप्रियायै?" मातङ्गी विविधरीत्या मुहुर्मुहुराग्रहं चकार।

"अस्तु, इयानाग्रह: ते चेद् महाराजस्याऽऽरक्षिजनसुरक्षिततात् तस्मादुपवनादाम्रफलानाम् आनयनाय युक्तिं कामपि चिन्तयिष्यामि" स प्रेयसीमाश्वासयामास।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्या अल्पीयस्या याचनायाः पूर्तये मातङ्ग एकस्यां रात्रौ भूपतेः कृत्रिमवनं तत् प्रविवेश मौनमाकलय्य वृक्षान् अधोऽधो गत्वाऽद्भुतविद्यां स्वामुपयुज्य अवलोकितवान् । स तदानीं भृशमभूद् विस्मितः, यदा समुन्नताः शाखाः स्वयमेव नम्रीभूय तदन्तिकं समागताः। विद्यायाः सिद्धया, कार्यस्य साफल्येन चाऽऽनन्दसागरविहरणपरायणः स आम्रफलानि संगृह्य महाराजस्याऽऽरामात् तस्माद् बहिराजगाम ।

एतावति समये नोदपद्यत मनागपि कुत्रापि कोऽपि ध्वनिः ।

अपरस्मिन् दिवसे भूपतेरुद्यानपालेन निभालितं यदाम्रफलानि केनचिदपहृतानि अभूवन्निति । तस्य प्राणाः शुष्कतां प्राप्ताः । नाशक्नोत् सोऽवगन्तुं यत् केन वञ्चकेन विनैव ध्वनिं कथमिव राजकीयादुद्यानाद् रसालफलानाम् अपहरणदुःसाहसमनुष्ठितमिति ।

भृशं विस्मितः श्रुतवृत्तान्तः सकलो लोकः । अखिलेऽपि राज्ये बभूव स्तेयस्यास्य चर्चा प्रचारिता ।

महाराजमहिष्या मनः तेभ्य आम्रफलेभ्यो भृशं स्म स्पृहयति । यदा सा फलानां तेषामपहरणं शुश्राव तदाऽत्यर्थं चुकोप । महाराजोऽपि भृशमखिद्यत । उद्यानपालोऽसौ मालाकारः पृथिवीपतिना दण्डितः । सर्वे चकिताः चिन्तिताः सञ्जाताः ।

राजमहिष्याः सुदृढ आग्रह आसीद् यत् केनाप्युपायेन चौरो निग्रहीतव्य इति । महाराजस्य विश्वासपात्रं बुद्धिमानेको गुप्तचर आसीद् विजयो नाम । महाराजः तमादिदेश—"चारप्रवर ! अनेकेषां जटिलतमस्तेयानां रहस्यं प्रकाशितं त्वया प्राक् । अथाधुनापि दत्तचित्तेन त्वया चौर्यस्यास्य सङ्केतोऽन्वेषणीयः । त्वरया त्वमस्मिन् कार्ये संलग्नो भव" इति ।

"यदाज्ञापयति देवः" इति कथयित्वा राजादेशं शिरसा स्वीकृत्य विजयोऽभूत् तस्मिन् गवेषणकार्ये संलग्नः । चौरनिग्रहे तस्य साहाय्यं विधातुमुत्सुका बभूवुः सर्वे ।

स रात्रौ परिवर्तितवेषः प्रतिगृहं गच्छन्, प्रतिपरिवारं जनानां वार्तां कर्णे कुर्वन् भ्रमति स्म सर्वदा सर्वत्र ।

एकदा मातङ्गगृहस्य पृष्ठदेशाद् व्रजता विजयेन गृहस्याभ्यन्तरालाद् निर्गच्छन् वार्ताध्वनिः श्रुतः । तत्रायमभूद् वार्तालापः ।

"पतिदेव ! राजोद्यानरसालफलानि खल्वतीव मधुराण्यासन् । तेषां स्वादोऽद्यापि मे जिह्वायां विद्यत इव । अनुगृहीताऽस्मि, कृतज्ञाऽस्मि । अमर किल भवदीयं प्रेम ।"

"आम्, इदं कार्यं मया विशिष्टविद्याबलेनैव साधितम् । अन्यथा राजोद्यानाद् रसालफलापहरणे को नाम साहसं करिष्यति ?"

एतावदेव श्रुत्वा विजयो मातङ्गं निगृहीतवान् । सज्जनेन तेन स्वकीयोऽपराधः स्वीकृतः । तस्या अद्भुतविद्यायाः प्रभावोऽपि वर्णितः । तं गृहीत्वा विजयो राजभवनं ययौ । आदौ महामन्त्री तेन सूचितः । ततः सर्वे ते राजसभामुपेयुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसालफलचौरोऽयमेवास्तीति विज्ञाय भूपतिर्भृशं चुक्रोध । क्रोधो हि विषधरो महाहिः । तेन ग्रस्तो जनो विगतविवेको भवति । क्रोधोनान्धो राजा जगर्ज—"मदीय उद्याने चौर्यं कर्तुं साहसी त्वं कथमभूः ? मातङ्गाधम ! त्वामहं महत्तमदण्डेन दण्डयिष्यामि" इति ।

शान्तप्रकृतिः सुदूरदर्शी महामन्त्री महाराजं जगाद—"राजन् ! प्रथमं भवान् वृक्षशाखानाम् अवनमनोन्नमनसमर्थां तामद्भुतविद्यां मातङ्गादस्मात् शिक्षताम् । ततः स्वैरं मातङ्गं दण्डयतु । विद्या हि महन्महत्त्वपूर्णं वस्तु । विद्यावानेव गुरुः । अतो निम्नजातेरपि विद्याप्राप्तौ सङ्कोचो नैव विधेयः ।" इति ।

एतदाकर्ण्य राजा व्यचारयत्—"मन्त्रिणः सम्मतिः समीचीनाऽस्ति । कस्यचित् पार्श्वे काचिद् विद्याऽस्ति, सद्वस्त्वस्ति वा, तर्हि तदवश्यं ग्रहीतव्यम् । विद्यया समादरो लभ्यते । विद्वत्ता भूपता चेत्युभयोः विद्वत्तैव विशिष्यते । राजा स्वदेशे केवलमाद्रियते, विद्यावान् विद्वांस्तु देशे विदेशे सर्वत्राऽऽद्रियते । विद्या हि सर्वेषां कल्याणानामाधारभूमिः । विद्यया लोकपरलोकौ, स्वार्थपरमार्थौ च सिद्ध्यतः । विद्यया सामाजिकव्यवहारसाफल्यं चाधिगम्यते" इति ।

राज्ञा मातङ्गः स गुरुत्वेन स्वीकृतः । आमन्त्रितश्च । मातङ्गं स भूमावुपावेशयत् । स्वयं च राजकीयासनमध्यतिष्ठत् । ततो मन्त्र शिक्षणं प्रारेभे ।

परन्तु किमिदम् ? मातङ्गो मन्त्रमश्रावयत्, पुनः पुनरावृत्त्या समपाठयत्, अर्थं व्याख्याय समबोधयत्, परन्तु तत् सर्वं नैवाऽऽरोहद् राज्ञः स्मृतौ । मतिमानपि, असाधारणोऽपि, अनेकाग्रमनस्तया राजा न शशाक तं मन्त्रमध्येतुम् । तं साधारणमपि मन्त्रं नैव जग्राह तदीयं मनः ।

महामात्येन पुनरपि राजा सम्प्रार्थितः । "राजन् ! गुरौ श्रद्धावानेव जनो विद्यां लभते । सेवया, निष्ठया, विनयेन च विद्या गृह्यते । सरितां प्रवाहवद् विद्या निम्नगा भवति । उन्नतासने विराजमानाद् गुरोरधस्ताद् सविनयमुपविष्टस्य विद्यार्थिनो मनसि विद्या सम्यगवतरति । गुरौ श्रद्धावान्, आस्थावान्, विश्वासवानेव विद्वान् भवति" इति ।

रहस्यं बुबोध राजा । स सिंहासनात् सद्य एवावततार । सङ्कोचपरवशं तं मातङ्गं साग्रहं सिंहासनमारोपयामास । स्वयं च भूमावुपविवेश । मन्त्रं पुनरुपदेष्टुं चानुरुरोध ।

चित्रम् ! महच्चित्रम् ! !

इत्थङ्कारमनेन विनयस्वीकारेण सा मन्त्रविद्या सपद्येव भूमिपतेः स्मृतिभूमिमारूढा, सुस्थिरीभूता च तत्राभूत् ।

तदा गुरुप्रदत्तं ज्ञानं सरलतया तदीये मनसि प्रविष्टम् ।

राज्ञो विनयि मनो गुरुनिष्ठया परिपूर्णमभूत् । तस्माद् दिनादारभ्य गुणशालिनं तं मातङ्गं गुरुसमादरेण सममानयद् भूपतिः सः । फलस्तेयस्य हेतोर्नृपस्तं नैवाऽदण्डयत् ।

गुरौ श्रद्धया विना, सम्मानभावनया च विना विद्या नैव लब्धुं शक्या ।
गुरौ श्रद्धावानेव विद्यावान् भवति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेमराशी भवन्ति

—आचार्यश्चन्द्रभानुः त्रिपाठी
एम. ए. डी. फिल् व्याकरण-साहित्याचार्यः
३४ बलरामपुर हाउसः इलाहाबाद नगरम्-२७१००२ उ० प्र०

अद्य वाराणसीहिन्दूविश्वविद्यालयीय-स्नातकपरीक्षाम् उत्तीर्णवतां छात्राणां श्रेष्ठताक्रमः प्रकाश्यमानोऽभवत्, इति हेतोः अनेके बुद्धिमन्तोऽध्ययनशीलाश्छात्राः विश्वविद्यालयस्य परीक्षाकार्यालये समवेताः अभूवन्। सूचना पट्टके श्रेष्ठताक्रमे द्वे नामनी युगपत् प्रथमस्थाने मुद्रिते दृष्टे, विज्ञानवर्गे मङ्गला, कलावर्गे चारुचन्द्रश्च। तदनन्तरम् अन्येषामपि छात्राणां नामान्यासन्। सर्वे छात्राः प्रथमयोस्तयोर्भाग्यं श्लाघमानाः यथागतं गतवन्तः। स्मेराननौ मङ्गलाचारुचन्द्रावपि सर्वेषामभिनन्दनं स्वीकुर्वन्तौ क्षणानन्तरं ततः स्वं स्वं गृहं, प्रत्यावर्तताम्। मङ्गला द्वारदेशस्थं एव कारयानमारुह्य प्रत्यावर्तनपरा चारुचन्द्रे सकृद् दृष्टिमपातयत्।

चारुचन्द्रोऽपि प्रसन्नमनाः स्वां पादगन्त्रीमारुह्य स्वं गृहं प्रति प्रस्थितः।

द्वितीयेऽह्नि प्रातः संवादपत्रेषु तयोश्चित्रफलके परिचयेन सह प्रकाशिते जाते। तेन ज्ञातं यन्मङ्गला वाराणसेयस्य श्रेष्ठिनः सुभद्रगुप्तस्यात्मजा तथा चारुचन्द्रोऽत्रैव नगरे दूरभाषायुक्तकार्यालये लिपिकारपदमधिष्ठितस्य सुकुमारदासगुप्तस्यात्मजोऽस्ति। मङ्गला वैदेशिकविश्वविद्यालयेषु शिक्षार्थिचयनस्पर्धायां प्रार्थिनी वर्तते तथा चारुचन्द्रो वाराणसीहिन्दूविश्वविद्यालये, प्राचीनेतिहासविषये स्नातकोत्तरप्रथमकक्षायां प्रवेशमलभत।

दैवयोगेन सुकुमारदासः सुभद्रगुप्तस्यैव समीपवर्तिन्येकस्मिन् गृहे भाटकदाता भूत्वा समुपागतः। एकदा मङ्गला चारुचन्द्रं गच्छन्तं दृष्ट्वा तञ्च स्वमिव प्रथमस्थानभाजं परिभाव्य अपृच्छत् अये! चारुचन्द्रस्त्वं ननु?

चारुः—अथ किम्, त्वमपि मङ्गलाऽसि दृष्टपूर्वा विश्वविद्यालयस्य परीक्षा कार्यालये। अभिनन्दामि त्वदीयं सारस्वतं वैभवम्।

मङ्गला—अहमपि तव वैशारद्यं समाद्रिये। किं वाराणसेयस्त्वम्?

चारुः—नाहं वाराणसेयः। अभिजनोऽस्ति मे वङ्गदेशः। राजकीयसेवया वृत्तिं निर्वहन्तो जनाः यायावराः भवन्ति। सम्प्रति मम मातृकुलं माथुरं, पितृकुलञ्च मागधम् अस्ति। मम पिता केन्द्रीयदूरभाषकार्यालये लिपिकारः। मम जन्म देहरादूननगरेऽभवत्। स्थानपरिवर्तननियमेन त्रिचतुरेषु नगरेषु परिभ्रमन् शिक्षमाणश्चाभूवम्। अत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाराणस्यां वर्तमानस्य मम वर्षत्रयाधिकः कालो जातः । इतः कदा कुत्र यास्यामीति न जाने । अथ तवापि परिचयं विशेषेण ज्ञातुमिच्छामि ।

मङ्गला—मित्र ! इयं काशी एव मम जन्मभूमिः । परः शतवर्षेभ्यः प्राक् मम पूर्वजाः काशीमागत्य दुकूलशाटिकाव्यवसायं प्रारभन्त, तमेव मम पिताप्यनुतिष्ठति । मया संस्कृतभाषा तु गृहे एव गुरुभ्यः समधीता, माध्यमिकविद्यालये विश्वविद्यालये च विज्ञानविषयाणां ज्ञानं कृतम् । विशेषतः कम्प्यूटर-विज्ञाने मम रुचिम् अभिलक्ष्य मम पितरौ माम् अध्ययनार्थं विदेशेषु प्रेषितुं, प्रयतमानौ स्तः । अत एव न मया विश्वविद्यालये प्रवेशायाऽऽवेदनं कृतम् । अथ त्वया कस्मिन् विषये प्रवेशो लब्धः ?

चारुः—सखि मङ्गले ! अहं सम्प्रति विश्वविद्यालये प्राचीनेतिहासविषये स्नातकोत्तर-प्रथमकक्षायाश्छात्रोऽस्मि । अहं विदेशेष्वध्येष्यमाणायास्तवानामयं कामये । इदानीमनुजानीहि माम् ।

मङ्गला—चारो ! अत्र तव पित्रा क्व वासो विहितः ?

चारुः—त्वद् गृहम् उत्तरेणास्यामेव वीथिकायाम् इतो नाति दूरं गणपतिसाहुश्रेष्ठिनः सद्मनो द्वितीयतले मम निवासो वर्तते ।

मङ्गला—शोभनम्, तत्तु मम मातृष्वसुरेव गेहम् । यदा-कदा तत्राहं गच्छामि । एहि तावन्ममातिथ्यं प्रातराशपूर्वकं स्वीकुरु ।

चारुः—अद्य क्षमस्व, ह्य एवागताः वयमस्मिन् गृहे । अतस्तत्र यथोचितं वस्तुविन्यासः कार्यः । तवानुरोधस्तु न्यासरूपेण वर्तते मयि ।

मङ्गला—गच्छ तर्हि, परं न्यासस्य प्रत्यर्पणं शीघ्रं कर्तव्यम् ।

कतिपयदिवसानन्तरं मङ्गलायाः शिक्षणसंस्तुतिः उत्तरामेरिकादेशे पेन्सिलवानिया (फ़िलाडेल्फ़िया) विश्वविद्यालये स्वीकृता । तदनन्तरं तत्र प्रवासार्थमावश्यकं पत्रजातं प्राप्तम, गमनस्य श्वो दिवसोऽपि निश्चितः । मङ्गला स्वमातृष्वसुर्गृहे सर्वान् इष्टबन्धून सम्मिलितुं गतवती । तत्रोपरितले चारुचन्द्रम् आकारयन्ती प्राह—अये ! चारुचन्द्रोऽत्र वर्तते किम् ? चारुमाता तां मधुराकृतिं मङ्गलां दृष्ट्वा प्राह—जाते ! राजमार्गे पश्य चारुः समागच्छति विश्वविद्यालयात् । क्षणानन्तरं चारुः आगत्य स्वगृहे वर्तमानां मङ्गलां दृष्ट्वा ससम्भ्रमम् अवदत् अये ! मङ्गला, मातः ! दीयतामस्यै किमप्यशितव्यम् । इयमपि विज्ञानस्नातकपरीक्षोत्तीर्णवतां मध्ये ऐषमो वर्षे प्रथमस्थानम् अधिगतवती ।

माता ताभ्यामुभाभ्यां मिष्टान्नम् अददात्, मङ्गला चाकथयत् 'अहम् उत्तरामेरिकादेशे पेन्सिल्वानिया-विश्वविद्यालये कम्प्यूटरविज्ञानविषये विशिष्टाध्ययनाय श्वः प्रस्थाताऽस्मि, अतस्तत्रभवत्या आशीर्वादं ग्रहीतुं चारोश्चाभ्युदयं व्याहर्तुमत्र समागताऽस्मि । चारो ! श्वोऽहं क्रमशो दूरदर्शना भवितास्मि, अतः स्वल्पपरिचयाऽपि यदाकदाऽवकाशक्षणेषु संस्मरणीया स्यामित्यभ्यर्थये ।

चारुः—ननु स्वल्पपरिचयोऽपि ते हृदयङ्गमो जातः, अतस्तव स्मृतिः उत्कण्ठाक्षणेषु विनोदयिष्यति माम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चारुमाता—जाते ! विशिष्टबोधिनी कुशलिनी त्वं शीघ्रमेव स्वदेशं परावर्तस्व, इति पार्वतीपरमेश्वरौ प्रार्थये । गच्छ सिद्धये ।

(मङ्गला मातरं प्रणम्य चारुचन्द्रं स्निग्धदृशा पश्यन्ती गच्छति ।)

कालोऽनवरतगतिर्भवति । वाराणस्यां चारुचन्द्रः क्रमेण स्नातकोत्तरपरीक्षामुत्तीर्य शोधकार्ये भारतसंघराजकीयसेवापरीक्षासु च साफल्यावाप्तये परिश्रमेणाध्ययनपरो वर्तते तथा मङ्गलाऽपि विशिष्टाध्ययने शोधकार्ये च दत्तचित्ताऽस्ति । प्रायः मासत्रयाभ्यन्तरे मङ्गलाया इतिवृत्तपत्रम् आयाति, चारुरपि तथैव तदुत्तरं प्रेषयति । क्रमशः पत्रे कुशल-कथनपूर्वकं हृदयभावाभिव्यक्तिरपि लब्धस्थानाऽभवत् । अस्मिन् पत्राचारक्रमे उभयोरपि उत्तरोत्तरं वर्धमाना स्नेहसरणिः सप्तपदीव जाता ।

अद्य सप्तमं पत्रमायातम्, तस्मिन् पत्रे समाप्तौ पद्यपङ्क्तिद्वयी उल्लिखिताऽसीत् । कालिदासीय-शकुन्तलायाः प्रीतिपत्रस्य भावानुवादरूपैव प्रतीता सा प्रभावोत्पादिकाऽभूत् ।

उत्कण्ठित हूँ तुम्हें देखने, तुमसे मिलने को जी भर,
तुम कैसे हो ? नहीं जानती, पर मैं तपती रहती हूँ ।

पद्यमिदं पठित्वा चारुश्चिन्ताकुलो जातः । तदीयम् अध्ययनोन्मुखं मनः ततो विमुखमभवत् । पठितपूर्वः पण्डितराजस्य श्लोकोऽयं तस्य स्मृतिपथमायातस्तन्मनस्तापं बहुगुणं व्यदधात्—

निर्दूषणा गुणवती रसभावपूर्णा सालङ्कृतिः श्रवणकोमलवर्णराजिः ।
सा मामकीनकवितेव मनोऽभिरामा रामा कदापि हृदयान्मम नापयाति ॥

स रात्रौ मङ्गलायाः पत्रस्योत्तरमलिखत् । स्वकुशलवृत्तपुरस्सरम् प्रणयनिवेदनान्तम् पत्रं लिखित्वा समाप्तेः पूर्वं तदेव श्लोकोत्तरार्धं मध्यम पुरुषीये कर्तृ-क्रियापदे परिवर्त्य लिखितवान्—

त्वं तावकीनकवितेव मनोभिरामा रामा कदापि हृदयान्मम नापयासि ।

रात्रौ बहुकालं जागरणेन किञ्चिन्म्लानमुख एवातिशीघ्रं नित्यकर्म विधाय विश्वविद्यालयं गतवान् । दैवयोगेन मङ्गलायाः तस्य च पत्रद्वयं तत्रैव शयनीये विस्मृतं दृष्टिपथे च पतितं पित्रोः । तद् वाचयित्वा तयोरुभयोरेष संवादः प्रचलितः—

माता— इतो गमनात्प्राक् मङ्गला मम गेहमागता, चारुणा सह तस्याः संलापोऽप्यभूत् परं न मयोभयोः कोऽपि मनोभावो लक्षितः ।

पिता—आम्, परं विदेशेषु अस्माकं देशाद् भिन्नैव संस्कृतिर्वर्तते । तस्याः प्रभावेणोन्मुक्तकामकलया भवितव्यं मङ्गलया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माता—स्यादेवम्, परं मम चारुस्तु सुतरां चारुचरितः। स मातापित्रोरनुमतिं विनैवेदृक् स्वेच्छाचारी भविष्यतीत्यत्र नासीन्मम विश्वासः।

पिता—एष वयसः प्रभावः। सरितोऽपि वर्षासमये कूलङ्कषाः कथ्यन्ते, तरवोऽपि कोमलकिसलय-भूषिताः सन्तो लताऽऽलिङ्गनेन स्वमनस्तापं विहातुं विहर्तुं च ताभिः सहोत्सुकाः भवन्ति। इदानीमावाभ्यामुभयोः कल्याणाय प्रयतितव्यम्।

माता—मम मतौ पत्रद्वयमेव क्वचिन्निक्षेप्तव्यम्। येन पत्रोत्तराप्राप्त्या चारुम् उदासीनमालक्ष्य मङ्गलाऽपि जोषं तिष्ठेत्।

पिता—उपायस्तु समीचीनः, परं पत्रावृत्तिरपि भवितुमर्हति। चारुरप्यत्र पत्रद्वयमप्राप्य, आवयोरभिप्रायं संलक्ष्य किमप्यन्यथा अनीप्सितञ्चाचरेत्। यौवनमारूढोऽयम्, मङ्गलाऽपि तथैव संवृत्ता। एवमुभावपि कामस्य शरव्यौ सञ्जातौ।

माता—सत्यमाह भवान्, आवाभ्यां तथा कर्तव्यम् येनोभावपि वस्तुतत्त्वं विज्ञाय सदाचरताम्।

पिता—अथ किम्, कामोऽपि तृतीयः पुरुषार्थः। वेदविद्भिरुक्तम्—

कामो दाता कामःप्रतिग्रहीता कामस्यैतत् सर्वमिति।

माता—तेन समीचीन उपायश्चिन्तनीयः, यथा द्वावपीमौ प्रेमपथिकौ स्वं कर्तव्यं ज्ञात्वा तत्परायणौ भवेताम्।

तदानीमेव राजमार्गे विश्वविद्यालयादागच्छन्तं चारुं दृष्ट्वा पितरौ तस्य कक्षाद् बहिर्गतौ।

चारुचन्द्रः समागत्य पत्रद्वयमन्वेष्टुं प्रवृत्तः। माता तदानीमेवागत्य तं नियतकालात् पूर्वम् आगमनस्य कारणम् अपृच्छत्।

चारुः—मातः! अद्य प्रातःकालादेव मम शिरोव्यथाऽनुभूता, विश्वविद्यालये सा वर्धमाना जाता, अतः न तत्र स्थातुमपारयम्। मातः! अत्र शयनीये पत्रद्वयं निक्षिप्तमासीत्, तन्न दृश्यते सम्प्रति।

माता—वत्स! अहं ते पितरं शब्दापयामि भवेन्नाम सोऽभिज्ञः तस्य पत्रद्वयस्य।

तदानीमेव तस्य पिता समागत्याकथयत्—

चारो! तवोपधानस्याधस्तात् तत्पत्रद्वयं सुरक्षितम् मया। पुत्र! तथा कुर्वाणस्य ममानीप्सितमपि दृग्गोचरं जातम् मङ्गलायाः पत्रमं सम्यगपठित्वाऽपि पत्रस्याभिप्रायस्तु लक्षित एव। तेन तव पत्रेऽपठितेऽपि सुव्यक्तः आलेख्यसारः। नूनम् ईदृश्य एव चेष्टाः स्वभावतो भवन्ति यूनाम्। नास्ति कोऽप्यपराधो युवयोः, न चास्ति मम कोपस्त्वयि वत्स!

चारुः तूष्णीम् आस्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माता—शृणु पुत्र ! भगवत्कृपया प्रतिभावांस्त्वं सम्प्रति स्नातकोत्तरपरीक्षामुत्तीर्य शोधकार्ये संलग्नः सन् भारतीय संघ-राजकीयसेवापरीक्षासु साफल्यावाप्तये प्रयत्नपरायणो वर्तसे। एतदनन्तरं यत्त्वं वाञ्छसि, तत्रैवावयोरनुमतिर्भविष्यति।

चारुः—पितरौ ! सत्यं वदामि। पूर्वं मङ्गला स्वकीये पत्रे मयि स्वीयं स्नेहं प्रादर्शयत्। अहं प्रयतमानोऽपि तया समर्पितं मनो न्यक्कर्तुं न पारये।

पिता—ममाप्यस्ति तत्रैवाभिनिवेशः। केवलम् अधीतविद्ययोः व्यवस्थितजीविकयोः युवयोः सम्बन्धं समीहे। अतः समादृत्य तस्याःप्रस्तावम्, आवयोरपि समर्थनम् उल्लिख्य पत्रान्ते महाकवि कालिदासीयमेघदूत काव्यस्येदं श्लोकोत्तरार्धम् उद्धरणीयम्—

स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्व भोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥

नूनं सुवंशोद्भवा सद्वृत्ता सापि तं शुभावसरं प्रतीक्षमाणा कर्तव्यपरायणैव स्थास्यति।

चारुचन्द्रेण तथैव कृतम्। तदनन्तरं तयोः पत्राचारो विश्रान्तः।

प्रायः एकवर्षाभ्यधिकः समयो व्यतीतः चारुचन्द्रो भारतसङ्घसेवापरीक्षायां सफलो घोषितः। द्वितीये दिने प्रातरेव, मङ्गलायाः पिता श्रीमान् सुभद्रगुप्तः पत्रेणैकेन सह चारुचन्द्रस्य गेहं समागतवान। स चारोः साफल्ये तमाशीर्भिर्वर्धयन् तत्पितरौ च सभाजयन् सुकुमारस्य हस्ते मङ्गलायाः पत्रं व्यतरत्। स तत्पत्रं पठित्वा ज्ञातवान् यन्मङ्गला स्वशोधकार्यं समाप्य विद्यावारिधिपदव्यालङ्कृता सती श्वो वाराणसीं समासीदति। तस्याः नियुक्तिः भारतीय-कम्प्यूटर-प्रशिक्षण-केन्द्रे वाराणस्यामेव अधीक्षकपदे सञ्जाता। पित्रोस्तदानीन्तन उपदेशः श्रेयस्करः सिद्धः। सा श्रद्धया पितरौ प्रीत्या च चारुं प्रतीक्षते।

यथाकालं सा समायाता। श्रीमन्तौ सुभद्रसुकुमारौ सकुटुम्बिजनौ वायुयानस्थितिप्रतीक्षालये वात्सल्येन स्नेहेन च तामभ्यनन्दयताम्। चारुस्तस्मै स्वागतमब्रवीत्, मङ्गला च मनसा तमालिङ्ग्य वचसा च तम् सभाजितवती। उभावपि पूर्वं सुभद्रगुप्तस्य गृहमगच्छताम्। तत्र सुचिरं विलम्ब्य पितृभ्यां सह स्वं गृहं गच्छन् चारुः मङ्गलां पृष्टवान् मङ्गले ! कदा त्वं मम गेहम् आयास्यसि ?

'यदाऽऽवयोः पितरौ एषिष्यतः।' इत्युत्तरमासीन्मङ्गलायाः

130431

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवितव्यता

—श्रीबाबूरामः अवस्थी
वाजपेयी कालोनी, लखीमपुरं, खीरी उ० प्र०-२७२७०१

परशुपुरस्थः पूर्णचन्द्रमाध्यमिकविद्यालयः प्रेमपुरात् प्रायेण पञ्च किलोमीटरमितदूर आसीत्। एष विद्यालयो ग्रामीणक्षेत्रे तस्मिन्नेक एवासीत्। तत्र बहवश्छात्राः पठनार्थं दूरदूराद् यान्त्यायान्ति स्म। दूरस्थाश्छात्रा अधिकसंख्यका द्विचक्रिकायानेन गच्छन्ति स्म, यतोहि युगेऽस्मिन् सामान्यजनानां कृत इदमेवानर्घं सुलभमुपयोगि च वाहनमस्ति। गमनागमनयोः साधनस्यातिरिक्तं द्विचक्रिका महद्भारं वोढुं सक्षमास्ति। व्यवसायिभिर्वाहनेऽस्मिन्नन्नवस्त्रशाक-पात्र-शृङ्गारसाधनादीनि विक्रेयवस्तून्यारोप्य देशाद् देशान्तरं नीयन्ते। छात्रैस्तु विद्याध्ययनाय विद्यालयं गन्तुमिदमेवोपयुज्यते। प्रेमपुरवासिनः कतिपयबालका अपि पठनाय द्विचक्रिकावाहनैस्तं विद्यालयमगमन्। तेषु दीनबन्धोः पुत्रः सुखदेवोऽप्येक आसीत्।

सुखदेवः स्वपित्रोरेक एव तनयो जातः। महता प्रयासेन देवतानां पूजनेन मान्यताभिश्च बह्वीभिः कथमपि सुतमुखदर्शनमभूत्। तज्जन्मना पित्रोरतिशयसुखप्राप्तेः 'सुखदेव' इति तन्नामधेयं कृतम्। प्रेम्णा पालनेन पोषणेन च स बालो दिने दिनेऽवर्धत। स वर्णेन गौर आकृत्या सुन्दरः स्वभावेन सरलश्चासीत्। बालकैः सह क्रीडन्तं कलमधुरं वदन्तं बह्वीर्बालचेष्टाः कुर्वन्तं तं दर्शं दर्शं मातापितरावपारसुखमन्वभूताम्, किन्तु तौ ततः प्रभृति तद्विषये सशङ्कावास्ताम्, यदा स वयस्यैः सह स्नातुं गतः सरोवरजले मग्नो ग्रामवासिभी रक्षितः। अपरं चैकदा यदा स बालस्वभावतया जम्बूफलानि त्रोटयितुं वृक्षमारूढः शाखाभङ्गात्पतितो रक्षितो दैवेन। एवं विधानाघातान् विलोक्य चिन्तितो दीनबन्धुर्गणकमाहूय ग्रहदशामप्राक्षीत्, पण्डितैस्तान्त्रिकैश्च ग्रहशान्त्युपायानकार्षीत्। एवं संवर्ध्यमानः सुखदेवो ग्रामस्य पाठशालायां पञ्चमीं कक्षामुत्तीर्य परशुपुरे पूर्णचन्द्रविद्यालये षष्ठकक्षायां प्रवेशितः।

यद्यपि बालकस्य पञ्चकिलोमीटर दूरे प्रेषणं पित्रोरभीष्टं नासीत् तथापि शिक्षाया अनिवार्यत्वात्प्रेषितवन्तौ। तदर्थं चैकां द्विचक्रिकां सहस्रमुद्राव्ययेन पिता क्रीतवान्? तामारुह्य सुखदेवः प्रतिदिनं वयस्यैः सह सोत्साहं गच्छति स्म। स च मार्गः प्रातः कालात् सायंकालं यावद् यातायातयुतोऽभवन्निरापदश्च किन्तु यदाऽन्धकारः प्रसरति तदा तन्निकटे वसतेरभावाच्चौरदस्युलुण्टकभयाज्जना नैव चलन्ति स्म। प्रायस्तस्मिन् मार्गे लुण्ठनापहरणताडनादिदुर्घटना अश्रूयन्त। प्रेमपुरस्था इमे बालकाः सार्धनववादनसमये प्रातः सहैवागच्छन् सार्धचतुर्वादनकालेऽपराह्णे स्वगृहं प्रत्यागच्छन्। प्रतिदिनमेवैष नियमः प्राचलत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ गच्छत्सु दिनेषु मासेषु वर्षेष्वष्टमकक्षायामधीतवति सुखदेवे चैकदा प्रावृषिकं मेघमण्डलमाच्छाद्य गगनं प्रातरेव मन्दं मन्दं वर्षितुमारब्धम्। वर्षामाशङ्क्यान्ये बालका विद्यालयं न गताः किन्तु सुखदेवो निवारितोऽपि मात्रा "कापि महतीवृष्टिर्नास्ति" इत्युक्त्वा पुस्तकान्यादायारुह्य द्विचक्रिकां शीतलेन पवनेन समालिङ्गितशरीरो लघुलघुजलबिन्दुभिरभिषिच्च्यमानशिरःस्कन्धहस्ताद्यवयवः प्रमुदित-मनसा किमप्यस्फुटं मन्दं मन्दं गायन् द्रुततरं च वाहनं वहन् प्रचलितः विद्यालये चादिवसं पठित्वा चतुर्वादनेऽवकाशघटिकानादं निशम्य त्वरितमेव "वर्षणात् पूर्वमेव गृहं प्राप्नुयाम्", इति चिन्तयन् प्रस्थितः।

अथ यावद् ग्राममतिक्रम्य स्तोकं याति तावन्मार्गे वर्षा व्यजृम्भत वायुर्वेगेनाऽवाद् विद्युच्च व्यद्योतिष्ट इत्थं वर्षाधिक्यं विलोक्य सुखदेवो मार्गे निकटस्थ एकस्मिंस्तरुतले छायायां सघनायां द्विचक्रिकां संस्थाप्यातिष्ठत्। "अधुना वर्षेयं विरमति" "इदानीं विरमति" "सम्प्रति विरमति" इति प्रतीक्षमाण एव सार्धद्वयघण्टासमयमनैषीत्। ततः प्रकृतेर्महिम्ना क्षणमेव मन्दीभूते प्रवर्षणे सुखदेवो द्विचक्रिकामारुह्य यावत् किञ्चिदध्वानं गच्छति तावन्मध्यमार्गे स्थितं पशुद्वयमवलोकयति। "कुक्कुराविमौ" इति प्रथममाशङ्क्य पश्चान्निपुणं निरीक्ष्यमाणो "वृकाविमौ न कुक्करौ" इति निश्चित्यावतरितः। तेन पूर्वं श्रुतमासीद् वार्ताप्रसङ्गे जनैः कथ्यमानमेतद् यद् वृका हिंसका भवन्ति, ते मेषानजान् बालकांश्चाक्रम्योत्थाय नयन्ति भक्षयन्ति च। ते पूर्वमेव योजनां निर्माय मृगयां कुर्वन्तीत्यादि विचिन्त्य बालस्वभावाद् भयकम्पितकलेवरः स्वेदार्द्रावयवो धग्धगितिप्रस्फुरितहृदय आत्मरक्षार्थं प्रतीपं पलायितुं कृतनिश्चयो द्विचक्रिकां व्यावर्तयत्। किन्तु हा। किमिदम्! उतोऽपि मार्गे स्थितं चमत्कृतलोचनं बहिर्निष्कासितदीर्घदन्तं लम्बमानपुच्छं निर्निमेषदृष्ट्यापश्यन्तमपरं वृकयुगलं वर्तते। अग्रे पृष्ठे चोभयतो वृकान्विलोक्य प्राणविपत्तिं मन्वानः प्रत्युत्पन्नमत्या वामे वृक्षमेकमारुह्य शाखायामवस्थितः। मांसलोलुपा लालाक्लिन्नमुखास्ते वृका धावित्वा तं वृक्षं पर्यवारिषु उर्ध्वानना बालकं पश्यन्तो भोजनाशया तत्रैवोपतस्थुश्च।

एवं गतासु कालकलासु निशायाम् एकादशवादनसमयः सञ्जातः। शनैः शनैस्तमिस्रा घनीभूता। सर्वतः शून्यतायाः साम्राज्यमिव स्थापितम्। सहसा सुखदेवः पुरुषाणां सम्भाषणशब्दमश्रौषीत्। त्रयः पुरुषाः मार्गे परस्परं वार्तालापं कुर्वन्ति।

तत्रैकः— अहोः इयं कस्यापि द्विचक्रिका भूमौ पतिता वर्तते।

अपरः—अद्य शोभना रात्रिरस्माकं, निमित्तं चानुकूलं पश्यामि। यतोऽनायासेनैव सहस्रमुद्रामूल्यं वस्तु समासादितम्। अन्योऽवदत् नूनमस्याः स्वाम्यप्यत्रैव क्वचिदन्तरितो भविष्यति। यदि स मिलेत् तर्हि तं लुण्टित्वा पर्याप्तं धनं लभेमेति वार्तालापं निशम्य सुखदेव आशयेनोच्चैरब्रवीत्—हे हे भ्रातरः। रक्ष रक्ष मामेभिवृकैः परीतम्। अहमत्र वृक्षस्य शाखायमवस्थितोऽस्मि" इति करुणां वाचमाकर्ण्य ते पुरुषाः स्वकीयान् कुन्तानुत्थाय "मा भैषीः" इत्याश्वासयन्तः कोलाहलं च कुर्वन्तस्तदभिमुखमधाविषुः। कोलाहलाद् भीतास्ते वृका उत्थाय सत्वरं पलायिताः। पुरुषाश्च ते तरुतलं प्राप्य सुखदेवमवतार्य किमेतदित्यप्राक्षुः, स च यथावृत्तं सर्वं वृतान्तं तेषामग्रे न्यवेदयत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुत्वा च ते वत्स ! भयं मा कुरु । वयं त्वां तव गृहं प्रापयिष्याम: इत्थं स्नेहेन दयया च समाश्वास्य किञ्चिन्मिथ: परामृश्य च तामेव द्विचक्रिकां तमारोह्य तेष्वेक: प्रेमपुरं प्रति प्रस्थित: । अपरौ च यथेच्छमगच्छताम् ? असौ तु सुखदेवं नयन् मार्गे भीतभीतं तं सामवचनैर्वीरबालकथाभिर्हासविनोदैश्च विनोदयन् ग्रामनिकटं सम्प्राप्त: । वत्स ? त्वमिदानीमित: स्वगृहं गच्छ । अत्र मार्गस्तव परिचित एवास्ति । अहं चेत: प्रत्यागच्छामीत्यवदत् । अथ सुखदेवो, "भवान् मम प्राणानरक्षद्, गृहमवश्यमेव चलतु । तत्र ममाम्बापि भवन्तं सत्करिष्यति", इत्यवोचत् ।

वत्स ! कथयामि ते वास्तविकताम् । वयं चोरा मार्गलुण्टकाश्च स्म: । जीविकार्थं रात्रौ निर्गता: । अद्यास्माकं जीवने इदमभूतपूर्वमेव घटितम् । वयमपि पुत्रकलत्रवन्त: स्म: किन्तु किं कुर्म: ! अनिच्छन्तोऽपि विवशतया विगर्हितं कर्म कुर्म: । त्वामेकाकिनमसहायं करुणं परिदेवयन्तं विलोक्यास्माकं हृदयं द्रवीभूतम् । अतोऽस्माकं तव गृहगमनं नोचितम् । गच्छ वत्स । त्वं स्वगृहं गच्छ । तमस्विनी गतप्राया वर्तते । अहमपि स्वकार्यं साधयितुं क्वचिद् गच्छामि ।

इत: प्रेमपुरे सुखदेवमनागतं विज्ञाय माता स्नेहादतीव व्याकुलीभूता क्षणे गृहे तिष्ठति क्षणे च बहिर्द्वारमागत्य मार्गं पश्यति चिन्तयति च—किं कारणं विलम्बस्य ! प्रतिदिनं पञ्चवादनाभ्यन्तर एवागच्छति स्म किन्त्वद्य कथं नायातो मम दयित: सुत: ? किं मार्गे केनापि दुष्टेनापहृत:, हिंसकपशुना वाऽऽक्रान्त:, उत काचिदन्या दुर्घटना जातेति चिन्तयन्त्यास्तस्या मन: कस्मिन्नपि गृहकार्ये न लगति स्म । हृदये सुतस्नेहाद् विविधा: शङ्का उदपद्यन्त । दीनबन्धुश्चापि महतीं चिन्तामापन्नोऽन्वेषणायोपायान् विचारयितुं प्रवृत्तोऽभूत् ।शनै: शनैरेषा वार्ता सर्वत्र पुरे प्रसृता । बहवो जनास्तस्य द्वारदेश एकत्रिता अभूवन् । केचित्सहानुभूतिमन्त: परस्परं मन्त्रयन्तो बालकस्यान्वेषणाय मतिमकुर्वन् । केचन "टार्चानि," दण्डांश्चादाय ग्रामान्तरेषु वसतां, सम्बन्धिनां गृहेषु, केचिद् गृहीतभल्ला: क्षेत्रेषु जलाशयतटेषु कतिपये च स्कन्धावलम्बित भुशुण्डीका द्विचक्रिका आरुह्य विद्यालयमार्गेऽन्वेषणाय प्राचलन् । सर्वे च त इतस्तत: परिभ्रम्य बालकशोधमनसा इतस्तत: धावितुमारब्धवन्त: ।

अथार्धरात्रिसमये रुदत्सु मातृपितृप्रियजनेषु, प्रसृतेषु तमस्तोमेषु चतुर्दिक्षु, वीथीषूच्चैर्बुकत्सु श्वगणेषु, भाग्ये भगवति च दोषमारोपयत्सु जनेषु सहसाऽतिशयसन्त्रस्तमितस्ततश्चकितचकितं विलोकयन्तं द्रुततरमागच्छन्तं सुखदेवं तत्रोपस्थिता जना: सहर्षं साश्चर्यं चाद्राक्षु: । दृष्ट्वैव तं माताऽनपेऽक्षितशरीरा, प्रधाव्य सुतमुत्सङ्गे संस्थाप्य करेणाङ्गानि परामृशन्ती चुम्बन्ती चाश्रुपूरितनयना कुशलमप्राक्षीत् । अनेकश: परिपृष्ट: परिवृतश्च बहुभि: सुखदेवो घटनां स्मारं-स्मारं शनै: शनै: सर्वं वृत्तं श्रावितवान्, उक्तवांश्च रुदन्-'अम्ब ! मया परितो वृका एव दृश्यन्ते, तेऽत्रापि मां भीषयन्तीव । कथं मम रक्षा भविष्यतीति' 'वत्स ! भयं मा कुरु स्वगृहे वर्तस इदानीम् । अत्र कथमपि वृको नागन्तुं शक्नोति । निर्भयो भूत्वा भोजनं कुरु, ततो निश्चिन्त: शेष्व,' इत्यभिधाय दीनबन्धु: पत्न्या सहानिच्छतैव तेन भोजनमखादयत् ।

अथ गतेषु ग्रामवासिषु मातापितरौ कक्षाऽभ्यन्तरे दीपं प्रज्वाल्य शय्यायां सुखदेवं ससुखं शाययित्वा कपाटौ पिधायार्गलया दृढीकृत्य च बहि: शयनमकार्ष्टाम् । श्रान्त: क्लान्तश्च स बालक आत्मानं सुरक्षितं मत्वा निश्चिन्तो बालतया त्वरितमेव निद्रावशं गत: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः सुप्तेषु गृहजनेषु कश्चिच्चौरः किमप्यनासाद्येस्ततः परिभ्रमन् दीनबन्धोरेव गृहस्य पृष्ठभागे सन्धि कृत्वा यावदभ्यन्तरं प्रविशति तावत्सुखदेवं सुप्तमालोक्यभिज्ञाय च "अरे ! सोऽयं बालको योऽस्माभिर्वृकेभ्यो रक्षितः अहह् ! कुत्रापतितोऽस्मि ! अहो ! इयमत्र मञ्जूषा तालकेन रहिता, इमानि पात्राणि वस्त्राणि च। अनुकूलोऽवसरश्च कार्यं साधयितुम् किन्तु नहि नहि, यस्य प्राणा रक्षिताः, यश्च स्वकार्यहानिं कृत्वा गृहं प्रापितस्तस्य गृहे चौर्यं नोचितमिति निश्चित्य 'स्वपिहि वत्स ! स्वपिहि', सुखं स्वपिहि", इति निरुच्य तेनैव सन्धिमार्गेण निर्गत्य गृहं गतः।

अत्रान्तरे कश्चिदपरो वृको बुभुक्षया पीडितो मांसार्थी वनाद् ग्रामं प्रविश्य वीथीषु भ्राम्यन् तदेव सन्धिद्वारमवाप्य कक्षान्तरं प्रविष्टः। तत्र मानुषगन्धेन सन्तृप्तनासिको लालाक्लिन्नमुखः सहसाऽऽक्रम्य प्रगाढनिद्रामग्नस्य सुखदेवस्य कण्ठं प्रगृह्य चिरं शायितवान्। स्वेच्छया मृदुलमृदुलं मिष्टमिष्टमुपभुज्य मांसं, निपीय च क्वोष्णं क्वोष्णं तस्य रुधिरं परिपूरितोदरस्तस्मादेव सन्धिमार्गान्निःसृत्याभिमतदेशमयासीत्।

एतस्मिन्नन्तरे सुप्रयाता शर्वरी। गृहोपरि कटु रटन् काकः किमप्यनिष्टमसूचयत्। सपत्नीको दीनबन्धुर्निद्रां परित्यज्य जागृतो बालकं द्रष्टुकामो यावदर्गलामुन्मुच्य कपाटावुद्घाटयति तावदात्मजत्य सुखदेवस्य निष्प्राणं छिन्नं भिन्नं रक्ताक्तं शरीरं भित्तौ सन्धिविवरं च विलोकयति।

अथ द्वावपि तौ दम्पती सोरश्शिरस्ताडयन्तौ हा हतोऽस्मीति विलपन्तौ मुक्तकण्ठं समागतान् ग्रामवासिनोऽश्रुपूरितलोचनानकुरुताम्। विवशो वराको मनुष्य इदमेव कथयित्वा सन्तोषमावहति यद् भवितव्यतैवेयमीदृश्यासीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षा

— मदनमोहनजोशी
१००/६ भजनपुरा, दिल्ली

कस्मिंश्चिद् वने सुरम्ये प्रान्ते विशालमेकं सर: आसीत्, तत्र सपरिवारा: विविधा: जलचरा: वसन्ति स्म। कुत्रचिन्मकरा: कुत्रचिन्मीना: कुत्रचिच्च मण्डूकादयो जलचरा:। तत्र मण्डूकानां संख्या: सर्वाधिका:। स्वार्थरता: निरङ्कुशास्ते सर्वत्र उत्प्लावयन्ति टर्टरायन्ते च, तेन तत्रस्थानां सर्वेषां जीवानां निद्रा पलायिता।

अथैकदा मकराधिपतिस्तान् स्वेच्छाचारिणो मण्डूकान् अवदत्-"किं यूयं निरङ्कुशा: ? सर्वेषां जीवानां शान्ति हरत। किं युष्मासु कोऽपि सुयोग्य: शासको नास्ति यो युष्मान् अनुशासने रक्षेत् ?" इति।

मकराधिपते: वचांसि श्रुत्वा कश्चिद् वृद्धो मण्डूकोऽवदत् 'मृतं राष्ट्रमराजकम्,' राजानं विना जलजीवा: कदापि सर्वान् अस्मान् इतो बहिष्करिष्यन्ति। अत: कोऽपि सुयोग्य: सिंहासनारूढ: कर्तव्य:।

सिंहासनारूढ: को भवेदित्यस्ति प्रश्न: ? मनसि तु सर्वे मोदकानि खादन्ति किन्तु बहिर्न प्रकटयन्ति। अत: स वृद्धोऽवदत्-'चयनं कर्तव्यम्', इति।

एकेन कर्बुरस्य, केश्चिच्च प्रफुल्लस्य, कूर्दकस्य, गङ्गदत्तस्य च नामानि प्रस्तावितानि। तेषां समर्थका: प्रतिगृहं गत्वा तेषां गुणान् गायन्ति स्म। तेषु प्रफुल्लो मण्डूको धूर्त आसीत्। तेन चिन्तितं यदि ममानुयायिन: प्रतिगृहं गत्वा प्रचरिष्यन्ति तदा कश्चिदपि मम चयनं न स्वीकरिष्यति। अतो वयं बकनीतिं स्वीकुर्म इति।

सर्वप्रथमं प्रफुल्लस्यानुयायिभि: सर्वाणि भोज्यवस्तूनि संगृहीतानि। प्रफुल्लस्य गृहे अहर्निशं दरिद्रनारायणसेवा भवति, प्रफुल्लश्च सर्वेषां चरणान्प्रक्षाल्य उच्छिष्टं चोत्थाय स्वयमेव तत्र लेपनादिकं करोति। एवं तेन सर्वहृदयेषु स्वस्थानं कृतम्। तस्य कथनमासीत्—"सेवाधर्म: परमगहन:" अतोऽहं सर्वेषां सेवक:।

एवं बकनीत्या प्रफुल्लो मण्डूकाधिपति: सञ्जात:। स्वायोग्यतामाच्छादयितुं तेन सर्वे सुयोग्या: नीतिज्ञाश्च अनुशासनच्छलेन कारागारे क्षिप्ता: अयोग्या: समर्थकाश्च उच्चपदेषु स्थापिता:। यदि केनचिदपि विरोध: प्रकटित: स देशनिष्कासितो भवति। एतदर्थं सैन्यसंगठनं गुप्तचरव्यवस्था च वर्तते।

प्रफुल्लस्यात्याचारान् सर्वे यत्र तत्रानुभवन्ति किन्तु भयभीता: किमपि न प्रकटयन्ति। तदत्याचारचर्चा रंगदत्तेन कृता तदैवासौ देशनिष्कासितोऽभवत्। स वारं वारं प्रार्थयते-'निरपराधोऽहम् मां न निष्कासय, सदैव राजाज्ञां पालयामि।' किन्तु मण्डूकप्रदेशे तस्य प्रवेशो नाभवत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

स मनसि चिन्तयति स्म, देशनिष्कासितोऽहं क्व गच्छानि कथं च जीवानि ? यतो हि—

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः ।
जातिमध्ये च सम्भोजो जकाराः पञ्च दुर्लभाः ।

अत्र जन्मभूमिः जातिश्च द्वौ जकारौ वर्तेते । कथमितो गच्छानि इति चिन्तयन्नेव रोदिति तत्रैव च स्वपिति स्वप्ने च 'प्रफुल्लस्य राज्य नाशयति स्वयं च राजा भवति' इति पश्यति । तदैव पृष्ठभागे उच्छ्वासध्वनिं श्रुत्वा कालस्वरूपं कृष्णसर्पं पश्यति । इदानीं भविष्यामि राजा ? अयं मां भक्षयितुमागतः । पलायनमार्गोऽपि नास्ति, ईश्वरं स्मरामि किन्तु दृष्टौ ध्याने च कृष्णसर्प एव । अन्योपायत्वेन स उच्चैः रोदिति । सन्निकटे आगत्य सर्पस्तं सान्त्वयन् वदति, 'भो वत्स किमर्थं रोदिषि ?'

सः अत्युच्चैः रोदिति । किमपि न वदति किंकर्तव्यमूढश्च भवति । तस्येमां दुर्दशां दृष्ट्वाऽनुमानेन ज्ञापितः सर्पः पुनस्तमपृच्छत्-'वत्स ! कोऽसि ? कुतः आगच्छसि ? सर्वं स्पष्टं कथय । अलं भयेन, येन तवापकारः कृतः तस्य नाशोपायं करिष्यामि अन्यमनस्को रङ्गदत्तस्तं पृच्छति- 'श्रीमन् ! तस्य समर्थस्य नाशः केन प्रकारेण भविष्यति ?'

सर्पः शान्त्या किमपि शनैः रङ्गदत्तस्य कर्णे वदति । तदा जातविश्वासो रङ्गदत्तः सर्वं विस्तरेण वदति ।

'इदानीं प्रसन्नमुखो रङ्गदत्तस्तस्यसरसः समीपे गीतं गायति नृत्यति च । तं तथा सुखिनं दृष्ट्वा प्रफुल्लस्य गुप्तचराश्चकिताः तत्पार्श्वे आगत्य पृच्छन्ति स्म, भो रङ्गदत्त ! इतो निष्कासिताः बहवो मण्डूकास्तु यमस्य अतिथयः सञ्जाताः केचिच्च मृत्प्रायाः जाताः । त्वं कथय, कथं जीवसि ? कुत्र च वससि ?'

रङ्गदत्तोऽवदत्-"अरक्षितं तिष्ठति दैवरक्षितम्, ईश्वरकृपयैवेतो निष्कासितोऽहमत्र निकटस्थे सरसि वसामि । तत्रानेकानि मित्राणि यानि सुखदुःखयोः समक्रियाणि सन्ति । सर्वे तत्र स्वतन्त्राः किन्तु अनुशासनप्रियाः सन्ति । तेषां जलचराणामादर्शवाक्यं 'सौहार्दमतिथिसेवा' चेति ।"

रङ्गदत्तस्य वार्ता गुप्तचरान् तत्र गमनाय परवशान् अकरोत् । ते शनैरपृच्छन्, किं तत्र कोऽपि गन्तुं समर्थः, तत्र का व्यवस्था ?

'रङ्गदत्तः पुनः अकथयत्-तत्रानुशासनप्रिय एव गन्तुं समर्थः, अत्याचारिणः स्वेच्छाचारिणश्च तत्र गन्तुमसमर्थाः । सर्वे सहैवादन् किं वयमपि तत्र गन्तु समर्थाः भविष्यामः ।'

'कथं न, रङ्गदत्तो मनसि विहस्यावदत्, परं सर्वे सहैव तत्र गन्तुं न समर्थाः । यदि कश्चित्तत्र गन्तुं वाञ्छति तर्हि मया सहैकैकः आगच्छेत् । सर्वान् तत्र नेष्यामि ये तत्र जिगमिष्यन्ति ।'

रङ्गदत्तोऽग्रे गच्छति, पृष्ठे योऽपि मण्डूको भवति, तेन स कृष्णः सर्पः बुभुक्षां शाम्यति । एवं कृते मण्डूकानां संख्या प्रतिदिनं न्यूनायते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'कदाचित् प्रफुल्लेन गुप्तचराः आकारिताः, किन्तु कोऽपि नागतः। क्रुद्धः प्रफुल्लो द्वारपालान् आहूयापृच्छत् क्व गताः गुप्तचराः ? शीघ्रं वदत रे द्वारपालाः।'

कम्पमानाः द्वारपालाः किं वदेयुः ? तेषु कश्चिदेको द्वारपालः राजानं प्रणम्यावदत्-महाराज !क्षन्तव्यम्, क्षन्तव्यम्, गुप्तचरास्तु पलायिताः, तैः सह केचिन्मण्डूकाः अपि।

'सविस्मयः प्रफुल्लः पुनः अपृच्छत्- ?क्व गताः, किमर्थं गताः ? केन सह गताः ?' शीघ्रमानय तान् देशद्रोहिणः।

स करौ बद्ध्वा पुनः अकथयत्-'महाराज ! न जानीमो वयं ते कुत्र गताः, किन्तु कर्णपरम्परया श्रुतमस्माभिः यत्ते रङ्गदत्तेन सह अन्यस्मिन् सरसि गताः।'

प्रफुल्लः उच्चैराक्रोशयत् 'कोऽसौ रङ्गदत्तः ?'

'यो भवता देशनिष्कासितः कृतः', इति शनैरकथयत् द्वारपालः।

सक्रोधम् राजावोचत्-'किं कथितं ? तेन देशद्रोहिणा सह गतास्ते ? तानपि दण्डयामि। शीघ्रमानय तान्।'

द्वारपालेन पुनः कथितं, 'ते गुप्तचराः अत्र न सन्ति। यदि भवदाज्ञा वर्तते तं रङ्गदत्तमन्वेष्याम तञ्चानयाम, ते इतस्ततो गत्वा तमानयन्, अनेन सहैव गुप्तचराः गच्छन्, अमुमेव पृच्छतु भवान्, अयमेव सर्वं कथयिष्यति ?'

'कथं रे देशनिष्कासनादुदरपूर्तिर्नजाता ? कुत्र सन्ति मम गुप्तचराः ? मण्डूकाश्च ? शीघ्रं वद।'

शान्तो रंगदत्तोऽवदत् 'निरपराधोऽहम्, क्षन्तव्योऽस्मि। महाराज ! ते लोलुपाः गुप्तचराः इतोऽन्यस्मिन् सरसि गत्वा ससुखं वसन्ति, भवन्निन्दायां च कालं गमयन्ति, सर्वं सोढुं शक्यते किन्तु राजनिन्दा असहनीया भवति। अतएव तैः सह न वसाम्यहन्तु एकाकी जीवनं यापयामि। भवदाज्ञया तान् दर्शयितुं शक्नोमि।'

रङ्गदत्तस्य वार्तां श्रुत्वा राज्ञः क्रोधः शान्तो जातः। स रंगदत्तमकथयत्— "तेषां गुप्तचराणां कथनेनैव निरपराधस्त्वं दण्डितः। यतो हि 'चारचक्षुष एव राजानः'। अतस्त्वं निर्भीको वस अत्र। त्वं प्रधानगुप्तचरोऽसि। शीघ्रं तान् अत्रानय।"

रंगदत्तः शिरो विनम्यावदत्—"महाराज! तेऽत्र कथमागमिष्यन्ति, ते जानन्त्येव अत्रागमनं यमालयगमनम्। अथ न भवान् अन्यथा मन्येत तर्हि शत्रुः गुप्तरूपेण हन्तव्यः। अहं तान् सरसो बहिरानयामि, सेना च तान् वन्दिनः कर्तुं समर्था भविष्यति।"

प्रसन्नो राजा रंगदत्तेन सह गुप्तचरान् ग्रहीतुमचलत्। किञ्चिद् दूरं गत्वा कृष्णसर्पेण गृहीतो राजा सकरुणः रंगदत्तमपश्यत्। रंगदत्तोऽपि नाट्येन सर्पं प्रार्थयते—"भो नागराज ! नमामि त्वाम्, अस्माकं नृपे प्रसीदतु" मुञ्चतु च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागराजः उच्चैः विहस्य राजानमपृच्छत्-'किं रे मण्डूकाधम। कथय तव परिवारोऽस्तिवा?' रुदन्प्रफुल्लः प्राणभिक्षां याचमानः अवोचत्, 'मम वृद्धा माता, सद्यः प्रसूता पत्नी, सुकुमारो बालश्च। मदतिरिक्तः कोऽपि तेषां सहायको नास्ति।' तं भर्त्सयन् सर्पोऽपृच्छत्—'राजन्कथय ये निरपराधास्त्वया दण्डिताः कारागारे क्षिप्ताः अङ्गहीनाः कृताः मारिताः वा किं तेषां पत्नी पुत्रो माता वा नासन्? तदैषाभावना क्व गता आसीत्? न मोचयिष्यामि त्वां तव निरङ्कुशान् अनुचरान्वा।'

तयोः सम्भाषणां श्रुत्वा कारुणिको रंगदत्तः करौ बद्ध्वा सर्पं प्रार्थयन् अवदत्—'नागराज! यद्यप्येष दुरात्मा अस्ति पुनरपि क्षन्तव्यो यद्येष प्रतिजानातु अद्य प्रभृति कमपि निरपराधिनं न दण्डयिष्यति सर्वैं सह न्यायं करिष्यति।' इति श्रुत्वा प्रफुल्लः कर्णौ स्पृष्ट्वा तथैव वदति।

रंगदत्तस्य प्रार्थनया सर्पस्तं मोचयन् अवदत्, "यद्यपि क्षमायोग्यो नासि त्वं पुनरपि गच्छ स्वगृहं, मा कदापि विस्मर, 'दयामूलो धर्मः अतः, आत्मनः प्रतिकूलानि परेषां न समाचरेत्' इत्याचर।"

अनया प्राणभिक्षया शिक्षया च प्रफुल्लस्य जीवनं परिवर्तितम्, प्रतिज्ञां पालयन् सप्रजः स सुखी राज्यमकरोत्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यमेव जयते

—डॉ. रामाशीषपाण्डेय:

आचार्योऽध्यक्षश्च—संस्कृत विभागस्य, मारवाड़ी महाविद्यालय:, राँची विहार:।

गृहाध्यापकश्चतुर्भुजो बलवीरं भूयोभूयो गणितसूत्रं पाठयति स्म परं तस्य मानसे सूत्रार्थो न तिष्ठति स्म । बलवीरस्य पिता नगरस्य श्रेष्ठिवर्गेषु प्रथमो वर्तते । व्यापारक्षेत्रे धनवीरस्य नाम सर्वत्र विख्यातमस्ति।

बलवीरस्याध्यापनायानेके गृहाध्यापका आगच्छन्ति स्म । तस्य नामांकनमप्येकस्मिन् प्रख्यातविद्यालये बभूव । गृहे अध्यापनाय गृहाध्यापका विद्यालयस्यैवाध्यापका: आसन् । निर्धारितसमये ते आगत्य पाठयन्ति स्म, परं तस्य मन: पठने न्यूनमेव लगति स्म । बलवीरस्य विद्यालये यद्यप्यनेके मेधाविनश्छात्रा आसन्, परं सर्वासु परीक्षासु तेनैवाधिका अंका लब्धा: । सर्वे छात्रा अध्यापकाश्चापि जानन्ति स्म यदनेके छात्रा बलवीरात् तीव्रतरास्तेजस्विनश्च सन्ति, परिश्रममपि तेऽधिकं कुर्वन्ति, परं धनाभावेन गृहशिक्षकेभ्यो न अधीयन्ते ।

सम्प्रति गृहशिक्षका धनलाभाय सर्वं कार्यमकार्यं वा कर्तुमुद्यता भवन्ति । आर्थिकेऽस्मिन् युगे ते धनस्य वशवर्तिन: सन्तीति प्रतीयते । मन्दोऽपि छात्रो यदि तेभ्योऽध्येति, तदा तस्मै उच्चाङ्कदानाय कुकार्यमपि विदधति येनान्येऽपि छात्रा अध्ययनाय तेषां पार्श्व एवागच्छेयु: । अध्यापनमल्पमेव कुर्वन्ति, परीक्षायां बाह्याभ्यन्तरसहयोगं प्रभूतं ददति । वर्तमानशिक्षाया: स्थितिरस्ति यत् प्राय: ज्ञानदातारोऽर्थस्यैव समुपासका: सन्ति ।

रमेशो बलवीरस्यैव सहाध्यायी वर्तते । तस्य पिता मंगलो निर्धनोऽस्ति । परिवारे सदस्यानां संख्या अधिका विद्यते, तत्र द्रव्यागमोऽपि नाधिको वर्तते । रमेश: पठने तीव्र: परिश्रमी चास्ति । यद्यपि ज्ञानक्षेत्रे मेधायाञ्च स बलवीरादपि तीव्रतरऽस्तथापि कस्यामपि परीक्षायां प्रथमं स्थानं स न लब्धवान् । स सर्वदा चिन्तयति स्म यद् वर्गे शिक्षकानां प्रश्नस्योत्तरमहमेव ददामि, बलवीरस्सदा निरुत्तरस्तिष्ठति तथापि परीक्षायामधिका अंकास्तस्मै कथं दीयन्ते । किम् श्रमस्य मूल्यमिदमेवास्ति । ममपार्श्वेऽधिकं धनं नास्ति । मम पिता दीनो वर्तते । गृहशिक्षकस्य व्यवस्था मम गृहे कथं भविष्यति ?

प्रवेशिकापरीक्षाया: परिणाम: प्रकाशितोऽभूत्, तत्रापि बलवीरस्यैवाङ्का अधिका आसन्। रमेश: परीक्षाफलं दृष्ट्वा, चिन्तित: सन् धैर्येण मन: सान्त्वयन् अध्ययने निरतो बभूव ।

'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इति भगवत: कृष्णस्योक्तिं स्मरन् स्वकार्ये समासक्तो बभूव रमेश: । सामान्यजनेषु चर्चाऽऽसीत् यत् प्रवेशिकापरीक्षायां धनवीरेण पुत्रस्योच्चाङ्कलाभाय दशसहस्त्ररूप्यकाणि उत्कोचे प्रदत्तानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलवीरस्य नामाङ्कनं नगरस्य प्रसिद्धमहाविद्यालये बभूव। तत्रस्थाः प्राध्यापका अपि तस्य सहायका आसन्। विविधविषयशिक्षकेभ्यो महाविद्यालयाद्बहिरपि सः अध्ययनं कृतवान् तथा च स्वतन्त्राध्ययनस्य कृते प्रभूतं धनं तेभ्यो दत्तवान्।

भ्रमणक्रमे बलवीरः एकदा एकस्मिन्नुद्याने गतः। तत्रैकस्य वृक्षस्य छायायां तिष्ठन् रमेशः किमपि पठने लग्नः आसीत्। पुस्तिका लेखनी च तस्य पार्श्वे विद्येते। पुस्तिकायां किमप्यङ्कनमपि करोति स्म। अस्मिन्नेव काले बलवीरस्तत्र गत्वा तस्याग्रे स्थितो बभूव। रमेशस्य दृष्टिर्बलवीरं प्रतिगता। अध्ययनं विरम्य तस्मै स्वागतञ्चकार। बलवीरस्तं कुशलादिकं प्रपच्छ। सरलहृदयेन रमेशेन स्वकीयं वृत्तं कथितं यदहमप्येकस्मिन् महाविद्यालये पठामि यत्र समुचितसंख्यायामध्यापका अपि न सन्ति। नवीनेऽस्मिन् महाविद्यालये प्राध्यापका अपि तादृशा योग्या न विद्यन्ते। एकस्मिन् विषये एक एवाध्यापको वर्तते। सोऽपि उच्चविद्यालयस्य शिक्षकः अंशकालिकः। महाविद्यालयस्य पुस्तकालये पुस्तकानामपि सर्वथाऽभावो विद्यते। यथाकथञ्चिन् मम हाविद्यालयश्चलति। समृद्धमहाविद्यालयेषु कथमस्मादृशानां छात्राणां नामाङ्कनं भविष्यति। बलवीरेण पृष्टम्—'किं छात्रावासे स्थितोऽसि?'

रमेशेन कथितम्—'मम महाविद्यालये छात्रावासस्य व्यवस्था नास्ति। यथा कथञ्चिदेकस्य पुरुषस्य क्षुद्रकक्षायां निवसामि, तस्य पुत्रानध्याप्य तस्य क्षुद्रकक्षाया भाटकं ददामि। पुनश्च स्वतन्त्ररूपेण कतिपयान् छात्रानप्यध्यापयामि। तेनार्जितेन धनेनाध्ययनं करोमि।' मित्रस्य सविधे हृदयोद्गारप्रकाशनमात्मसुखाय भवति।

रमेशस्य स्थितिं ज्ञात्वा बलवीरः स्वमहाविद्यालयस्य महत्वं वर्णयन् कथितवान्—'मम महाविद्यालयस्य भवनं तु सर्वविदितम्। तत्रानेके कुशला योग्याः प्राध्यापकाः सन्ति। तत्र समृद्धपुस्तकालयोऽपि विद्यते। सर्वसाधनसम्पन्नो मम महाविद्यालयो नगरस्य गौरवभूतः।' सः प्रकाशितवान् 'अत्राहं सर्वेषु विषयेषु प्राध्यापकेभ्यो विशेषाध्ययनं करोमि।'

'अनेकेऽध्यापका अध्यापनादधिकं धनं प्रति दत्तावधाना वर्तन्ते। मम पिता प्रतिमासं द्विसहस्ररूप्यकाणि व्ययहेतोः प्रेषयति।' बलवीरस्याभिमानान्वितं वचनमिदं श्रुत्वा रमेशो दुःखितो जातोऽन्तर्मनसा। तत्रैवैकोष्णपेयविक्रेता समाजगाम। उभौ चोष्णपेयं पीतवन्तौ। तस्य मूल्यं रमेशेनैव दत्तम्। उभौ प्रास्थानिकं व्यवहृत्य स्वस्वावासं प्रति प्रस्थितौ।

रमेशस्याध्ययनकक्षे एकैव चतुष्की विद्यते। कक्षोऽतीव संकीर्णः, प्रकाशस्य वायोर्गमनागमनस्य व्यवस्थाऽपि समुचिता नास्ति। तस्यासने कानिचित् पुस्तकानि विकीर्णानि सन्ति। भोजननिर्माणाय पात्राण्यपि तत्रैव न्यस्तानि सन्ति। तण्डुलस्य व्यञ्जनस्य च पात्रद्वयमेव तस्य पार्श्वे विद्यते। भोजननिर्माणार्थं प्रायः भोजनपात्र एव द्विदलस्य पाकं करोति तथा तस्मिन् पात्र एव द्विदलं निःसार्य तण्डुलमालुकञ्च निधाय पचति। अद्य रमेशो विलम्बेन समागतः। गृहं गत्वा स्वतन्त्राध्यापनेन समयोऽधिको व्यत्येति। सः भोजननिर्माणे संलग्नो भवति यतो हि शरीरमन्नाश्रितं वर्तते। भोजनपात्रात्तण्डुलमालुकञ्च निःसार्य प्रसन्नमनसा भोजनं कृत्वाऽध्ययने संलग्नो बभूव। महाविद्यालये यदध्यापनं भवति तेन कार्यं न चलति। महाविद्यालयदधिकं गृह एव पठनीयं भवति। यस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाविद्यालयेऽध्यापनस्य समुचिता व्यवस्था नास्ति तत्र छात्राणां कृते अत्यधिकं पठनीयं श्रेयस्करम्। सम्प्रति महाविद्यालयीयाश्छात्रा गृहे यदि नाधिकं पठिष्यन्ति तदा परीक्षायामनुकूलं साफल्यं नाधिगमिष्यन्ति। रात्रिर्व्यतीता। निद्रा कदा समागतेति तेन न ज्ञातम्। अनेन क्रमेण तस्य दैनिकमध्ययने जीवनं व्यत्येति।

सामान्यपरिधानैरावृतः स्वस्थो युवा रमेशः एकस्मिन् महाविद्यालयस्य प्राङ्गणे प्रविशति। तत्र प्राध्यापकपदस्य कृतेऽन्तर्वीक्षा वर्तते। अनेकेऽभ्यर्थिनस्तत्रोपस्थिताः सन्ति। अनेके वृत्तिहीना युवानः स्वमनसि आशादीपं प्रज्ज्वालयन्तः, पत्रावरणे जन्मपत्राणीव प्रमाणपत्राणि निधाय इतस्ततः परिभ्रमन्तो विद्यन्ते। रमेशोऽप्येकोऽभ्यर्थी वर्तते। गृहादागमनकाले तस्य माता दध्यक्षतेन मांगलिकं सम्पादितवती। यात्राकाले दधिदर्शनं दधिवन्दनञ्च शुभाय भवति। स एकस्मिन् प्रकोष्ठे पत्रावरणे प्रमाणपत्राणि गृहीत्वा आसन्द्यामुपविशन् विषयचिन्तने निरतो भवति। सहसा बहुमूल्यवस्त्रेणावृतो बलवीरोऽपि तत्र समागतः। तस्य हस्ते बहुमूल्यं पत्रावरणमासीत्। ताम्बूलं चर्वयन् स रमेशस्य पार्श्वे सहसा समाजगाम। बलवीरं दृष्ट्वा तस्य मनसि एको विचारः संमागतो यद्धनबलेन सर्वत्राधिका अंका अनेन लब्धाः। अत्रापि धनबलेन पदमपि प्राप्स्यति। रमेशो महद्विचारपङ्के पतितो भगवन्तं शिवं स्मरति। विषमपरिस्थितौ तु भगवान् एव सहायको भवति। बलवीरो रमेशं दृष्ट्वा कथयति, 'रमेश! त्वं व्यर्थमेवास्यामन्तर्वीक्षायां समागतोऽसि। अस्य महाविद्यालयस्य प्रबन्धसमितेरध्यक्षस्तु नियुक्तिहेतोर्मम पक्षे वर्तते।' तस्य वचनं श्रुत्वा रमेशस्य सर्वाः प्राप्त्याशा निर्गताः, परं शीघ्रमेव—'धीरा धैर्येण जयन्ति सर्वम्', इति। स्मरन् वाग्देव्याः स्मरणं चकार। तेनानुभूतं यत् सर्वे विषयास्तस्य जिह्वाग्रे वर्तमाना वर्तन्ते।

अन्तर्वीक्षा प्रारब्धा। अभ्यर्थिनोऽन्तर्वीक्षाकक्षे प्रविशन्ति परं निर्गमनकाले म्लानमुखास्ते प्रतीयन्ते। रमेशोऽपि तत्राहूतः। विषयविशेषज्ञैः पञ्चप्रश्नाः कृताः। सर्वेषां प्रश्नानामुत्तरं रमेशेन यथोचितं दत्तम्। अन्येऽभ्यर्थिनः सर्वेषां प्रश्नानामुत्तरं दातुं समर्था नासन्। अन्तर्वीक्षा सम्पन्ना। निर्णयकाले समितेरध्यक्षेण बलवीरं प्रति स्वीयाभिमतं प्रकटितम्, परं विषयविशेषज्ञमहोदयेनोक्तम्, बलवीरस्तु एकस्यापि प्रश्नस्योत्तरं न दत्तवान्। मम मतौ तु रमेशः सर्वेष्वभ्यर्थिषु उत्तमः। अहमस्यामन्तर्वीक्षायां रमेशस्य नाम प्राथम्येनानुशंसामि।, निर्भीको न्यायप्रियः पुरुषः सर्वत्र विद्यते यो हि धनादिप्रभावैः प्रभावितो न भवति हंसस्येव च नीरक्षीरविवेके निरतोऽस्ति।

महाविद्यालयस्य प्रधानाचार्यः कुशलो विद्वान् विद्यते। तेनोक्तम् सर्वथा योग्यो नियोक्तव्यः। योग्यपुरुषस्य नियुक्त्या महाविद्यालयस्याभ्युदयो भविष्यति। समितेरध्यक्षो नगरस्य प्रतिष्ठितो जनप्रतिनिधिरासीत्। समयानुरूपं कार्यसम्पादने स्वगौरवरक्षणे च नितरां पटुरासीत्। इच्छारहितोप्यसौ रमेशस्य नियुक्तौ समर्थनञ्चकार। सत्यपथगामिनां समक्षे कुपथगामी अनिच्छन् अपि स्वकीयं कुपथं परित्यज्यति।

सम्प्रति रमशेनैकं निबन्धितं पत्रं लब्धम्। निबन्धितं तत्पत्रं तस्यैव नियुक्तिपत्रमासीत्। तत्पत्रं प्राप्य नितरां मुदितो रमेशो मात्रे सूचितवान्। तस्य माता भृशं प्रसन्ना मनसा कथितवती—

'सत्यमेव जयते।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai

श्रेयस्करी पितुराज्ञा

(बालोपयोगिनी लघुकथा)

—डा० बलवीरदत्तशास्त्री
साहित्यायुर्वेदाचार्यः
१४९२/१४ फरीदाबादः, हरियाणा

आसीत् पुराकाले श्रावस्ती नाम्नी नगर्येका। यत्र निवसन्ति स्म बहवः पुमांसः सपरिवाराः। तेषु चासीदेको निर्धनपरिवारः। तेन तत्र निवसता महता कष्टेन दिनानि व्यतीतानि। भार्या परं तत्राऽतिसाध्वी धर्मपरायण, परोपकारनिरता सकलाह्लादकारिणी समादरपात्रं च अवर्तत। चत्वारो बालकाः कन्या चैका तस्याः आसन्। गृहपतिरसौ प्रतिदिनं वनानि यात्वा दारुकर्तनव्यापृतः काष्ठानां भारमेकमादाय विपणिं गत्वा विक्रीणातिस्म। येन समासादिताऽनल्पद्रविणेन निजबालकानामुदरपोषणं निरवाहयत्।

एकदा यदा स तरुविदारणसंलग्नोऽभवत्तदैव पादपादेकस्मान्निर्गत एकः यक्षः समुवाच च तं वृक्ष-हन्तारम्-'भोः कथं त्वं निर्दयो भूत्वा सकलामेवारण्यं विनाशितुमुपप्रयासि? अहरहः!' भयात्कम्पमानः स काष्ठविदारकः प्राञ्जलिः प्रणिपत्य गद्गदवाचा निजगाद 'हे महापुरुष! नास्ति मे कश्चिदन्यो जीविकोपायस्तस्मादत्रागत्य वने वृक्षान्कर्तयित्वा विपण्यां विक्रीणामि, येन संलब्धधनैरात्मनः कुटुम्बं बिभर्मि। क्षमा मे प्रदेया, अद्य प्रभृति न कदापि कार्यमेतद् विधास्यामि। परं भगवन्! समाख्यातु मे जीवनसाधनमन्यत्किञ्चित्। अहं भूयो भूयः प्रणमामि भवन्तम्।' तस्य विनयावनतस्य तद्वचनमाकर्ण्य दैन्यपरं स यक्षोऽवादीत्-शृणु रे सार्थवाह! अहं मन्त्रमेकं तुभ्यं प्रददामि, प्रातरुत्थाय स्नात्वा चित्तमेकाग्रं विधाय प्रत्यहमष्टोत्तरशतजपम् अस्य मन्त्रस्य सम्पादनीयं त्वया। मन्त्रोऽयमस्ति **"प्रजापते नत्वदेतान्यन्यो विश्वाजातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।"** ये च सन्ति तव बालकास्तानपि विद्यालये पठनार्थं प्रवेशय। एवच्छ्रुत्वा स दीनजनो भूयोऽपि तं यक्षं प्रार्थयामास-'भगवन्भवानुपदिशति यद्विधातुं तदवश्यमेवानुष्ठास्यामि परं द्रविणं कुतः संलप्स्ये? सर्वमेतदुपपादितुं बालकानां पठनशुल्कं तेषां पुस्तकादिपाठनसामग्री वासांसि भोजनानि च कुत आप्स्यामि, एतत्तु वदतु भवान्।' ततस्तेन दयालुना यक्षेनार्थपेटिकैका समर्पिताऽस्मै। 'गृहाण भोः समस्तमेतद्धनम्। अनेन त्वं स्वानि सम्पूर्णानि कार्याणि सम्पादयिष्यसि, परमतिचातुर्येण धनस्य व्ययस्त्वया विधेयः। एतद्धनेन त्वं व्यापारं विधेहि, व्यापारे वसति लक्ष्मीः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति शास्त्रवचनमस्ति नीतेः। साम्प्रतं त्वया सन्ततिर्योग्या विधेया। यदि बालका परिश्रमेणाध्ययनं विधास्यन्ति तदा तेषां भाग्योदयः सम्पत्स्यते। याहि स्वसदनं यदुक्तोपायञ्च निर्वर्तस्व। सुखं ते भविष्यति, सदा परोपकारे मतिरवधेया। नान्यान्सन्तापय, इति व्याहृत्य स यक्षस्तिरोबभूव।'

स च गृहमागत्य स्वभार्यायै निवेदयामास—'प्रिये आकर्णय, निरस्तमस्मद्गेहस्य सम्पूर्णं दैन्यम्। अद्य प्रभृति गृहस्थाश्रमोऽस्माकं सुखेन व्येष्यति। न मे किमपि दारिद्रयमुपस्थास्यति। सर्वनिवेमान्बालकान् विद्यालये पठनार्थं प्रेषयिष्यामि। इदञ्चोपलब्धमनल्पं वित्तजातमद्य, समागता अस्माकं सुदिवसाः।' तेन समाकारिताश्चात्मजाश्चात्मनः-- "समागच्छथ, समागच्छथ भो मम प्रियास्तनयाः ! किशोराः ! अद्यप्रभृति युष्माभिः शुभैर्बालकैर्भाव्यम्, युष्माकं पठनार्थं पाठशालायां मया प्रबन्धो विहितः। सर्व एव यूयं विद्यार्जनाय विद्यार्थिनो भवेथ। समस्तानाञ्च युष्माकं नूतनानि वासांसि परिधानार्थम् भविष्यन्ति, यूयं सर्वे यथासमयं क्रीडां क्रीडिष्यथ, समये विद्यालयं यास्यथ, सर्वेभ्यः सन्तुलिताहारवितरणं विधास्यामि। समस्तैरेव शुभगुणाधानमादातव्यमात्मचेतःसु। न केनापि कलहो विधेयः। सर्वैरिव सार्धं मधुरो व्यवहारः करणीयः। युष्माकमाचरणं विलोक्य सर्वे जनाः परममाह्लादमनुभविष्यन्ति, युष्माकमादरं च करिष्यन्ति, अपरगेहेषु च युष्मान्प्रशंसिष्यन्ति। अहं च हाटके आपणमेका मुद्घाट्यिष्यामि। यत्रागत्य जनाः स्वल्पमूल्येन गृहसामग्रीं क्रेष्यन्ति।" इत्थं स्वयोजनां स स्वार्भकेभ्यः प्रकटयामास।

सर्वत्र हाटके डिण्डिमघोषणा च कारिता यदत्रमदापणे सर्वमानवाः स्वावश्यकवस्तूनि स्वल्पीयसा मूल्येन क्रीणन्तु। ततश्च बहवो ग्राहकास्तत्र समायाता, यथावश्यकगृहसामग्रीजातमधिगम्य परमप्रसन्नतामासादयन्ति स्म। पुत्राः अपि तस्य विद्यालयं गत्वा पठितुमारेभिरे। शनैः शनैस्तस्य व्यापारोऽहर्निशं परिववृधे, बालकाश्च परं नैपुण्य माजग्मुरध्ययने। एवं कालेन ते दशमकक्षामुत्तीर्णाः सञ्जाताः एकादशकक्षायाञ्च स्वरुच्यनुसारं पृथक् पृथक् विषयानधिजग्मुः। मातापि तेषां मधुराणि व्यञ्जनानि स्वादूनि भोजनानि निर्माय प्रतिदिनं भोजयामास।

गच्छता कालेनैकदा तत्पिता स्वान्तिमसमयमवलोक्य ते सर्व एव तनुजा निजान्तिकमुपाहूताः समुक्ताश्च मधुरया गिरा, 'भो भो बालकाः बालिके च, ममावसानसमयः समागतः सम्प्रति, अतो युष्मभ्यं सर्वेभ्य एव किञ्चिदात्ममनोगतं वक्तुमिच्छामि, सावधानाः शृणुध्वम्-अहं वाञ्छामि यन्ममरणानन्तरं युष्माभिर्न तादृशं किञ्चिदपि कर्म करणीयं यादृशं ममाभिधानं गर्हितं कुर्यात्। यतो हि मया महता कष्टेन युष्माकं पालनपोषणे विहिते यूयं च मदीया अतिप्रिया बालकाः स्थ। अतोऽहर्निशं युष्माभिः साधु समाचरणीयम्।, ततोऽग्रजस्तेषा- मब्रवीत्—'पितर्न किञ्चिदप्यकार्यं कर्म, अनुष्ठास्यामि, ऋते वारवधूपसेवनादेककालम्।' तदा जनकेन सम्प्रोक्तः सः, "तात ! वेश्या गमनं तु न शुभाचरणमस्ति किन्तु व्यभिचारः कथ्यते स, तस्मान्नैतदनुष्ठेयम्।" पुत्रेणोक्तं "यदेकवारं त्ववश्यमेवैतदाचरिष्यामि।" तदा जनकोऽभिहितवान्—'न मन्यसे चेत्, सुन्दर्या-उत्तमया नार्यै सार्धमेतद्विधातुमर्हसि।'

ततः स द्वितीयमात्मजमवोचत्—'पुत्र ! त्वं तु शुभाचारवान्भविष्यसि ? द्वितीयस्तनयोऽभ्यधात्—'जनक ! सदा शुभान्येव कर्माणि विधास्यामि, नूनमेव परमेकदा सुरापानं विधास्यामि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation

एतदाकर्ण्य पिताऽवदत्—'हे बाल ! सुरापानं तु न सज्जनैर्विधीयते, निन्दितमेतत्समाजे तस्मान्न त्वया सुरा पेया।' पुत्रोऽगादीत्—'हे तात ! एकवारं तु नूनं मया मदिरा पेयैव, द्विवारं न पास्यामि।' तच्छ्रुत्वा मरणासन्नो जनक उवाच—'पुत्र यदि नावबुध्यसे तर्हि सर्वोत्तमामेव सुरां पास्यसि।'

पुनरनेन तृतीय आत्मजः सम्प्रोक्तः—'प्रिय तात ! त्वं तु नाचरिष्यसि किञ्चिदशोभनं कृत्यम् ?' ततस्तृतीयेनाभिहितो बालेन स्वपिता—"जनक ! अन्यत्तु किञ्चिदप्यसामाजिककार्यं नानुष्ठास्यामि परमेकदा चौर्यकर्म करिष्यामि नूनम्।" एतदाकर्ण्य पिताऽऽचख्यौ—'तात ! नेदमुचितं कर्मविद्यते, अनेन राजदण्डभाग्भविष्यसि।' ततः स उवाच—'यत्किञ्चिदपि भवेत्किन्तु चौर्यमवश्यमेव विधास्ये।' ततः पित्रा समाख्यातः सः—'पुत्र ! यद्येवं तर्हि सर्वोत्तमवस्तुन एव चौर्यं सम्पादनीयम्।'

ततः पश्चाच्चाभिदधे जनकस्तुरीयं सूनुमात्मनः "हे प्रिय सूनो ! त्वं तु नाचरिष्यसि निन्दितं किञ्चित्कर्म ?" स प्राह—'पितर्हे सकृद्द्यूतक्रियां करिष्यामि केवलम्, नान्यदनाचारमाधास्यामि।' ततः पिता समभाणीत्—'पुत्रक ! नैतदाराधनीयं त्वया, द्यूतेन नलो राजा स्वराज्यादपि भ्रष्टोऽभवत्। युधिष्ठरोऽपि द्यूतक्रीडनेन सर्वान्भ्रातृन् निजसर्वप्रियामपि जायां राज्यञ्चापि पराजितवान्।' परं नासौ बालोऽमन्यत। तदा तत्पित्रा स भणितः, 'आत्मसूनो ! यद्येवं नावगच्छसि तात ! तदा केनचिदुत्तमेन पुरुषेणैव सार्धं त्वया द्यूतक्रीडा क्रीडितव्या।'

अथ पञ्चमी कन्यापि तेन सम्पृष्टा—'पुत्रि ! त्वं तु नाऽनाचारमुपपत्स्यसे कमपि ?' साऽब्रवीत्—'तात ! न किमपि तथा चरिष्यामि यथा भवदीयं नाम कलङ्कितं स्यात्, परमेकवारमेव परपुरुषसुरतसुखमनुभविष्यामि।' पिताऽगादीत्—'वत्से ! नैवं सदाचरणमस्ति। एतेन कुलं निन्दितं स्यात्, पुरुषेषु चापभाषण मुपपद्यते।' परं तया भूयोऽपि विहितोऽनुरोध एतदाचरितुम्। ततः पिता समागादीत्—'यदि ते वाञ्छा भवेदीदृश्येव तर्हि केनाप्युत्तमेन युवकेन साकमेव रंस्यसे।

इति सर्वानिवोत्तमेन कार्यमित्यभिधाय स तेषां जनकश्चिरनिद्रायामस्वपत्।

यदा प्रथमो युवा चिन्तितवान्यदधुना मया वारवधूसेवनं विधेयं तदा स वेश्यालयमुपससाद। तत्र चैकां गणिकामपृच्छत्—'गणिके अहं वाञ्छामि सर्वोत्तमां वारवधूमेकां ब्रूहि का सा? तथाभिदधे सा—'यदहमेवोत्तमाऽस्मि मामुपतिष्ठ।' 'किं ते मूल्यम्?' पृच्छायां सा—उत्तरवती यत्पञ्चदशरूप्यकाणि ग्रहीष्यामि। ततः सोऽन्यामुपतस्थे पृष्टवांश्च तस्याः शुल्कम्, तया विंशती रूप्यकाणि निगदितानि इत्थं क्रमशः पृच्छन्सोऽनेका नारीः प्रति समगच्छत्, अन्तिमया कयाचिद्वारवध्वा रूप्यकाणां शतं स्वशुल्कमभिहितम्। सर्वाश्चात्मनः सर्वोत्तमतामुदाजह्रुः। परं न स निर्णेतुं समर्थो जातो यदाऽऽसां सर्वासामेव कोत्तमा वर्तते। तमीदृग्भ्रमन्तमेका स्थविरा गणिका चिरकालातपश्यन्ती समवर्तत। तया स समाहूतो निजनिकटे पृष्टश्च, 'युवन् ! कथमेवं भ्रमसे, किं वाञ्छसि नायाता कापि ते मत्याम् ?' स युवा अकथयत्-'वृद्धे ! अहं सर्वोत्तमां नारीमुपभोक्तुम् वाञ्छामि। तदा तया स्थविरया वेश्यया निगदितो धर्षितश्च स युवा—अरे मूर्ख ! अत्र विमार्गसे सर्वोत्तमां नारीं याः सर्वदाऽनैकैर्बहुशो वारं वारं ग्राम्यधर्मेणोपभुज्यन्ते, सर्वोच्छिष्टाश्च ताः। किमु न त्वया श्रुतमेतत् ——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एता हसन्ति च रुदन्ति च वित्तहेतो—
र्विश्वासयन्ति पुरुषं न तु विश्वसन्ति।
तस्मान्नरेण कुलशीलसमन्वितेन,
वेश्याः श्मशानकुसुमा इव वर्जनीयाः ॥

अपेहीतः, गच्छ स्वगृहं गृहलक्ष्मीः सर्वोत्तमा नारी तु स्वपत्नी विद्यते, तामेवोपयाहि किमत्र पङ्के रत्नमन्विष्यते, इति सलज्जं स परावर्तत निजगेहम् गर्ते पतनाच्च परित्रातः।

द्वितीयोऽप्यस्य भ्राता यदा सुरापानार्थी मदिरालयमुपस्थितस्तत्र मद्यविक्रेतारं आह—'देहि भो मह्यं तादृशीं सर्वोत्तमां मदिरां यां पीत्वा स्वाभिलाषापूर्तिं करोमि।' तेनास्मै काचकूपीं (बोतल) प्रदाय कथितम्-भो गृहाणेमामुत्तमां वारुणीं यस्याः पानेन तृप्तिश्च ते भविष्यति, तदा स युवाऽवोचत्-यत्सर्वोत्तमां सुरामहं याचे, तेनापि विक्रेत्रासौ अभिहितः—'भो एषा रम, इयञ्च जिन, असौ च ब्राण्डी वर्तते यामिच्छसि तस्या मूल्यं मे प्रदेहि पिब च सौख्याशया।' भूयोऽपि युवकोऽसौ अगादीत्—'भो वाञ्छामि सर्वोत्तमां मदकारिणीं मदिरामिति मुहुर्मुहुः प्रार्थितो भवान् मया।' तच्छ्रुत्वा कोपाविष्टः करालस्तर्जितवान्स्तं युवानम्, 'भो ! जानीहि रे ! यदि सर्वोत्तमां मदिरां वाञ्छासि तर्हि दुग्धं पिब, घृतं खाद, सर्वाधिकमदकारिणमन्नं भुंक्ष्व, नात्र तादृशी मदिरा यादृशी याच्यते त्वया।' इति श्रुत्वा तस्या विक्रेतुः ज्ञानमयीं वाणीं, स यथागतस्तथैव परावर्तत निजसदनम् अपीत्वैव। इत्थं सोऽपि पापगर्तपतनात्सुरक्षितः सञ्जातः।

तृतीयश्च तदनुजोऽपि चौर्यकर्मकरणाय गृहान्निर्गतोऽपृच्छच्च कमपि मेधाविनं मनुजम्, 'श्रीमन्नहं चौर्यवृत्तिमाश्रित्य सर्वोत्तमं चौर्यकर्म कर्तुं समीहे, मामादिशतु भवान्स्तं पन्थानं येन गत्वाहं स्वाभिलषितमाचरामि।' तदाकार्ण्यासौ सुमेधाः तमब्रवीत् यद् भोः क्षुद्रं चौर्यकर्म, किमर्थं वाञ्छसि सर्वोत्तमं चौर्यमाधातुमित्युक्तवति तस्मिन् स पुनराह—'मम जनकेनाहमादिष्टोऽस्मि।' 'यदि चौर्यमेव कर्तुमिच्छसि तर्हि भगवन्मन्दिरं प्रयाहि तत उच्चस्थानं कुत्रोपलभ्यते।' इति श्रुतिपथगतं विधाय स प्रचलितो विष्णुमन्दिरं प्रति। तत्र तेन पृष्टः स देवपूजकः (पुजारी) यच्छ्रीमन्नहमभिलषामि सर्वोत्तमं चौर्यं विधातुमादिशतु भवान्यदत्र किमस्ति वस्तु चौर्यकरणाय? तमृजुस्वभावमनुष्यमवगम्यापचितिविधाता (पुजारी) प्राह—'भ्रातः ! यदि चौर्यार्थमेवात्रागतोऽसि तर्हि भगवतो विष्णोर्भक्तिध्यानं चोरय येन सद्गतिरेव भविष्यति, त्वदीयजीवनस्य साफल्यमपि।' इति श्रुत्वा स युवा प्रभोर्ध्यानमाक्रष्टुं (चोरयितुं) उत्साहितोऽभूत्। शनैः शनैः स प्रभु भक्तिमेवाभजत्। गृहागतोऽपि सर्वं विस्मृत्य परमेश्वरध्यानमेवाऽचोरयत्। सुरक्षितश्च दुरितगर्ते पतनात्।

ततस्तुरीयोऽनुजस्तेषामालोचयत्-यत्साम्प्रतं मयापि द्यूताऽऽहवो योजनीयः। इति सम्प्रधार्य स प्रपेदे क्वचिन्महाविद्यालये क्रीडाध्यापकमाह च—'भो विद्वन् ! आख्याहि मे तन्मार्गं येन सर्वोत्तमं द्यूतमाचरेयम्'-तेन स निगदितो—यद् 'भो यदि उत्तमेन साकमेव द्यूतक्रीडामाचरितुमभिलाषास्ति ते तर्हि प्रयाहि राजानम्। यतो हि राजा सर्वेषां पालको धनाढ्यश्च वर्तते तेनैव सार्धं क्रीडस्व।' स च विचारं परामर्शं चैमं विचार्य नृपमुपस्थातुं भयाद्वेपमानो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न शशाक। स विचारितवान्—'यदि महीपमुपसृत्य कथयिष्यामि यन्महाराज! मया सह द्यूतक्रीडामारभताम् भवान्स्तदा नृपतिः स मां परितोऽवलोकिष्यते यत्कोऽयमागतो मया सह द्यूतमाचरितुम्। तदा स मम सत्कारमपि विधास्यति कथयिष्यति च, मूर्ख! किमस्ति तव सविधे यत्पणीकृत्य क्रीडितुमिच्छसि, गच्छ पलायध्वान्यथा कारावासे स्थानमाप्स्यसि' इति विचार्य सोऽपि गृहमात्मनः समुपतस्थे राज्यदण्डाच्च विरहितः सक्षेमं सुरक्षितो बभूव।

कन्यापि तस्य पञ्चमी सन्ततिः स्वान्ते विचारयामास यदद्य मया परपुरुषरतिसुखमनुभवितुं कुत्रचिद्गमनं विधेयमिति मनसि कृत्वा साऽऽपणं वव्रजे। तत्र स्थिता च यावदेकं बलिष्ठं सुन्दरवपुषं युवानमभिवीक्ष्य निर्णयति यदसौ मम भावनानुरूपं विद्यते युवा, तावदेव ततः पश्चादायान्तमपरं युवकमवलोक्य तस्मिन्स्वरतिमाधातुमीहाञ्चक्रे तावदन्यः कश्चिदायातः ततः पश्च्चाच्चेतरः। इत्थमनेके युवानस्तस्या दृष्टिपथमायाताः परं न कमपि सा वरयितुं शशाक। प्रातरारभ्य सायन्तनकालः समजनि, सा तत्रैव स्थिता निरीक्षमाणा चावर्तत। तामीदृशीमासक्तमानसामवलोक्य काचिद् वृद्धा तत्रोपगता समुवाच च ताम्, 'पुत्रि! किमत्र स्थाने सर्वोऽपि समयस्त्वयाऽतिवाहितः स्थितया, किमिच्छसि त्वम्' इति व्रुवाणां तां वृद्धां प्राह सा, 'मातरहं स्वसद्मनः प्रचलितास्मि परपुरुषेण सह रतिभावमुपलब्धुम्, मम जनकेनाहमादिष्टास्मि-यदेत्कर्म महद् गर्हितं लोकत्रपादापकं व्यभिचारश्च विद्यते, तस्मान्नैवमाचरेः, परं यदा मया बहुशः सम्बोधितो मम जनयिता तदा तेनोत्तरं प्रदत्तमासीद्यन्नास्ति ते विचारसरणिरेतत्कर्मणोऽनुष्ठाने विरतिमापद्यते चेदुत्तमेनैव पुरुषेण तदनुष्ठातुमर्हस्यसि। अत एवाऽहमुत्तमपुरुषविचयने न शक्नोमि, तदर्थमेव समयोऽयमतिवाहितो दीर्घो मया। तद प्रबोधयन्ती सा स्थविरा तां कन्यां समबोधयत्—'पुत्रि! अत्र गवेषयसि रन्तुमुत्तमं मनुजम्, अत्र तु न जाने कति युवानः स्थविरा बालकाश्च परिव्रजन्ति। किं सर्व एवोत्तमा विद्यन्ते? एषु केचन हिंसका केचन लुब्धाः केचित्कामुका अपरे क्रोधनाः केचिच्च धनिका इतरे दारिद्र्योपहता विचरन्ति। कथं ज्ञास्यसि यदेषु सर्वोत्तमः पुरुषः कः? मुग्धे, बालिके! प्रयाहि स्ववेश्म एव, स्वपत्युरुत्तमः कोऽपि नास्ति नार्यै। अतः स्वधवमेवोत्तमं मानुषं विज्ञाय गृहं परावर्तस्व।' वृद्धाया एवं ज्ञानपूर्णानि वचांसि ज्ञात्वा सा कन्या निजगेहमेवोपयाता सुरक्षिता च जाता कामगर्ते पतनात्।

एवं तेषां पितुरेकमेव वाक्यं (उत्तमम्) विज्ञाय ते सर्वेऽपि सा च दुहिता तस्य पापगर्तपतनाद्विमुक्ताः सुरक्षिताश्च समभवन्।

एवमेवाद्य सर्वे बालका स्वपित्रोः शिक्षाप्रदवाक्यानि श्रुत्वा तदाचरणे मनः संनिधाय स्वस्थाः सुखिनो भवितुमर्हन्ति।

तथा चायं श्लोकः—

पित्रोरद्यापि शिक्षां चेदामन्यन्ति निजार्भकाः।
तदा तेषां भवेच्छ्रेयः सफलं जीवनं भवेत्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवीरस्य सौभाग्यम्

—डॉ. रमाशंकर-मिश्र-'मधुपः' (आचार्यः)
मुनीश्वरदत्त कालोनी, पल्टन बाजारः, उ. प्र.—२३०००१

अस्ति दक्षिणस्यां दिशि समस्त-समस्त-सन्तत-सन्तापा तापाकुल-जन-तपत्रयोपशमन-प्रसरत्-प्रतापा कलकलोत्तरलतर- तरंगरंगभंग- भंगी- कोटि- चोचुम्ब्यमान- नर्मदा- वीचि- निचय- प्रक्षालित- पापा निरन्तर-निरन्तराय-दोधूयमान-धूमा-ध्वज-धूम-ध्वजानुमीयान-नैक-यागादि-कला-कलापा पेपीयमान-पणव-मुरज-तन्त्री-तारसहस्रचुम्बित-मूर्च्छनोज्ज्वमीत-स्फीत-संलापा, प्रतिप्रदोषमुपचीयमानतरुलतोपलासितमहाचत्वरोपगत-नगरनर-निकर-वितायमान-धर्म्म-मर्म्म-वार्तालापा सैन्यशक्तिमती भावुकजन-भव्यभक्तिमती 'माहिष्मती' नाम नगरी।

या च गरीयसी गन्धर्वपुर्य्याः, महीयसी महेन्द्र-नगर्याः, साधीयसी साधुतायां, पटीयसी प्रजा-पटल-पाटवोपपादने, बलीयसी दुर्बलदलरक्षण-विचक्षण-प्रबल-जन-संवलने, द्राघीयसी दीर्घदीर्घतरद्रुततमजव-निर्जित-शक्र-वाजि-हयनिचय-खुरोत्खातैः, द्रढीयसी पुरन्दर-मतंग-गति-विजित्वर-कुञ्जर-पुञ्ज-महानिनादैः।

आसीच्च तस्याः प्रशस्ता प्रशस्ताखिल-गुणगणौदार्योदीरित-विशद-वृत्तः प्रजापालनोपलालित-निर्व्याज-न्याय-प्रवृत्तः पद्मापति-पाद-पद्म-मकरन्द-मिलिन्दायमानो मनु-शिवि-दधीचि-हरिश्चन्द्र-नल-युधिष्ठरादि-समानो वरुणेद्रादि-वृन्दारक-वृन्दजेगीयमान-मानः समाराधनारधित-गरुडध्वजो 'नीलध्वजो' नाम नृपः।

तस्य धर्मधौरेयस्य धर्मांगनाऽऽसीत् 'जुन्हा'-समाख्या ज्योत्स्नादेवी गंगेव वसुमती, वसुमतीव सुमतिः, शकुन्तलेव सकुन्तला, कुन्तीव कुन्ताक्षेपदक्षा, दक्षात्मजेव सती, सतीव्र-व्रत-प्रतापा सावित्रीव सवित्री, सतत-सौजन्यजन्य-यशोधवला, धवलांगी-तनुलता, धैर्य-धन-धान्या वदान्या मानि-मान्या काचन राजकन्या।

तयोश्च सुधीरयोः सुवीरयोर्निरुपाधि-धर्म्म-मर्म्म-परिपालन-प्रवीणयोर्दम्पत्योस्तनूजः 'प्रवीरो नामान्वर्थनामा सहज-सौजन्येन, निश्छलोच्छलदच्छचक्षुः। स हि प्रेम्णा, प्रजोपरि-परिपातित-प्रणय-चुम्बितापांग-भंगेन, मुकुन्द-चरणाम्बुज-मरन्दतीव्रता-पिपासया, पुराणागम-निगम-जिज्ञासया, अप्रतिम-शक्त्या, भावावदात-भक्त्या अतारल्येन, सारल्येन च पितरावनुचकार।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्राज्यमिन्द्रप्रथ-साम्राज्यं पालयन् सत्यसदाचार-सुस्थिरो युधिष्ठिरो नाम पाण्डव-ज्येष्ठो, ज्येष्ठो धानुष्केषु, महिष्ठो महारथेषु पटिष्ठः प्रजा-पटल-पालना-ध्वरेषु, वरिष्ठः प्रवर-वरिवस्या-व्रतेषु गोविन्द-भ्रूभंग-नर्तितात्मा साधु सम्पादयदश्वमेध-संज्ञमनितरजन-सम्पाद्यं भूरि-वित्त-प्रतिपाद्यं क्रतु-विशेषमशेषम् ।

प्राक्तन-परम्परा-पथमनुपालयता च धर्मध्वजेन युधिष्ठिरेण मुक्तः कोऽपि शक्राश्व-शत-विजित्वरो वाजि-वरः विशाल-वाहिनी-परिवृत्तोऽर्जुनयशसा चार्जुनेन नेनीयमानः । अर्जुनेन साकं यियासुरपि माया-नियन्ता समर-रथ-यन्ता भगवान् रुक्मिणी-रजनी-मृगाङ्को मुकुन्दो वीर्य्यावलेप-लेश-लिप्त-चेतसा मध्यम-पाण्डवेन निखिलमपि महीतलं करतलामलकीकर्तुं पण्डितम्मन्यमानेन स-व्याज-विनयं निवारितः । प्रख्यात-पराक्रमस्य विलक्षण-शर-निकर-चालनैक-निष्णातस्य धनञ्जयस्य निरुपम-शौर्य्योज्ज्वल-यशांसि श्रावं श्रावं पथ-सन्निपतिताः परस्सहस्र-पार्थिव-निचया निक्षिप्त-शस्त्रास्त्र-सञ्चयाश्चाकचिक्य-चुलुकीकृत-चक्षुष्काः कामपि तदायत्ततामूरी-कुर्वन्तः सोपायन-पाणि-पल्लवाशशरणं ययुः शरण्यं पाण्डवाग्रजम् ।

शनैश्शनैर्गच्छताऽनेहसा 'महिष्मती'-नगरी-परिसरोऽध्याक्रान्तस्तेन यागवाजिना सराजित-राज-रजिना । कर्णातिथीकृत्य च पार्थ-नाम अपार्थीकृत-प्रचुर-पराक्रमो नरेन्द्र-मण्डल-मौलिमाला-समालिंगित-पादयुगलोऽपि नीलध्वजः सशिरः कम्पमकम्पत कम्पितांगः । प्राणवल्लभस्य तामिमाम श्रुतपूर्वांकातरतां निवारयितुकामाऽभिरामा नर्तित-कामा रामा 'ज्योत्स्ना' नैकधा नैकशो नैक-निदर्शन-प्रदर्शनैर्महीन्द्र-मानसे प्रोत्साहन-धैर्य्य-शौर्य्य-सम्पदं प्रज्ज्वालयितुं चकमे, परं न लेभे साफल्य-फल-लवम् । सव्यसाचि-कीर्ति-कम्प्र-मानसो नील-ध्वजो न मनागपि योद्धुमना व्यालोकि ।

निराश-हृदया सहृदया कृपाकृपण-कृपाण-पाणितला च ज्योत्स्ना स्व-प्राणोपमं खलदल-दमनं विजित-मदनं विंशत्यब्दकल्पमल्पवयसं तनयं वीरवरं प्रवीरं साहससम्पदोल्लासयन्ती नेदिष्ठं बलिष्ठं प्रबल-बल-संवलितं फाल्गुनं फ्ल्गूकर्तुं प्रेरितवती ।

अर्जुन-शौर्योच्चलितचेताः कृष्ण-भक्तः प्रवीरः प्रोवाच सप्रश्रयं-"मातः! कृष्णसारथिः प्रचण्डतरः—प्रसादित-पुरारातिर्गाण्डीवी ननु केन योध्यो जेयो वा। अतएव पितापि मे धीमान् बलिष्ठो नाचीकमत्तेन सह विवाद-चिकीर्षाम् । क्व चाहं तदग्रे तृणोपमः ।

विगलित-धैर्यस्य पुत्रस्य तानीमानि वचांसि श्रुत्वैव कोपस्फुरिताधरोत्तरौष्ठी चञ्चललोचना शौर्य-नर्तितांगी जननी ज्योत्स्ना सरोष-भ्रू-क्षेपमाक्षिपन्ती तं प्रवीरं निजगाद-"कोऽर्थस्त्वया कातरेण जन्मवता । हंहो ! त्वया पुत्रवत्यपि नात्मानं सपुत्रामिव मन्ये । यस्त्वं वीर-शत्रु-नामैव निशम्य शान्तोत्साह इव, रणशिरश्च्युत इव, शस्त्रास्त्र-शताहत इव, समरशौर्य्य-मूर्च्छित इव अवीरोऽपि वीरायसे, अगत्वाऽपि पलायसे, अयुध्यमानोऽपि मृतायसे, स त्वं जीवन्मृत एव, महीमारकल्पो, मदीयकुक्षि-कच्छप इव मामेव भृशं तुदसि अरुन्तुदः । अतश्च सान्द्रसिन्दूर-पूर-पूरितसीमन्तस्त्वं तिष्ठान्तःपुरे पित्रा समम्। अहमेकाकिनी कराल-करवाल-हस्ता वीरवर-प्रशस्ताऽर्जुनं पराजेतुं व्रजामि ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सव्याजं परिवर्धितोत्साह-वैभवः प्रवीरो मातृचरणौ नमन् प्रणमंश्च भगवन्तं नन्द-नन्दनं सच्चिदानंद-गृहीत-पुष्कल-चमू-चमत्कृत-चित्तो भक्तिवित्तो युद्धाय प्रवृत्तो गजेन्द्र-यूथे मृगेन्द्र इव जगर्ज पार्थ-वाहिनी-मुखे सचापटंकारं साहंकारम् च चकार। अकृष्णेन कृष्णानुरञ्जितात्मना महात्मनाऽर्जुनेन समं युध्यमानः प्रवीरस्तं मूर्च्छितमकार्षीत्। संस्मृताहंकार-भारश्चार्जुनः प्रह्वमूर्धा कृष्णं भूयो भूयो विनिन्ये, रथोपरि चाभ्येतुमभ्यर्थयामास। कृष्णोऽपि भक्तिवश्यस्सद्य आपेदे गाण्डीवि-स्यन्दनम्। अर्जुनेनाद्य पराजितः प्रवीरः।

प्रवीरेणापि कृष्ण-निस्तन्द्रभक्तेन प्रार्थितः कृष्णः पार्थ-रथादपागतः, पार्थेन प्रार्थितः पुनरपि तदीयरथमभ्याजगाम। पुनरपि प्रवीर-भक्त्याऽनर्गलतरंगयाऽर्जुनरथं विहाय भगवान् वासुदेवः प्रवीरं प्रापद्यत। अथ प्रवीरेण दामोदरः पादपस्कन्धे बद्धोदरीकृतः। पुनरपि धनञ्जय-विलापं श्रुत्वा एकवपुषाऽर्जुनरथम्, अपरवपुषा च तरुशाखामालम्बे जगदालम्बः। अहो कीदृशोऽयं भक्तद्वय-भक्ति-वल्लरि-पाशबन्धो-ऽमन्दो मुकुन्दस्य।

प्रवीरमाता ज्योत्स्ना तु गंगां प्रसादितवती, तया शिवः प्रवीरपक्षतो योद्धुमभ्यर्थितोऽपि न स्वीचक्रे तदनुरोधं कृष्ण-विरोधं वा। प्रवीर-धर्मांगना मदनमञ्जरी असाधारण-कृष्णभक्त्याऽधिगत-विचित्रचमत्कारोच्चया खड्गहस्ता निशीथेऽर्जुन-चमू-शिविरमधिशिश्ये। द्वारपालीभूतं भूतेशं प्रार्थ्य कैलास-पथ-पथिकीकृत्य च सा मन्दं मन्दं पदं दधाना कृष्णद्वारं समुपतस्थे। साक्षात् कृष्णमेव द्वारपालं प्रणम्य सा भगवन्तं स्व-पति-विजयार्थमभ्ययाचत। भगवत्-प्रदत्त-कौमोदकी-चक्र-युक्ता सा हृदि भगवत्कृपां ध्यायन्ती-स्व-सदनं प्रत्याजगाम, पतिश्च वरस्वरूप-गदाचक्रदानेन सनाथीकृतः।

अपरेद्युश्च समुदयति भगवति गभस्तिमालिनि लब्धानन्तानन्दरराशिः सुधीरः प्रवीरः कौमोदकी-चक्र-चमत्कृत-हस्तोऽर्जुन-माजुहाव महाहवे।

अर्जुनोऽपि प्रवीरं प्रेक्ष्य गतासुरिव हरिं स्वरथस्थीकृत्य योद्धुं प्रववृते। प्रवीरेण पुनरपि भगवान् सरोष-प्रणयं भर्त्सितः। भगवानपि प्रवीर-सान्निध्यं समेत्य प्रवीरेण सपाद-संवाहनं वावन्द्यमानोऽपि मायान्दोलित-भ्रूकम्पेन पार्थं प्रवीर-शिरः कर्तनाय प्रेरयायास। भृशं समवगत-भगवल्लीलेन पार्थेनापि प्रवीर-शिरस्तु हसतैव खड्गेन कर्तितं विनर्तिततञ्च क्षितितले कन्दुकवत्। प्रवीरतेजोऽपि हरौ विलीनतां ययौ।

अथ भगवान् साश्रुलोचनः स्वयमेव प्रवीरस्य शौर्य्यं सौभाग्यञ्च अर्जुनापेक्षया प्रशस्यतरं प्राख्यापयत् तदीय-पितरौ, मदनमञ्जरीञ्च शतशः प्रशशंस। पितरावपि हरिचरणप्रपन्नं वीर-गति-प्राप्तञ्च पुत्रं श्रुत्वा कृतार्थतां प्रपेदाते। मदन-मञ्जरी पत्युश्शौर्य्य-चुम्बितं यशो मुखमण्डलं च स्मारं स्मारं चिताजिरे स्मृतिशेषतामेव प्रापद्यत।

अहो विचित्रं भगवद्भक्तस्य पितृ-व्रतस्य वीरवरस्य प्रवीरस्य सौभाग्यम्। अद्यापि प्रेरणासोपानभूतः प्रवीरो जीवत्येव।

"यस्य कीर्तिः स जीवति।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्याक्का

—के. रा. जोशी
२/२ एम. आई.जी. कालोनी बंजारी नगरं, नागपुरम् -४४०००३

'अहह आर्या गता' इति शब्दैः कर्णयोः पतितमात्रैः अहं जागरित इव पुरः अपश्यम्। पुरस्तादुपस्थित आसीत्, चिरमित्रं घनश्यामः। 'घनश्याम ! क्व नु खलु गता रे आर्याम्बा' सहसा अहम् अपृच्छम्। 'नहि ग्रामान्तरं गता वयस्य, इतः परं न सा ते दृष्टिपथम् उपयास्यति। हन्त ! गता सा देवलोकम्।' घनश्यामः रुद्धकण्ठः सखेदम् अवदत्। तान् तप्तशूलायमानान् शब्दान् आकर्ण्य उद्ध्वस्तमिव आत्मानं व्यभावयम्। घनश्यामः ब्रह्मपुरीनामकात् ग्रामात् कतिपयक्रोशान्तरं पद्भ्यामेव आक्रम्य, यथाकथंचित् बसयानं प्राप्य नागपुरे उपस्थित आसीत्। प्रवासखिन्नः अस्मत्पितृचरणैः प्रेषितः अश्रुपूर्णलोचनः अप्रियनिवेदनार्थं स्वभाग्यम् अनिन्दत्। नागपुरतो नातिदूरे आसीत् ग्रामटीका ब्रह्मपुरी। परं तदानीं तावदपि अन्तरं समुचित-प्रवाह-साधनरहितमासीत्। तत्रासीत् नः कृषिभूमिः पुरातनं च गृहं पूर्वजैः विरचितम्। परं न तत्र ग्रामे काचन सुविधा आसीत्। अतः अन्त्ययात्रोचितां समुचितसामग्रीं नागपुरे संपाद्य सम्बन्धिन आप्तान् संमेल्य सूर्यास्तसमयात् पूर्वं ब्रह्मपुरी गन्तव्या आसीत्। आसीद् रविवासरः। तदानीं मदीया बी.ए. परीक्षा प्रावर्तत। शनिवासरे एकं प्रश्नपत्रं दत्तोत्तरमभवत्। अन्येद्युः सोमवासरे निर्धारितस्य दर्शनप्रश्नपत्रस्य चिन्तां कुर्वाणः अभवम्। परं विषमा खलु परिस्थितिः संजाता। अतः सर्वाम् परीक्षाचिन्तां संत्यज्य समुचितां सामग्रीं संपाद्य कतिपयसंबन्धिजनसहितौ आवां ब्रह्मपुरीं प्राप्तौ। सूर्यमण्डलम् आरक्तम् अस्ताचलं समुपसर्पति स्म। गृहे महानासीत् ग्रामजनसंमर्दः। सर्वे सखेदा म्लानवदना अवर्तन्त। अहं गृहान्तः कष्टेन प्रविष्टः अपश्यम्-गृहाभ्यन्तरे एकतः मत्पितामही दीर्घनिद्रां गता, संप्रति वीतचिन्ता अशेत। या पुरा मयि दृष्टमात्रे सति पुरः सर्पन्ती प्रफुल्ललोचना चरणयोः नमन्तं मामुन्नमय्य चन्दनशाखायमानेन करेण मत्पृष्ठं परामृशन्ती 'कियन्नाम तात कृशोऽसीति समालपत्। परं हन्त सा अद्य बद्धमौना पिहितनेत्रा गतसंज्ञा भुवि स्थिरा आसीत्।

इयं मत्पितामही। आर्यां तां वयम् अक्का नाम्ना समबोधयाम। पुरा खलु सर्वो ग्रामः एक कुटुम्बमिव सुखेन व्यवाहरत्। आसन् लोका विभिन्नजातीयाः, नाभवत् तेषु समानः अन्नोदकव्यवहारः। परं ग्रामसंबन्धेन कश्चित् पितृव्यः, कोऽपि मातुलः, काचिद् भ्रातृजाया, काचित् पितृव्याणी, काचित् मातृष्वसा, काचिद् भगिनी, कश्चिद् भ्राता इति संबोधनेन ग्रामजनाः स्वस्नेहबन्धान् स्थापयन्ति स्म। प्रसवकार्यतत्परां मातङ्गगृहिणीमपि मातृष्वसृत्वेन, अन्त्यजं वा मानुजत्वेन संबोद्धुं जना न संकुचन्ति स्म। संप्रति पूर्वनिर्दिष्टः घनश्यामः वर्धकिपुत्रोऽपि शैशवात्प्रभृति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रीडासहचरः नूनम् अस्मत्सहोदर इव व्यवाहरत् । संप्रति तु समानोदकव्यवहारम् आचरन्तोऽपि नानाहितसंबन्धैः परस्परं द्वेषभावम् अप्रीतिं वा भजन्तः जनाः ग्रामेष्वपि वृद्धिं गताः इति महत्खेदास्पदम् ।

अस्मत्पितामही अस्मत्पितामहेन परिणीता अतितरुणे वयसि अस्मिन् ग्रामे प्रविष्टा । नैकसुखदुःखानां साक्षिणी इयं ग्रामाटिका तस्याः प्रिया आसीत् । तत्र चिराय वसन्ती अस्मदीया आर्याक्का आयुःक्रमेण ग्रामवासिषु प्रायो ज्येष्ठा अभवत् । सर्वे ग्रामस्थाः ताम् आर्या अम्बा इति सम्बोधन्ति स्म । काऽपि ग्रामकुटुम्बिनी निःसंकोचं स्वां व्यथां तस्यै न्यवेदयत् । पौषमासे रविवासरे सूर्यनारायणस्य कथां श्रोतुम् अपराह्णकाले स्त्रीसमाजः अस्मद्गृहे नियमेन समामिलत् । कथान्ते बदरीफल-वितरणेन समाप्तिं गच्छन् स संवादः सर्वेषां स्मरणीय आसीत् । यदि कश्चिद् बालो वा कुटुम्बिनी वा ज्वरपीडिता तर्हि रात्रौ आर्याम्बा अन्धकारम् अगणयित्वा दीपिकाहस्ता रोगिणः अनामयं प्रष्टुमगच्छत् । तस्याः पेटिकायां तमालपत्र-पूगीफलवत् ग्रामसुलभानि कानिचिद् औषधान्यपि अतिष्ठन् । आर्याम्बां गच्छन्तीं पश्यन्तः शिशवः तान् अनुसरन्तः शर्कराखण्डान् अलभन्त । इतः परं सा चैतन्या मूर्तिः न स्यादिति सर्वोऽपि ग्रामसमाजः तस्यै चरमप्रणामं समर्पितवान् । ततो रात्रौ चन्द्रभागातीरे आर्याक्कायाः पार्थिवं शरीरम् अग्निसात् कृत्वा सर्वे निवृत्ताः ।

सोमवासरे अपराह्णे दर्शनप्रश्नपत्रं मां नागपुरे प्रतीक्षते स्म । रात्रौ जागरणेन चुर्चुरायमाणाभ्यां नयनाभ्यां कथंचिद् उत्तरपत्रिका लिखिता । परम् आर्याक्काया नप्ता परीक्षायशः लब्धवान् । मदीया आर्याक्का न कदापि मम अकल्याणं कृतवती । नूनं म्रियमाणयाऽपि तया परीक्षायाम् अन्तरालः नोत्पादितः ।

कृशाङ्गी गौरतनुः सुनासिका कदाचित् काषायवस्त्रधारिणी, क्वचित् श्वेतवस्त्रधारिणी तस्याः मूर्तिः मनसि तिष्ठति । तस्या ऋजुतां प्रकाशयन्तः निश्छलाः शब्दाः अद्यापि मम स्मृतिपथे वर्तन्ते । अयं जनः तस्याः ज्येष्ठः पौत्रः । तदीयामङ्गुलिमवलम्ब्य प्रथमं पदक्षेपं स शिक्षितवान् । शैशवात् प्रभृति तादृशं मां महता स्नेहेन सा वर्धितवती । स्नानं, भाले चन्दनतिलकः, देवपूजायां प्रवर्तनं, खलु सर्वं तया कारितम् । वत्सलायाः तस्या अयं जनः महत् प्रीतिस्थानम् आसीत् ।

अस्मत्पितामहः तरुणे वयसि ईति-(महामारी) निमित्तम् उपलभ्य दारुणेन कालेन कवलितः । अस्मत्पितामही अपि महामारीपीडिता । परम् अपत्यभाग्येन कथंचिद् रक्षिता । ततः प्रभृति द्वौ पुत्रौ कन्यका च एका तया संवर्धनीया अभवन् । त्रयाणां सवर्धनं महता कष्टेन तया कृतम् । न कदाचित् सा दैन्यं प्रकाशितवती । न मातृमुखं न वा भ्रातृमुखं तया दीनदृशा अवलोकितम् । परस्तात् ज्येष्ठः पुत्रः श्रमशीलः गुणवान् कुटुम्बपालकः अभवत् । तेन कनीयसो भ्रातुः शिक्षणं संपादितम् । कनीयसी भगिनी गुणवते वराय दत्ता । भ्रातुरपि विवाहः संपादितः । आर्याक्कायाः अयं कनीयान् पुत्रः रूपगुणसंपन्नः लोकाराधनचतुरः अभूत् । आर्याक्काया जीवने कष्टमये नूनं श्रमाः सार्थका अभूवन् इति समाधानक्षणः उत्पन्नः । परं पुनः विषमेण दैवेन कालचक्रं परिवर्तितम् । कनीयान् पुत्रः दुर्विषहेण व्याधिना कवलितः कीर्तिशेषः संवृत्तः । संप्रति पुत्रकन्यासहिता पुत्रवधूः परिपालनीया अभवत् । आर्याक्का पुनरपि वैधव्य- दुःखदूषितं स्वजीवनं स्मरन्ती समापतितसंकटानां प्रतीकाराय सिद्धा अभूत् । गच्छता कालेन स्वमनः कार्यान्तरेषु कथं कथमपि व्यापारयन्ती अस्मदार्याक्का तदीय-सहिष्णुता-परीक्षकेण दारुणेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवेन आदौ ज्येष्ठदौहित्रस्य अनन्तरं च तरुणपौत्रस्य निधनेन भृशं पीडिता समाकुला च अलक्ष्यत। परं तत्सर्वम् अन्ततः अवधूय कुटुम्बपरिपालने सिद्धा सा ज्येष्ठपुत्रस्य महदालम्बनमभूत्।

अहं ज्येष्ठः कुलतन्तुः पौत्र इति मयि सा नितान्तं स्निग्धा अभवत्। शैशवात् प्रभृति अयं जनः तस्या अनुगामी अभूत्। मम भोजनं, शयनं, रात्रौ कथाकथनं वा सर्वमेव सा विदधाति स्म। एकदा केनापि प्रयोजनेन रामटेकक्षेत्रं गच्छन्ती आर्याक्का अनुसरणनिर्बन्धेन बालभावात् आक्रोशन्तं मां बालवयसं सहैव नीतवती। तत्र अम्बकुण्डजलेन स्नातुम् आवां पितामहीपौत्रौ गतवन्तौ। आदौ अयं शिशुः तया स्नातानुलिप्तः अम्बकुण्डशिलासोपने 'अत्रैव तिष्ठ'—इति निर्दिश्य स्थापितः। पश्चात् समाहितेन मनसा सा जले अवतीर्णा। अम्बकुण्डस्य तटे आसीद् किमपि लघुतरं शिवमन्दिरम्। स्नाता यात्रिकाः तत्र गत्वा कुण्डजलेन शिवपिण्डीम् अभिषिञ्चन्ति इति मया अवलोकितम्। बालसुलभेन चापलेन कौतूहलं मनसि धारयता मयाऽपि तत्कर्तव्यम् इति मनसि कृतम्। किमपि पात्रमासाद्य आरब्धः शिवपिण्ड्याम् अभिषेकः। शिलासोपानपङ्क्त्या अवतरणं, जलग्रहणं शिवपिण्ड्याम् अभिषेकः, इत्यासीत् मम मनसः अनुकूलः कार्यक्रमः। एवं स्वरसेन कुर्वतः शिशोः मम पदं कदा स्खलितम् इति मया न ज्ञातम्। अम्बकुण्डजले अहं मग्नः। 'अहो शिशुः जले पतितः' इति काचित् तत्र स्थिता स्नानमाचरन्ती महिला उच्चैः आक्रोशत्। दूरतः स्थिता आर्याक्का तदशृणोत्। सहसा सा धाविता। स्वनप्ता उन्मज्जन् निमज्जन स्वपुरतः तिष्ठतीति सा परमव्याकुला स्थिता। तस्याः आक्रोशं श्रुत्वा इतरे यात्रिका अधावन्। अत्रान्तरे अम्बकुण्डे स्थितया आदौ कृताक्रोशया महिलया साहसेन पुरःसृत्य अहं पदे धृतः आकृष्टः च। शिशुः कथंचित् रक्षितः। पुनः शिलासोपानपङ्क्तौ जलभरक्लिन्नं मां क्रोडे कुर्वन्त्याः आर्याक्काया लोचने अविरत-मश्रुवर्षम् अमुञ्चताम्। कथमपि समाश्वस्ता सा उपकारिण्याः स्वपौत्रस्य प्राणान् रक्षन्त्याः महिलायाः कृतज्ञतया भूरि प्रशंसामकरोत्।

अस्मदार्याक्का ननु कुटुम्बमयी आसीत्। नप्तॄणां शिक्षणार्थे स्वग्रामं ब्रह्मपुरीं परित्यज्य भाटकिते क्षुद्रतरे गृहके निवासकष्टं सा चिराय सोढवती। भारतस्य स्वातन्त्र्यप्राप्तेः पूर्वकालिकास्ते दिवसाः। द्वितीयमहायुद्धेन लोकजीवने महती अनर्थपरम्परा उत्पन्ना आसीत्। धान्यदुर्भिक्षं, वस्त्राभावः, कृषिशस्यानां हानिः इति नाना विपत्तयः जनान् अपीडयन्। पौरोहित्येन जीवनः कृशधनस्य एकाकिनः स्वपुत्रस्य कुटुम्बपरिवारपोषणेन अपत्यशिक्षणेन च उत्पद्यमानाम् आकुलतां सा जानाति स्म। आर्याक्कायाः धीरता अस्माकं महत् बलम् अभूत्। न सा कस्मैचित् अकुप्यत्। ग्रीष्मावकाशे ग्रामाटिकागतं नः गृहकं तदानीं संमिलता पौत्रदौहित्रपरिवारेण संकुलमपि आर्याक्काया उपस्थित्या विस्मृतकष्टम् आनन्दमयम् अभवत्। यः कोऽपि नप्ता नप्त्री वा ताम् अन्वसरत्। कस्मैचित् नप्त्रे आम्रफलं, कस्मैचित् नप्त्र्यै भृष्टाः चणकाः, परीक्षोत्तीर्णस्य कस्यचन नप्तुः पृष्ठास्फालनं, कस्यचन कञ्चुकस्य सीवनम् इति कर्मपरम्परया कदा खलु ग्रीष्मावकाशः समाप्त इति आर्याक्का नाबोधत्। सर्वोऽपि कुटुम्बगतः बालवर्गः स्वां स्वां मातरं विस्मृत्य आर्याक्कां परितः आम्रमञ्जरीं श्रितः मधुकरगण इव अशोभत। सा तेषु महत् वात्सल्यम् अभजत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वात्सल्येन सा नैकवारं स्वपरभावं व्यस्मरत् । पुरातनी इयं कथा । तेषु दिवसेषु आर्याक्कया कनिष्ठः पुत्रः आंग्लशिक्षणार्थे ग्रामान्तरे स्थापनीयः अभूत् । गृहभारं धारयता ज्येष्ठपुत्रेण तत्र निवासः कल्पितः । तदानीम् इममवसरं ज्ञात्वा आर्याक्कायाः मातृगृहस्थैः आर्याक्कायाः कनीयान् भ्राता हरिभद्रः अपि तत्र शिक्षणार्थं प्रेषितः । मातुलः हरिभद्रः भागिनेयः लक्ष्मणः च प्रायो वयसा तुल्यौ माध्यमिकविद्यालये प्रवेशं लब्धवन्तौ । पुत्रः सुबुद्धिरपि क्रीडाप्रियः स्वभ्राता च मन्दधी अनभ्यासरसिकः इति युगलम् आर्याक्कया पोषणीयं शिक्षणीयं च आसीत् । आर्याक्का यत्र अगच्छत् तत्रत्यान् प्रेम्णा सा स्वीयान् व्यदधात् । तत्र समीपे न्यवसत् भ्रातृपुत्रयोः उभयोः माध्यमिकविद्यालये अध्यापकः । अध्यापकः नवपरिणीतः । नवपरिणीता बालवयास्तस्य पत्नी न यथावद् गृहकृत्यं जानाति स्म । अस्मदार्याक्का भ्रातृपुत्रयोः सुशिक्षणं भवत्विति मातृवद् गृहकृत्येषु अध्यापकपत्नीम् अशिक्षयत् । तस्याः स्नेहबन्धेन बद्धौ तौ दम्पती परस्तादायुषि आर्याक्कां न विस्मृतवन्तौ । पुत्रभ्रातरौ शिक्षणे मन्दवेगौ इति ध्यायन्ती आर्याक्का सर्वं कष्टं सोढवती । अग्रे पुत्रः अधिकशिक्षणार्थं नागपुरं गतः भ्राता तु त्यक्तशिक्षणमोहः ग्रामसुखानि भोक्तुं स्वग्रामं गतः ।

अस्मिन् मुग्धे कनिष्ठे भ्रातरि अपि सा भृशं स्निह्यति स्म । जीवने अलब्धयशा अपि अयं भ्राता गणपतिभक्त आसीत् । स्वकीयो भ्राता संकष्टचतुर्थीनिमित्तं स्वग्रामनिकटे स्थिते गणपतिक्षेत्रे नियमेन उपस्थितः भवति इति सा अजानात् । परम् अस्थिरमतिः अयं भ्राता कदाचन भगिनीग्रामम् आगच्छत् कदाचित् च व्यस्मरत् । परमियं ज्येष्ठा भगिनी भ्राता मे आगच्छेत् इति पाकं संपाद्य आचन्द्रदर्शनं द्वारे दत्तदृष्टिः भ्रातरं प्रतीक्षते स्म । तस्याः त्रयो भ्रातरः अभवन् । इयं सर्वेषु ज्येष्ठा । आर्याक्काया इमे भ्रातरः यमद्वितीयादिवसे अवसरान्तरेषु च क्वचिदेव तां द्रष्टुं समागताः । भ्रातृप्रेम्णा तु वृद्धाया आर्याक्काया आकुलतां तेषु दिवसेषु दृष्ट्वा नप्तारः तां हसन्ति स्म ।

एकदा अतिदूरे शिक्षणार्थं स्थितः अयं तस्याः ज्येष्ठः नप्ता अस्वस्थ आमयेन च पीडितः ब्रह्मपुर्यां स्थितः । इदानीं तरुणे वयसि स्थितः ज्येष्ठो नप्ता स्वकीयम् आशास्थानम् अस्वस्थ इति आर्याक्का बलवत् समाकुला आसीत् । नूनं पुनरपि कष्टमया दिवसाः प्रत्यावर्तेरन् इति पापशङ्कया पीडिता सा चिन्ताक्रान्ता मां नीरुजं विधातुं महत् कष्टं सोढवती । तत् सर्वं पुरतः स्फुरति । अनुभूतदीर्घदुःखा सा सुखमयं जीवनं किंचिदनुभवतु इति आशा अधुना दूरापेता । आर्याक्कायाः कष्टज्ञानेन धैर्येण वात्सल्येन नः कुटुम्बं दुर्दशातः उद्धृतम् । अनेन चन्दन- काष्ठेन जीवनं सुगन्धि अभूत् । नवयुगे एतादृश्यः चन्दनलताः न दृश्यन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपक्रमः

—डॉ. ओम्प्रकाशशास्त्री,

४९६/१४७/२.छोटा चांद गंजः, लखनऊ नगरम्-२२६०२० (उ० प्र०)

यदा कलशं सम्पूज्य सम्प्रार्थ्य तं प्रणम्योपविशति श्रद्धानन्दः तदा तस्य सहधर्मचारिणी पत्नी प्रज्ञा जिज्ञासापुरस्सरं तं पृच्छति-'स्वामिन्! अस्मिन् कलशे कूपस्य जलं निक्षिप्य विभिन्ननदीनां तीर्थानाञ्च परिकल्पनायां किं रहस्यम्?' 'भवति! कलशेऽस्मिन् प्रतीकरूपेण विश्वमेवाखण्डं सङ्कल्पयामो वयम्। येनास्माकं समग्रभारतराष्ट्रस्य एकताया अखण्डताया विश्वबन्धुतायाश्च भावना दृढा भवति।' इति प्रश्नस्योत्तरेऽवदत् श्रद्धानन्दः। श्रुत्वा आनन्दमग्ना प्रज्ञा तमुवाच-'दिव्येयं भावना, आवयोः पुत्रोऽपि संस्कृतज्ञः अभविष्यत् चेद् दिव्या संस्कृतज्ञानपरम्परा अग्रेऽपि अक्षुण्णा अभविष्यत्।'

पत्न्याः कथनमिदं श्रुत्वा पं. श्रद्धानन्दः वेदस्मृतिपुराणरामायणमहाभारतकाव्यनाट्यादिपरिपूरितं स्वकीयं पुस्तकालयं पश्यति। पुनश्च—'मम मरणानन्तरं एतेषां पुस्तकानां का गतिर्भविष्यति? वंशानुक्रमेण संस्कृतज्ञानपरम्परा चलिष्यति वा न वा? मम एक एव पुत्रः चिन्मयानन्दः, स एव ज्येष्ठः स एव मध्यमः, स एव कनिष्ठः। नित्यं प्रेरितेऽपि तस्य मनसि संस्कृतानुरागो न जायते।' इति चिन्तयन् पत्नीम् उवाच—'कथं मे पुत्रः संस्कृतद्रोहरतः? इति चिन्तयन् मे शिरसि पीडा जायते।'

"अयं युगस्य प्रभावः। यथा देशः, यथा कालः, तथा मे बालः। मन्ये समयेन स स्वयमेव बोधशीलः भविष्यति।" इति शुभा चिन्तनमुद्रायामुक्तवती।

'युगकालयोः प्रभावः मादृशानां गृहे? अद्याहं निर्णयं कृत्वैव स्थास्यामि।'—इत्युक्त्वा श्रद्धानन्दः चिन्मयानन्दस्य कक्षं प्रति याति। कक्षे प्रविष्टे सति स उच्चस्वरेण तं पृच्छति—'चिन्मय! स्पष्टं ब्रूहि, संस्कृतं पठिष्यसि वा न वा?'

'अहं न वाञ्छामि पुरातनीं मृतां संस्कृतभाषां साम्प्रतिके युगे। हिन्दीं पठित्वाऽपि वैतनिकी वृत्तिरधुना नोपलभ्यते का कथा संस्कृतस्य? साम्प्रतमांग्लभाषाया एव चर्चा मे रोचते। संस्कृतभाषा तु मत्तः इयद् दूरे वर्तते यावद् दूरे वाराणसीतः इंगलैण्डदेशः' इत्यवदत् चिन्मयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अये मूढ ! संस्कृतं भारतस्य दैवं दायम्। सर्वेषामार्यलोकानां मूलमत्र प्रतिष्ठितम्। निष्प्रयोजनमपि षडङ्गवेदाः अध्येतव्याः मन्तव्याः निदिध्यासितव्याः। अस्त्येषा सर्वासां भारतीयभाषाणां जननी।' इत्यवदत् श्रद्धानन्दः।

चिन्मयः उवाच—'संस्कृतं जननी नहि, मातामही पितामही वा विद्यते, तस्मादधुना सा वृद्धा पङ्गुश्च जाता।

'अये कुलाधम ! यथा देवाः कदापि वृद्धाः न भवन्ति तथैव संस्कृतभाषा सर्वदा अजरा अमरा चिरनवीना च तिष्ठति। भारतस्य प्रतिष्ठे द्वे संस्कृतं संकृतिस्तथा।' इत्थं तर्कपुरस्सरमसौ संस्कृतस्य वैशिष्ट्यमुपयोगिताञ्च प्रतिपादितवान्। पुनरपि चिन्मयः स्वकीयं मतमित्थं प्रकटितवान्, 'तात ! यावान्तं परिश्रमं भवान् संस्कृताध्ययने कृतवान्, तावान् यदि आंग्लभाषाध्ययने विहितश्चेद् तव पार्श्वे वातानुकूलितं भवनम्, भृत्याः, आधुनिकभोगोपयोगिसज्जा यन्त्राण्युपकरणानि च स्युः। नहि ईदृशे जीर्णे-शीर्णे गृहे रूक्षं शुष्कं भुक्त्वा न भवान् वृद्धो भवेत्, नाहं दारिद्र्यमापन्नो भवेयम्। अतो हि नाहमभिलाषामि भवादृशं जीवनमाश्रयितुम्।' पुत्रस्य एतदुत्तरं निशम्य श्रद्धानन्दः 'अधुना ज्ञातं भौतिकवादपिशाचेन परिगृहीत इव त्वमित्थमनर्गलं जल्पसे। संस्कृतं चेन्नैव पठनीयं तर्हि अस्मिन् गृहेऽपि नहि वसनीयम्।' एवं कथयन् बलात् करं गृहीत्वाचिन्मयानन्दं गृहाद् निःसारयति। गृहाद् निःसृत्य चिन्मयः अग्रे एकस्य जलाशयस्य पार्श्वे चिन्तनरतः करन्यस्तमस्तकश्चोपविशति।

जलाशयं प्रति आगच्छन्ती सुफला चिन्मयं विलोक्य तस्य पार्श्वं गत्वा चिन्ताकारणं पृष्टवती। चिन्मयः स्वकीयं सर्वं वृत्तं श्रावितवान्। अनन्तरं सा विचार्य उक्तवती—'चिन्मय ! मा चिन्तय। संस्कृतपठने न कापि हानिः। संस्कृतं विस्मृत्य भारतस्य या दीनदशा अस्ति, सैव तव दशाऽधुना। किन्तु विश्वसिमि यत् भारतेनैव साकं संस्कृतं तव हृदये स्थानं लप्स्यते। संस्कृतं बहु सरला भाषा ?

"संस्कृतं सरला भाषा ? मम पितृपादाः कथयन्ति 'मया द्वादशवर्षाणि व्याकरणमधीतम्। त्वमपि पठ।' अरे अस्य किं नाम पुस्तकम् ?...कौव कौव मोदी यस्या दर्शनेनैव मे मूर्च्छा समायाति।" इत्यवदत् चिन्मयः।

'अरे कौव-कौव मोदी नहि कौमुदी-२ इति उच्चारय। सा तु सत्यं कठिना, किन्तु त्वं कौमुदीमस्पृष्ट्वाऽपि त्रिषु मासेष्वेव संस्कृते भाषितुं समर्थः भविष्यसि। एतदर्थं संस्कृतविद्याकेन्द्रस्य सरलसंस्कृतशिक्षणशिवि[र] चल्यताम्' इति उक्तवती साग्रहं, सुफला।

'सुफले ! अस्मिन् विज्ञानप्रौद्योगिकसंगणकयन्त्रादियुगे संस्कृतस्य किमौचित्यम् !' इ[ति] जिज्ञासापुरस्सरमुक्तवान् चिन्मयः। 'शर्मण्यदेशीयः कम्प्यूटरविशेषज्ञः प्रो. हेन्रिशहॉक महोदयः कथयति-पू[र्वं] विदेशेषु ततः परं भारते कम्प्यूटरयन्त्रेण शिक्षाप्रणाल्यामपि संकृतमुपस्थाप्य संस्कृतभाषया सर्वेषु कार्यालये[षु] कार्याणि भविष्यन्ति, कम्प्यूटरयन्त्रस्य कृतेऽपि संस्कृतमेव विश्वस्य सर्वोत्तमाभाषा। तत्र प्रो. हॉकमहोदयोऽ[पि] भविष्यति। संस्कृतविद्याकेन्द्रे निवासस्य भोजनस्यापि व्यवस्था विद्यते। अहं तत्रैव गच्छामि। त्वं चल मया सह' इत्युक्त्वा सुफला चिन्मयं नीत्वा संस्कृतविद्याकेन्द्रं गतवती।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतविद्याकेन्द्रे चिन्मयः मासाभ्यन्तरे गेहीयवस्तूनां आपणस्य सामग्रीणां व्यवहार्यविभिन्नपदार्थानां व्यवहारिकतां च बोद्धुं समर्थः भवति । अनन्तरं मासद्वयपर्यन्तं विभिन्नशास्त्राणां वेदाङ्गानां आर्थिक-धार्मिक-प्रायोगिकविषयाणां सामान्यज्ञानेन, कार्यालये सभायां च संस्कृत-संलपने वक्तुं पटुतां लभते । विद्याकेन्द्रस्य सरल-संस्कृतशिक्षणशिविरं समाश्रित्य स संस्कृतात्मा संस्कृतशीलश्च भवति ।

सरलसंस्कृतशिक्षणशिविरस्य समापनानन्तरं सुफला उक्तवती—'चिन्मय ! इदानीं चल स्वगृहम्, अभिनन्दय पितरौ । सरल संस्कृतशिक्षणशिविरे भागं गृहीत्वा तव हृत्क्षेत्रेऽङ्कुरितं यद् संस्कृतबीजमभ्यासयोगेन पुष्पितं फलितञ्च भवेत् । यथाहि एकया शलाकया दीपकः प्रज्वलति, स दीपकः सम्पूर्णमपि गृहं प्रकाशयति, तथैव त्वमपि सम्पूर्णं समाजं संस्कृतमयं विधेहि ।

अथ संस्कृतविद्याकेन्द्रतः स्वगृहद्वारमागत्य चिन्मयः पश्यति दुःखनिमग्नं पितरं तमाश्वासयन्तीं मातरञ्च । माता प्रज्ञा कथयति-'मम पुत्रः चिन्मयः संस्कृतज्ञानं लब्ध्वाऽऽगमिष्यति । आशु एव गृहम् आगमिष्यति संस्कृतप्राणा वधूः सुफलापि ।' परं श्रद्धानन्दः एतत्सर्वं आशामृगमरीचिकैव मनुते । एतद् वृत्तं विलोक्य यदा चिन्मयः आभ्यन्तरं गच्छति तदा तत्र सुफलापि स्वपित्रा सह तत्र आगच्छति ।

चिन्मयः यदा संस्कृते संलपति तदा श्रद्धानन्दः साश्चर्यं सुफलां पृच्छति-'किमयं सैव चिन्मयानन्दः ?' सुफला सर्वं वृत्तं श्रावयति । श्रद्धानन्दः पृच्छति—'तत्र किं व्याकरणं पठितम् ? सारस्वतं पाणिनीयं चान्द्रं वा ? चिन्मयः उक्तवान्, 'मया तत्र भाषाभ्यासः कृतः ।' स प्रदर्शनं कृत्वा दर्शितवान् । श्रद्धानन्दः संतुष्टः भवति । सहजरीत्या सुफला-चिन्मयानन्दयोः उद्वाहः भवति । आनन्दमग्नः श्रद्धानन्दः आशीर्वचनपुरस्सरमुवाच-'भो भगवन् ! यथाहि मदीये गृहे संस्कृतं समुल्लसति विकासञ्चोपगता तथैव निखिले विश्वे स्यादिति कामये । किमधिकमितः परं वाञ्छितं मे ॥'

जयतु संस्कृतम् ! ! जयतु भारतम् ! !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"हा हन्त हन्त विधिना परिवञ्चितोऽस्मि"

—डॉ. गोपराजू रामा.
साहित्यविभागाध्यक्षः
जी.एन. झा के. एस. विद्यापीठम्
आज़ाद पार्क, इलाहाबाद नगरम्-२११००२ उ० प्र०

आसीत् कश्चन लम्बबुद्धिर्नाम छात्रः कस्याञ्चित् लब्धप्रतिष्ठायां कलाशालायाम्। सा कलाशाला विश्वविख्याते विश्वविद्यालये आसीत्।

तस्यां कलाशालायां बहवोऽध्यापकाः प्राध्यापकश्चासन् येषां सकाशे लम्बबुद्धिः अध्ययनं विहितवान्। तस्योपस्थितिसंख्या कलाशालाप्रचलनदिवससंख्यायाम् अर्धार्धमपि नोपलभ्यत। यदि वत्सरान्ते वारं वारमपि गणना क्रियेत बाहुल्येन तस्यानुपस्थितिः कक्षायां निर्धारितप्राया एवाभवत्। सः पाठानुपेक्ष्य कलाशालोपस्थितिमुत्सृज्य ग्रामान्तरगमनम्, चलचित्रशालाटनं किमपि किमपि कार्यान्तरं वा करोति स्म। अत्यल्पदिवसेषु उपस्थितेन तेन धूर्तलक्षणलक्षितेन अतिविनयः अतिसम्मानः च गुरुभ्यः प्रकटीक्रियते स्म। पाठनकाले किमप्यालोचयतः तस्यावगतविषयस्येव शिरःकम्पनम्, अवहितचेतस इव निश्चलत्वं, अवबुद्धरसस्येव अतिहासादिकं च स्वाभाविका अदृश्यन्त। परन्तु गुरुभिः आध्यापितविषयेऽपि पृष्टः सः खसूचिमुद्रामवलम्बयन् गुरूणां नानाविधमिष्टान्नपदार्थोपहरणैः सन्तोषकर्मणि परं सावधानचित्तः वर्तते स्म। गुरुरपि निरन्तरोत्पाद्यमानाऽऽहारसमस्यादिके कष्टे काले प्रियतमेन लम्बबुद्धिना यत्किमपि नम्रधिया अदीयत तस्मात् कथमपि स्वीकारविमुखो नाभवत्।

एकस्मिन् दिने गुरुः सञ्जातकरुणः शिष्यसेवावर्जितचित्तः सन् लम्बबुद्धये अनायासेन परीक्षोत्तरसिद्धिकर्मणि दास्यमानानि पञ्चसंख्याकानि प्रश्नोत्तराणि अमोघमन्त्राणीव रहस्युपदिदेश। शिष्योऽपि कृतकृत्यमात्मानं मन्यमानः सिद्धमन्त्र इव गुरवे विविधान् प्रणामान् समर्प्य सन्तुष्टचेताः समभूत्।

परीक्षादिवसाः व्याघ्रा इव समागच्छन्। स्वकीयं प्रयत्नं सफलं मन्यमानोऽद्य लम्बबुद्धिः गुरूपदिष्टप्रश्नोत्तराणां परिरटनपरिपाट्यां पुष्कलं परिश्रान्तोऽपि विफलप्रयत्न एव समभूत्। तेन गुरुप्रकाशित-प्रश्नोत्तराणां कण्ठस्थीकरणे बहवः प्रकाराः अवलम्बिताः।

निद्राव्यसनस्य तस्य रात्रौ जागरणं ब्रह्मप्रयत्न इवाभवत्। क्षपायां निद्राक्षयार्थं चायादिकमप्यपिबत्। चूडायां निद्राबलेन कम्पनशीलं शिरः स्थिरीकर्तुं दृढं पाशं बद्ध्वा प्रायतत। परन्तु यथा स्वगुरुः स्वदत्तमिष्टान्नादिकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न जहाति स्म तथा निद्रा लम्बबुद्धिं न त्यजति स्म। यथाकथञ्चित् जागरणं कृत्वा पञ्चदशदिनानि यावत् तेन भगीरथप्रयत्नः कृतः। हन्त! दैवप्रातिकूल्येन सर्वेऽपि प्रयत्ना निष्फलाः सञ्जाताः।

ततः स लम्बबुद्धिः भगवन्तं नारायणं सेवितुमारेभे। नगरस्थितं देवालयं प्रतिदिनं द्वित्रिवारमसेवत। मन्दिरात् पुरः स्थितो नारायणं प्रत्याक्रोशति स्म— "त्वमेव माता च पिता त्वमेव" इत्यादि नानाप्रकारान् प्रार्थनाश्लोकान् पुस्तकं दृष्ट्वा उच्चैःस्वरेणागायत। विश्वस्मिन् विद्यमाना विविधा देवताः लम्बुबुद्धेः स्मृतिपथमागच्छन्ति स्म, आराधनकर्मणि न कोऽपि देवः परित्यक्तः। किन्तु परं सर्वं विपरीतं सञ्जातम्! परीक्षाकालः शीघ्रतमं उपागमत्। सर्वमेतत् लम्बबुद्धिं सङ्कटग्रस्तमकरोत्, श्रद्धां पुरुषप्रयत्नमन्तरा च न किमपि साधयितुं कोऽपि पुरुषः शक्नोतीति लम्बबुद्धिना न ज्ञातम्। यद्यज्ञास्यत् कथेयं एतावत्पर्यन्तं विद्याध्ययनार्थम् नागमिष्यत्।

लम्बबुद्धिः कस्मिंश्चिदपि प्रदेशे निभृतं स्थित्वा गुरूपदिष्टानां प्रश्नोत्तराणां केनापि प्रकारेण परीक्षासमाधानपत्रे लेखनोपायं (copying) चिन्तितुमारेभे। एवं चिन्तने परीक्षायाः एकमेव दिनमवशिष्टम् परीक्षायाः पूर्वतने दिवसे तस्य स्थितिः वर्णनातीता सञ्जाता। कातरेणातुरतया च किमपि कर्तुं तस्य शक्तिर्नावशिष्टा। तस्मिन् समये तस्य मनसि तडिदिव काचन युक्तिः प्रादुर्बभूव। सा युक्तिः विस्मृतदिशः कृते दूरतरोपस्थापितप्रकाशपुञ्ज (Light house) इवासीत्। तेन निश्चितं यत् सिद्धहस्तानां प्रश्नोत्तराणां प्रतिलिपिः परीक्षा भवने नेया इति, सा च परीक्षासमाधानपक्षे उद्धरणीयेति च।

एवं निश्चितेऽपि तस्य परीक्षाशालायां स्थिताः निरीक्षकसञ्चालकादयः विधिनिषेधादयश्च तस्य भयमुपजनयन्तिस्म।

निश्चयानुसारेण लम्बबुद्धिः प्रश्नोत्तरप्रतिलिपिं शरीरपरिधानैकदेशे सुगुप्तं सुनिपुणं निक्षिप्य परीक्षाभवनं ययौ। तस्य मनः धुग्धुगायमानमेवासीत्। तत्र परीक्षाभवने तानेव स्वगुरून् परीक्षासञ्चालनकार्ये निरीक्षणकार्ये च विराजमानान् विलोक्य स्वात्मनि कमपि मोदातिरेकमाप। एवं विचिन्तयति तस्मिन् लम्बबुद्धौ परीक्षाप्रारम्भद्योतकः घण्टानादः उदभूत्। अयं च सुसावधानः स्वाभीष्टवेलां प्रतिपालयन् समतिष्ठत्। उत्तरक्षण एव तेभ्यस्तेभ्यश्छात्रेभ्यः सञ्चालकाःउत्तरलेखनार्थं पत्राणि (Answer sheets) प्रश्नपत्राणि च समददुः।

दृष्टे स्वकीये प्रश्नपत्रे लम्बबुद्धिना अवगतं यत् प्रतिलिपिगतानि प्रश्नानि तान्येवेति। तस्मात् तेषाम् समाधानं लिलिखिषुः सः विघ्नराजं विशेषफलप्राप्तये नमस्कृत्य प्रकृतं कार्यमुपक्रान्तवान्। अर्धघण्टासमयो व्यतीतः। तेन स्वानीतेषु पञ्चसु प्रश्नोत्तरेषु एकस्योत्तरं सम्यगवतारितम्।

एतस्मिन्नन्तरे कुलसचिवप्रेषितो विशिष्टनिरीक्षणकर्मणि नियुक्तश्च कश्चन पुरुषः तत् परीक्षाभवनं समागच्छत्। स लेखनकर्मणि संलग्नास्तान् छात्रान् निरीक्षमाणो लम्बबुद्धेः पार्श्वमपि समागतवान्। आगतेन तेन निःशङ्कं, निर्भीकं, निःशब्दं च प्रतिलिपिकर्मणि (copying) लग्नो लम्बबुद्धिर्व्यलोकि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेनैव पृष्टो लम्बबुद्धिः "किं त्वया निक्षिप्तं परीक्षासमाधानपत्राभ्यन्तरे ?" इति । श्रुत्वा तु च तद्वचनं लम्बबुद्धिर्मौनमतिष्ठत् । दिदृक्षुणा सञ्चालकेन उत्तरपत्रमुत्थापितम् । अत्रान्तरेऽन्ये सञ्चालकाः समागताः । तैः सर्वैः उत्तरपत्राभ्यन्तरे प्रश्नोत्तरप्रतिलिपिः दृष्टा तेषाञ्च आश्चर्यमिदमेवासीत् यत् परीक्षाप्रश्नपत्रस्थप्रश्नानामेव समाधानान्यासन् ।

सञ्चालको लम्बबुद्धिं पप्रच्छ, "किमिदं निषिद्धं कर्म इति न जानासि ? किमिदं चानाचरणीयं कार्यम्" ? इति । एतच्छ्रुत्वा स कातर्येण कम्पमानः उद्गतस्वेदजालैरार्द्रीकृतवस्त्र आस्त । अत्रान्तरे प्रधानसञ्चालको लम्बबुद्धेर्गुरुः तत्रोपस्थितवान् । गुरुमवलोक्य लम्बबुद्धिना ऊचे-"गुरो ! तेषु पत्रेषु नैकं प्रतिलिपिपत्रं अपितन्यान्यपि पञ्च पत्राणि सन्ति" इति । तच्छ्रुत्वा गुरुः लम्बबुद्धिं भृशं निन्दितवान् "किमर्थं बहिः प्रकटीकरोषि" ? इति ।

ततः स शिष्यः सविनयं यथा स्यात्तथा अवोचत्— "गुरो यत् किञ्चित् संजातं तत् सञ्जातप्रायमेव किमीषदवशिष्टस्य गोपनेन" इति ।

ततः सद्यः एव स लम्बबुद्धिः बहिः निष्कासितः । स व्याकुलमना बहिरागत्य एवं विललाप—**"हा हन्त हन्त विधिना परिवञ्चितोऽस्मि"** इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवदुर्विपाकः

डॉ. कीर्तिवल्लभ शक्टा
शारदा ज्योतिर्भवनं, मण्डलकं
एम.ई.एस. कैम्पसम्मुखे चम्पावत, ज़िला चम्पावतम्-२६२५२३

प्रचण्डांशून् विकिरन् दारुणातपेन तप्यमानां भुवं व्यथितां कुर्वन् व्यस्को भानुर्गगनमध्ये विराजमान आसीत्। तदासीत् गीष्मर्तुः। अग्निवाहकेन वायुना त्रासिताः सर्वे पशुपक्षिणः, जीवधारिणः, कीटपतङ्गाः वनस्पतयश्च, तत्र का कथा सुखाभिलाषिणो मानवस्य ?

सप्रियतमाः खगाः निजकोटरेषु निलीनाः, मार्गाः गमनागमनरहिताः। वनेषूपवनेषु च नासीत् कश्चित्कर्णगोचरो ध्वनिः। क्षीणजला सरिद् विरहिणी कृशाङ्गना इव मन्थरगत्या प्रवाहिता आसीत्। आलस्याधिक्येन मयूरसिंहहरिणसर्पादयः पशुपक्षिणः निजाहारं विहाय शान्ताश्रममिव नातिदूरे केचन निद्रायमाणाः केचन तापाधिक्येनाकुलाश्चासन्।

परं दैवदुर्विपाकग्रस्तः क्षीणवदनः विगलितस्वेदः खड्गसिंहः जीर्णोत्तरीयावेष्टितमुण्डः अधोवस्त्रत्वेन कौपीनं परिधाय स्वस्वामिक्षेत्रेषु तस्याज्ञानुसारं वृषभद्वयसाहाय्येन हलेन भूमिं कर्षणानन्तरं शकटतः मृदुहरिततृणपुलकान् निष्कास्य तयोरग्रे यथाविधि प्रक्षिप्य आम्रोपवने विटपच्छायासु तान् विमुच्य दत्तावधानः सन् सुदीर्घतराकारान्मृत्तिकाखण्डान्सन्चूर्णयन् सहसा अवरुद्धः।

प्रकृत्या कृष्णकायः ज्वाज्वल्यमानैर्रविकिरणैर्जरया जर्जरीभूतेन दुर्बलेन शरीरेणाविरलप्रवाहितस्वेदसलिलैश्च मिलित्वा साक्षात्करुणापात्रमिव प्रतीयते तदानीं सः।

तस्य परिश्रान्तस्य मानसपटले चलचित्रस्य चित्रैरिव चित्रमयी कथा क्रमशः तथैवागता यथा तेन व्यतीता। स्वमनसि इत्थम् अचिन्तयत्सः, "अहो मे अधन्यत्वम्। बाल्यावस्थात अद्यावधि सर्वदा दुःखमयं जीवनं व्यतीतम्। ईदृश्य आपत्तयः मया भुक्ताः, सम्भवतः कस्यचिद् मानवस्य जीवने न भविष्यन्ति तादृश्यः। जगदीश्वरं प्रार्थयामि यत् पशुभ्योऽपि एतादृशीं दुरवस्थां न ददातु। जन्मतः मातृहीनः, प्रथमे वयसि पितृसुखाद्वञ्चितः सन् तदा प्रतापसिंहस्य पित्रा दौलतसिंहेन स्नेहेन पालितः, तेषामेव पुण्यप्रतापेन केचन दिवसाः स्वप्नमिवावलोकिताः, तेनैव प्रदत्ता भूमिः यत्रास्ति अद्य मम लघु कुटीरम्। अहो कीदृक् दयालुत्वं महत्त्वं च विराजितमासीत् तेषां मनसि। दिवंगता यदा मम प्रथमा भार्या तदा स महानुभावः स्वकीयेन व्ययेन ताम् नगरस्य औषधालये नीत्वा उपचारं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारितवान्। परं मम दौर्भाग्यात् हता सा विधिना। मदीयवंशसंचालनेच्छया, एकाकी जीवनं कथं यापयिष्यति चेत्यादिकमालोच्य तेनैव मम द्वितीयविवाहः कारितः। करुणावरुणालयस्य साक्षादवतारः स ग्राम्येषु सादरमभिधीयते। समीपस्थाः निर्धनाः, दलिताः, पङ्ग्वन्धादयः, कर्मकाराश्चाधुनापि तस्य कीर्तिं गायन्ति।

हा हन्त, कीदृशी विधिविडम्बना इयम्? ईदृशानां धर्मपरायणानां महानुभावानां गृहेऽपि कथं प्रसूतोऽयं पापमूर्तिः प्रतापसिंहः। शैशवे नद्यां मज्जनावसरे जलप्रवाहेण प्रवाहितः सः मया निष्कासितः। तदनन्तरं कतिपयवारं लम्पटमण्डल्या ताडनाद्रक्षितः। तद्दिने यदा दुष्टोऽर्जुनसिंहः भूमौ लम्बायमानस्य अस्य ग्रीवायां छुरिकया प्रहारं कर्तुं उद्यतः तदा भाग्यवशात् तत्रोपस्थितेन मयैव रक्षितः। किं न कृतं मया प्रतापाय? श्रीमद्भागवतकथायां साधुसंगत्या पूज्यपादानां दौलतसिंहमहाभागानां मुखारविन्दाच्च बहुवारं श्रुतं मया कर्तव्यपरायणतायाः माहात्म्यम्। तस्य सफलतायै मया स्वजीवनमेव अस्य परिवाराय कर्मकारत्वेन समर्पितः।

परम् अधुना सः माम् यथा उपेक्षते तद् अवर्णनीयम्। किं करोमि मन्दभाग्यः, क्व गमिष्यामि? पञ्चाशत्तमायां प्रौढावस्थायां परिणयं कृत्वा स्वहस्ताभ्यां क्रीतं मया घोरातिघोरं कष्टकाननम्। हा मम हिताभिलाषि तात! भवद्भिः नोचितं विहितं मह्यम्। किमभूत् यदा मम प्रथमा प्रिया सुशीला मृता। एकाकी निवसन् अहं निश्चिन्तः सन् जीवनस्यावशिष्टान् विरसान् दिवसान् केनापि प्रकारेण भोक्तुं समर्थः। हा दैव! सर्वथा रिक्तोऽहम् पूज्यपादेषु दिवंगतेषु सत्सु। मह्यं नास्ति किञ्चिद्दवलम्बनम्। साम्प्रतं दुर्बलं माम् वीक्ष्य अनुदिनं मनसा वाचा कर्मणा प्रताडयति निर्दयी प्रतापसिंहः। गतवर्षे मम भार्या यदा पाण्डुरोगग्रस्ता जाता तदा तस्याः उपचारार्थं याचितानि मया पञ्चशतानि रूप्यकाणि, तानि च तेन पितृदत्तां भूमिं निर्बन्ध्य दत्तानि। जरायामस्यां कथं निस्तारयामि कठिनं प्रतीयते। हा धिक्! गृहे अबोधा बुभुक्षिताः त्रयः बालकाः मयि दिवंगते क्व गमिष्यन्ति, किं खादयिष्यन्ति, एतान् कः पालयिष्यति? चतुर्वर्षीया मातृविहीना बालिका तदा कस्याङ्के स्वप्स्यति? भो जगदीश्वर! रक्ष माम्, रक्ष माम्," इति ब्रुवन् सः शुष्ककाष्ठस्तम्भ इव निश्चेष्टः सन् भूमौ पपात, न जाने क्व गताः तस्य प्राणाः।

तदानीं मध्याह्ने द्वादशवादनेवला जाता। प्रतापसिंहः स्वप्रांगणे वटतरोः शीतलायां छायायां सुखदायिन्यां खट्वायां सुखेनोपविष्टः कांस्यनिर्मितां चिलमाभिधेयां धूमपाननलिकां मुखे दधानः लघु-पौत्रेण सह क्रीडारतः आसीत्, खट्वां परितः तस्य चाटुकाराः विराजमानाः आसन्। यत इदानीं स समीपवर्तिषु ग्रामेषु धनाढ्यः धनाधिक्येन महातस्करश्चासीत्। सर्वे ग्रामवासिनः तस्य भयात् तथैव कम्पन्ते यथा यमराजं वीक्ष्य पापाः। तदा केनापि चाटुकारेणोक्तं। 'श्रीमन्। भवतां वृषभौ शकटरहितौ स्वातन्त्र्येण इतस्ततः भ्रमन्तौ इत एव समागतौ, किं अद्य नास्ति तयोः रक्षकः खड्गसिंहः?' 'इति श्रुत्वा दुर्मुखः प्रतापसिंहः भृशं चुकोप, अवदच्च 'द्रक्ष्यामि अद्य तं खड्गसिंहम्। मम रोटिकां खादयन् मामेवोपेक्षते। त्वरितं गमिष्यामि तस्य गृहम्' इति।

उत्थाय यदा व्रजन्नासीत्तदा पौत्रेण वारितः। तेन भणितं भो पितामह। अहमपि आगच्छामि अन्यथा मह्यं मृदुमोदकं देहि। पौत्राय मिष्टान्नं दत्वा हस्ते दण्डमेकमादाय क्रोधज्ज्वालाज्वलितचक्षुः तस्य कुटीरं प्रत्यगच्छत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'खड्गसिंहस्य कुटीरे क्षुत्पिपासाकुलाः साश्रुनयनाः क्षीणश्यामवदनाः बालकाः पितुरागमनपथं वारं-वारं विलोकयन्ति स्म । अबोधा सा लघुबालिका तारस्वरेण, 'भो पितः,' शीघ्रमागच्छ । बुभुक्षिताऽहम्, शीघ्रमागच्छ, पौनः पुन्येन इति आवर्तयन्ती रुदति स्म । तत्रावाप प्रतापसिंहः, इत्थं कथितुमारभत "रे बालक ! शीघ्रं कथय, कुत्र ते पिता ?' विकरालाङ्गं तम् वीक्ष्य भीतहृदयाः कम्पितवदनाः बालकाः गद्गदस्वरेणोचुः, 'न आगतोऽद्य अस्माकं पिता इदानीमपि । इत्याकर्ण्य प्रत्यागच्छति प्रतापसिंहः । पुनः कर्णगोचरः आसीत् स एव सकरुणध्वनिः—

भो पितः । शीघ्रमागच्छ, क्षुधातुरा वयं किं भक्षयामः ?४ भो पितः !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संकल्पः

—डॉ. नवलता
वि. सि. स. ध. महाविद्यालयः, कानपुरम् (उ०प्र०)

व्योमरत्नः प्राथमिकशालायामध्यापक आसीत्। स्वनीतिमार्गपरिपालनस्य कृते स निकटस्थे समस्त एव परिवेशे प्रसिद्ध आसीत्। समनोयोगमध्यापनेन सममेव छात्रान् सदाचरणस्य प्रेरणां स्वाचरणेनैव प्रयच्छन् सः लोकप्रियतामभ्यगात्। यथार्थतया स आचार्य आसीत्। पाठशालायाः प्रचलितपरम्परानुसारेण अदूरवर्तिभ्यः ग्रामेभ्यः आगताश्छात्राः नित्यमेव किमपि-किमपि वस्तु स्वगृहादानीय अध्यापकेभ्यः प्रयच्छन्ति स्म, किन्तु व्योमरत्नः कदापि किञ्चिदपि न स्वीकरोति स्म। स्ववेतनमेव जीविकासाधनं मन्यमानः सः सशुल्क-शिक्षणमपि (ट्यूशन इति) कदापि नाकरोत्, अपितु निर्धनान् अल्पबुद्धींश्च छात्रान् स्वगृहे निःशुल्कं पाठयति स्म।

व्योमरत्नस्य परिवारे तस्य पत्नी पुत्रौ पुत्र्यौ चासन्। भूरत्नः ज्येष्ठः चतुर्दशवर्षदेशीयः शिखा द्वादशवर्षदेशीया दीक्षा नववर्षदेशीया कनिष्ठः गुणरत्नश्च सप्तवर्षदेशीय आसीत्। षट्सदस्यात्मकं परिवारं व्योमरत्नः अस्मिन् महार्घतासमये अतिकाठिन्येन पालयति स्म। सन्ततीनां शिक्षा तु अपरिहार्या इति विचार्य यथासमयं तेन पुत्रपुत्रीणां नामाङ्कनं विद्यालये कारितम्, किन्तु कथमपि कर्षणापकर्षणेनापि शुल्क-पुस्तकगणवेशादीनां व्यवस्थां सम्यक् कर्तुं नापारयत्। पौष्टिकभोजनस्य स्थाने कदापि शुष्केण शाकेन, कदापि सूपेन कदाचिच्च लवणेनैव रोटिकाशनं कुर्वाणास्ते कालं यापयन्ति स्म। का कथा तावत् सुखसौविध्य-साधनानाम्?

भूरत्नः नवमकक्षायामध्येति स्म। तस्य ग्रामे माध्यमिकविद्यालयो नैवासीदतः पञ्चकिलोमीटराणि यावद्दूरे लखनऊ-नगरे स्थिते उच्चतर-माध्यमिकविद्यालये तस्य नामाङ्कनं कारितम्। अत्रत्यानां छात्राणां मध्ये आत्मनः समायोजनं कठिनं मन्यमानो भूरत्नः केनापि सह मैत्रीं नाकार्षीत्। छात्राः नित्यं समीकृतम् उज्ज्वलं गणवेशं धृत्वा आगच्छन्ति स्म, मध्यावकाशे गृहादानीतं वा क्रीत्वा वा जलपानादिकम् स्वीकुर्वन्ति स्म। ते नगरस्थेभ्योऽपि परिवारेभ्यः रिक्षायानैः स्कूटरयानैः टेम्पोयानैर्वा आगच्छन्ति स्म, किञ्च भूरत्नः एकमेव गणवेशं प्रतिसप्ताहम् एकं वारं प्रक्षाल्य असीमकृतमेव धृत्वा पदातिरागच्छति स्म। गृहे भुक्त्वा पुनः बहिर्न किञ्चिदपि स्वीकारोति स्म। एकतस्तु तस्य धनाभाव एवासीद् अपरतः व्योमरत्नः 'बहिस्तनीयानि खाद्यवस्तूनि अस्वास्थ्यकराणि' इति तं शिक्षितवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूरत्नः अध्ययने कुशाग्रबुद्धिः आसीत् । समयेन विद्यालयं प्राप्य अवकाशे स्वगृहं प्रत्यावर्तते । पदातिः स्वगृहं प्राप्तुं होरामितं याति । एकस्मिन् दिने केनापि कारणेन विद्यालये प्राप्तुं तस्य विलम्बो जातः, प्रार्थनानन्तरं प्रथम-चक्रे कक्षायां प्राप्तः सः कक्षाध्यापकेन दण्डितः । मध्यावकाशे आत्मानमधिकृत्य छात्राणां मध्ये चर्चा तेन श्रुता । कोऽपि सहानुभूत्या कथयति स्म—

'वराकः पदातिरागच्छति इति मर्षितव्य' आसीत् कक्षाध्यापकेन ।

केनापि सम्पन्नछात्रेण टिप्पणी कृता——

'एतादृशा कार्पण्येनापि को लाभः ? एकां द्विचक्रिकामेव क्रीणातु ।'

अपरेण प्रहस्योक्तम्——

'अये । गृहे अन्नं न भवेत्तर्हि भ्राष्ट्रेण किम् ?'

'अस्य पित्रा चिन्तनीयमिदं सर्वम् । न जाने कथं संस्थागतोऽयं विद्यालयेऽध्येति ? व्यक्तिरूपेणापि परीक्षा दातुं शक्या ।'

भूरत्नस्य शिरो घुर्मितमिवास्त ।

'किमर्थमेते सहपाठिन आलोचयन्ति माम् ? किं दारिद्र्यमभिशापः ? एते सदैव मां तिरस्कारदृशा पश्यन्ति । नाऽहमत्र पठिष्ये ।'

इत्येव चिन्तयतः तस्य अवकाशघण्टिका निनादिता । विद्यालयस्य द्वारि विश्वासो अमिलत् । सः तस्य ग्रामस्य मार्ग एव नगरोपान्ते न्यवसत् । तस्य पिता कस्मिन्नपि सर्वकारिकार्यालये वरिष्ठलिपिक आसीत् । उत्कोचं ग्राहं-ग्राहं तेन स्वगृहे सर्वाणि आधुनिक-सुख-साधनानि एकत्रीकृतानि । विश्वासस्य अधिकारे एकं स्कूटरयानं दत्वा विद्यालयगमनस्य चिन्तया सः मुक्तो जातः । साधनाधिक्याद्धि विश्वासः दुर्व्यसनेषु सक्तः । धूमपानम्, व्याजेन चलच्चित्रदर्शनं, द्यूतञ्च तस्य साधारणव्यसनान्यासन् । चिन्तामग्नं भूरत्नम् अवरुध्य विश्वासः पृष्टवान्—

'कथं भोः भूरत्न ? अतीव व्यग्रो लक्ष्यसे । किं घटितम् ?

'न किञ्चिदपि विशिष्टम् ।' अनिच्छया भूरत्न उत्तरं दत्तवान् ।

विश्वासः कुटिलस्मितेन सान्त्वयान्निवावोचत्—

'अये ! जाने, विद्यालयस्य वृत्तेन क्षुब्धोऽसि । त्वया चिन्ता न करणीया । मम गृहं तु तव मार्ग एवास्ति । त्वं सार्धदशावादने नित्यमेव तत्रागच्छ । मया सहैव स्कूटरयानेन विद्यालयम् आगन्तव्यम् । प्रत्यावर्तनेऽपि तथैव नेष्यामि ।'

पितुर्वशंवदः भूरत्नः यदा स्वपितरं सर्वं वृत्तं श्रावितवान्, तर्हि प्रथमं सः न्यवारयदेव—

'वत्स, मैत्री तुल्यसामाजिक-आर्थिकवर्गस्य नागरिकयोः मध्य एव कल्याणदा भवति ।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनः पुत्रस्य कष्टं स्वविवशतांच विचार्य अनुमतिं प्रदाय तं सावधानमपि अकरोत्—

'पुत्रक, त्वं मम मर्यादां रक्षिष्यसि इति आश्वस्तो भवानि वा? स्वसीमितसाधनानि उरसि निधाय लोभासक्तो न भविष्यसि।'

कृताश्वासनः भूरत्नः विश्वासेन सह विद्यालयं गन्तुं प्रारभत। शनैः शनैः वार्तालापेन मैत्री वृद्धिमियेष। कदाचारिणः शीघ्रमेव स्वप्रभावेण वशीकुर्वन्ति सरलान्। भूरत्नोऽपि विश्वासस्य छद्मव्यवहारेण वञ्चितः। एकस्मिन् दिवसे विश्वासः भूरत्नं विद्यालयात् पलाय्य चलच्चित्रं द्रष्टुं न्यमन्त्रयत्। प्रथमं तु भूरत्न उद्यतो न जातः। अपि चोक्तवान्—

'एकतस्तु अध्ययनस्य हानिर्भविष्यति अपरतः चिटिकापत्रस्य कृते रूप्यकाण्यपि न सन्ति मम पार्श्वे।'

'रूप्यकाणां तु चिन्ता एव नास्ति। अथ च विद्यालयेऽध्ययनस्य वार्ता।...अहं तत् पूरयिष्यामि। ते अध्यापकाः मां जानन्ति।'

भूरत्नः सभयं अपवारयति स्म—

'नहि, नहि। चेत् मम पिता ज्ञास्यति, तर्हि मे कुशलं मा जानीहि। अतिकाठिन्येन तु त्वया सह आगन्तुमनुमतिः प्रदत्ता।'

'एकस्मिन् दिने किं भविष्यति?—समयेन प्रत्यागमिष्यावः। चल मित्र।'

भूरत्नः समर्पणमकरोत्। ततः प्रभृति प्रायेणैव कदाचिच्चलचित्रेण मनोविनोदार्थं कदापि क्वचिन्निरुद्देश्यमटितुं क्रमः स जातः। धूमवर्तिकास्वादमप्यन्वभवत् भूरत्नः। एवम् अध्ययनाद् विरतो जातः। परिणामतः परीक्षायामनुत्तीर्णोऽभवत्।

परीक्षाफलं दृष्ट्वा व्योमरत्नस्य महती वेदनाऽजायत। यदा भूरत्नः गृहमभ्यगात् तर्हि व्योमरत्नस्य विषण्णं मुखं दृष्ट्वा भूरत्नस्य स्वप्नभङ्गो जातः। अपराध-भावेन ग्रसितः सः पितरं मुखं दर्शयितुं नापारयत्। विश्वासं प्रति तस्य रोषोऽजायत। पुनः आत्मग्लानिर्मनसि स्थिता। आत्मानमेव गर्हन् क्रोशितवान्—

'कथमहं विश्वासस्य कथनेन स्वसीमानं पितुराचरणञ्च विस्मृतवान्? किं करवाणि इदानीम्? तातं स्व मुखं न दर्शयिष्ये।'

एवं चिन्तयन्नेव सः कमपि विना ज्ञापयित्वा गृहान्निःसृतः। स्वचालितयन्त्रमिव सः रेलस्थानकं प्रति प्रस्थितः। तत्र निरुद्देश्यम् अनिर्दिष्टमार्गोऽनिश्चितदिशि गन्तुं, स्थितायां शिबिकायामुपाविशत्। गन्त्री स्वगन्तव्यं प्रस्थिता। प्रचलितायां गन्त्र्यां भूरत्नस्य वाष्पवेगोऽस्फुटत्। किन्तु कथमपि तमवरोध्य विचारशतैरुद्विग्नमानसोऽभूत्—

'क्व गच्छानि? किं करवाणि? अपरिचिते स्थाने कं शरण याचिष्ये? को वा मम साहाय्यं करिष्यति?....गृहे तातः अम्बा अनुजाश्च किं चिन्तयेयुः?' इत्यादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतः गृहे व्योमरत्नः चिन्तित आसीत्। सायंकालपर्यन्तं यदा भूरत्नोः न प्रत्यागतः तर्हि कस्यापि अनिष्टस्याशङ्का तं व्यग्रमकरोत्। विश्वासस्य गृहं गत्वा तस्य विषये पृष्टम्। सोऽनभिज्ञतामेवप्राकटयत्। शिरो धुन्वन्नास्त वराको व्योमरत्न तदानीम्।

'कुत्र गतो भवेत्? कथं परीक्षाफलमेव तत्र कारणमपरमपि वा किञ्चित्? अस्माभिः संस्कारप्रदाने काचित्त्रुटिर्जाता वा?'

इष्टपरिजनानां गृहेषु भूरत्नवृत्तं ज्ञापयित्वा तद्विषयकं परिप्रश्नं कुर्वन् निराश एवागतः व्योमरत्नः। एतादृशी विपत्तिस्तु प्रथमवारमापतिताऽसीत्। किंकर्तव्यविमूढः सः जागरन्नेव रात्रिं यापयत्। तस्य पत्नी तु केवलं शून्यं विलोकयन्ती अतिष्ठत्।

गन्त्री क्षिप्रगत्या गच्छन्ती आसीत्। भूरत्नस्य मस्तिष्कोऽपि गतिमान आसीत्। अथ रात्रिः समायाता। तं भृशं बुभुक्षाऽबाधत। परं तस्य पुटके तु कर्दमोऽपि नासीत्। स्वयमेव आत्मानं गर्हन्नास्ते—

'न जाने कस्मिन् क्षणे विश्वासेन समं मे सम्बन्धो जातः? इदानीं मे दशा त्रिशङ्कुरिव जाता। हतभाग्योऽहं न भविष्यं द्रष्टुं शक्नोमि न चातीतम्। गृहस्य स्मृतिः ग्लपयति माम्। किन्तु प्रत्यावर्तनं कर्तुं न सहे।...दैवम् एव प्रमाणमिदानीम्।'

पुनरपि बुभुक्षा तीव्रतरा जाता। एकस्मिन् स्थानकेऽवतीर्य प्रभूतं जलं पीत्वा बुभुक्षा शामिता। पुनरागत्य एकस्याः निषद्यायाः कोणे सङ्कुचितः। मध्यरात्रौ निद्रापराः सर्वे यात्रिण आसन्। भूरत्नोऽपि निद्रामग्नोऽभूत्।

तावत् स्वप्ने तेन दृष्टं, यत् स एकेन महावने गच्छन्नस्ति। गहनं प्रविश्य तेन मार्गो विस्मृतः। व्याकुलः सः कथमपि वनाद्बहिः निःसरितुं प्रयतते, वनं विलुप्यते। तत्स्थाने मरुमरीचिका दृश्यते। सर्वतः सिकता प्रसृता। भूरत्नं पिपासा व्याकुलयति। सः सिकतासमुद्रे धावितुं प्रयतते, किन्तु पादावग्रे न सरतः। धावन्नपि स एकस्मिन्नेव स्थाने तिष्ठति। श्रमेण भयाच्च कण्ठावशोषो भवति। स्वेदेन शरीरमार्द्रं भवति। तस्य मूर्च्छा इव आगच्छति तत्क्षणमेव नातिदूरे एकः स्वच्छः निर्मलः जलाशयोऽवलोक्यत। भूरत्नः कथमपि एकमेकं पदं गत्वा जलाशयं प्राप्नोति। किन्तु यदैव सः जलं गृहीतुमिच्छति, तस्मिन्नेव समये तस्माज्जलाशयादेका सर्वाङ्गसुन्दरी अप्सरा प्रकटीभूय तं वारयति—

'तिष्ठ भोः जलं पातुमिच्छसि। अस्मिन् जलाशये न सर्वे जलं पातुं शक्नुवन्ति। त्वं देवतुल्यौ स्वपितरौ अवमान्य गृहात्पलायितः। न त्वं जलं स्वीकर्तुं योग्योऽसि।'

भूरत्नो गद्गदस्वरेण ब्रवीति—

'मातः! देवि! पिपासया मम प्राणाः कण्ठगताः विद्यन्ते। कण्ठं स्वल्पजलेन सिञ्चितुमीहे। रक्ष मम प्राणान्।'

'भोः त्वया न विचारितमेतद्, अपि ते पित्रोरपि प्राणाः त्वया विना कण्ठगताः भवेयुः?' सुन्दरी अतर्जयत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूरत्न: करबद्धो निवेदयति—

'सत्यं वदामि, लज्जितोऽस्मि आत्मकृत्ये। पितृभ्यां विना मयापि सुखं न लभ्यते।'

'तर्हि गृहं प्रति गच्छ।'

आदिशन्तीव सा अभ्यधात्।

'साहसं न विदधे। न जाने पिता कथं व्यवहरिष्यति।' भूरत्नस्य स्वरे भयमासीत्।

सा कृत्रिमकोपेन आश्वासयति—

'अये मूर्ख ! किं पिता शत्रुर्भवति ? अपि ते पश्चात्ताप: वास्तविक: ? सत्यं चेत्तर्हि शुद्धमना गृहं प्रत्यावर्त्य क्षमायाचनां कुरु। मनसि च श्रेष्ठो भवितुं सङ्कल्पं विधेहि।'

इति स्नेहेन तस्य शिरसि हस्तं स्थापयित्वा अन्तर्हिता भवति, तस्या: स्थाने व्योमरत्नस्याकृति: दृश्यते।

सम्भ्रमेण भूरत्न: जागृत:। पञ्चकलाभि: स्वस्थो जात:, किन्तु भय-हर्ष-सङ्कल्प-विकल्पानामावेग: तस्य शरीरे कम्पमुदपादयत्। स्वेदार्द्रं तस्य शरीरमभूत्। स्वप्नस्य चित्रं साक्षादेव सजीवतयाऽन्वभवत्।

किञ्चिदपि हृदि निश्चयं विधाय आगमिनि स्थानेऽवतीर्य स: स्थानकाधीक्षकमुपसृत्य सर्वं स्ववृत्तं न्यवेदयत्, लखनऊनगरं प्रति गमनाय साहाय्यं च प्रार्थयत्।

अधीक्षक: भद्र-पुरुष आसीत्। तस्य भोजनस्य व्यवस्थां कृत्वा दशरूप्यकाणि च दत्वा स्वयमेव लखनऊ-नगरं प्रति गम्यमानायां गन्त्र्यामुपवेश्य चिटिकाहरं (टी. सी.) च विज्ञाप्य उपदिष्टवान्—

'वत्स, सायंतने नु गृहमागता एव पान्था:' न त्वमिदानीं शोच्योऽसि। गच्छ, साहसं विधाय गृहं प्रतिगच्छ।'

अपरिचितस्य तादृगात्मीयभावं दृष्ट्वा भूरत्नस्य वाष्पपूर्णा दृष्टि:। सहजेनैव चरणवन्दनपूर्वकमभिवादनं कृत्वा प्रस्थित:।

गृहस्य समीपे गत्वा कथमपि साहसं कृत्वान्त:प्रविष्ट:। प्राभातिकी सन्ध्याऽसीत्। अनुजा: एकस्यामेव खट्वायां लुण्ठिता आसन्। आसन्द्यां व्योमरत्नो नतशिर: निमीलितनेत्र उपविष्ट आसीत्। पार्श्वे एव तस्य पत्नी मुखमवगुण्ठ्य भूमावेवोपविष्टा आसीत्।

भूरत्नस्य हृदयं स्फुटितम्। सवाष्पवेगं प्रलपन् स: पितु: पादयोरपतत्। पित्रा श्लिष्ट:। माता वारं-वारं परिचुम्ब्याश्लिष्य च सोपालम्भं भाषितवती—

'पुत्रक, कथमस्मान् विमुच्य गतवान्? क्वगत आसी:? किं त्वया मनस्यवधृतम्? अस्माभिस्तु तर्ज्यसेऽपि न कदापि। अपि न त्वया स्मृतं मातृमुखम्? न विचारितो पितुर्गौरव:? न विचारितं यत्त्वया विना कथं स्थास्यति तेऽम्बा?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूरत्नः प्रमत्त इव विलपन् पश्चात्तापं कृतवान्—

'अम्ब ! तात ! निर्घृणोऽस्मि। युवयोः सारल्यं वञ्चितं मया। अनिष्टमार्गे निरुद्धोऽहम्। भवतां परिश्रमेणार्जितं धनं मया प्रमादेन नष्टीकृतम्। क्षमस्व मां मातः। क्षमस्व पितः।'

व्योमरत्नः तमुत्थाप्य वर्धापनं कृत्वा गम्भीरवाचाऽवोचत—

'उत्तिष्ठ वत्स, प्रथमापराधस्ते तवानेन पश्चात्तापेनैव क्षमायोग्योऽभूत्। अवधारय, स्वजनः कथमपि न वञ्चनीयः। ऋजुमार्गेण, साहसेन, परिश्रमेण च सिद्धिरवश्यम् अधिगन्तुं शक्यते। परिमार्जयाश्रूणि। नाधुनापि कालो व्यतीतः सिद्धिमधिगन्तुम्।'

पितुः व्यवहारेण भूरत्नस्य मनोबलं नैतिकबलञ्च पुष्टिमवापतुः। ततस्तु तस्य जीवनमेव परिवर्तितम्। आगमिनि सत्रे सः न केवलं परीक्षायामेव प्रथमश्रेण्यामुत्तीर्णोऽपितु क्रीडाभाषणादिपाठ्य-सहगामिक्रियाकलापे व्यवहारसौजन्ये च सर्वोत्तमं स्थानं लब्ध्वा विद्यालयस्य सर्वश्रेष्ठः छात्र उद्घोषितः।

अद्य तस्य विद्यालयस्य वार्षिकोत्सवस्य समापने पुरस्कारवितरणमायोजितम्। भूरत्नः सर्वाधिकान् पुरस्कारान् स्वीकृत्य यदा मञ्चादवातरत् तर्हि व्योमरत्नः स्वोपनेत्रम् अपसार्य नेत्रे प्रोञ्छन्नासीत्। पितुश्चरणौ स्पृष्ट्वा यदा स्थितः तर्हि समक्षे भित्तौ तस्यदृष्टिः निपतिता यत्र सूक्तिरियं प्रहसन्तीवालिखिताऽसीत्—

'सङ्कल्पेन न किं साध्यम्?'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयन्ती

—विष्णुकान्तझा

वरिष्ठव्याख्याता, लक्ष्मीदेवीशराफ-आदर्श-संस्कृत-महाविद्यालयः,

हरिशरणकुटीरः, कालीराखा, बी० देवधर, बिहारः-८४४११२

प्राचीनकाले मिथिलायाम् गोनौली नामकः एकः सुरम्यः ग्राम आसीत् । तत्र शिक्षायाः नितान्तम् अभावः आसीत् । सर्वे जनाः कृषकाः आसन् । केचित् विप्रवर्गीयाः जनाः बाल्ये अल्पमध्ययनं विधाय पौरोहित्यकर्म कुर्वन्ति स्म । ते षट्कर्मसु पारगामिनः आसन् । तेभ्यः सर्वे कृषकाः अन्ये च पौरोहित्यकर्मविषये परितुष्टाः भवन्ति स्म । ब्राह्मणानामन्येषां च वर्णानां यत्र कुत्रापि उपनयनविवाहादिकर्मणाम् आवश्यकता आसीत् ते पुरोहिताः तत्र तत्र परिचयं संस्थाप्य, गच्छन्ति स्म विधिवत् कर्मकाण्डम् च सुसम्पादयन्ति स्म । अनेन प्रकारेण तदीयः योगक्षेमः भगवत्कृपया सम्यगेवासीत् ।

ब्राह्मणाः अल्पीयस्याः भूमेः स्वामिनः आसन् अतस्तेषां जीवनयापनाय पौरोहित्य-कर्म आवश्यकमासीत् । अत्र कर्मणि तेषां प्रवेशः स्वाभाविकः एव । मनुनापि विप्राणां कर्मसु **'अध्यापनमध्ययनं च यजनं याजनं तथा । दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयद्'** इत्युक्तवता याजनम् गणितमेव ।

सर्वे ब्राह्मणाः अन्ये च जनाः देवनिष्ठाः देवेषु निक्षिप्तसर्वस्वाः कर्तव्यपरायणाः परिश्रमिणः आचारविचार चतुराः लोकव्यवहारकुशलिनः परम्पराप्रेमिणः पारस्परिकव्यवहारपटवः कोमलहृदयाः नीतिदक्षाः समीपस्थ मुक्तिनाथमहादेवलिङ्गप्रपूजकाः च आसन् ।

ब्राह्मणेषु एकः महारुद्रशर्मा पुत्रविहीनत्वात् भृशं दुःखितः अभूत् ।

देवकृपावशात् यौवनावसाने तस्य गृहे एका पुत्री समजायत । अपुत्रतासमुद्भूतशोकेन सः अत्यन्तम् खिन्नः वसति स्म । सा पुत्री एव तदीयम्, सर्वस्वम् आसीत् । तस्याः नाम जयन्ती कृतम् ।

किन्तु क्रूरः मृत्युः कस्मिन् कदा दयते ? तेन महारुद्रशर्मणः पत्नी पश्यन्ती अपि कवलिता । एतेन तस्य मर्मान्तकी पीडा समुद्भूता । सः यौवने एव जराजर्जरितः चिन्ताचिताशयित इवाहर्निशं रुग्णः समजायत ।

गच्छति च काले कदाचिन्महारुद्रः स्वप्ने ददर्श यत् सोऽपि आसन्नमृत्युः अस्ति । तदीया मातृविहीना पुत्री तं सततं रुदन्तमवलोक्य यदा कदा उच्चैः रोदितुमारभते । तावत् सः सहसा भयाक्रान्तः व्यबुध्यत सप्तवर्षदेशीया तत्पुत्री त्वरितमेव तदीयक्रोडम् समागमत् । तस्य प्रतिवेशी देवदत्तशर्मा तदीयरोगशमनाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिकित्सकात् चिकित्सकं गच्छति किन्तु तदीयरोगः न शान्तिमुपैति। एतदाभ्यन्तरेऽपि सः यथा कथञ्चित् स्नानं विधाय दैनन्दिनपूजनं न परित्यजति। अकस्मात् तस्य स्वास्थ्यम् परिवर्तितम्। सः नीरोगः अभूत्।

पिता प्रतिदिनं प्रातः चतुर्वादने स्वयं जागर्ति, स्वकीयां पुत्रीं च जागरयित्वा प्रातः स्मरणं करोति। क्रमशः जयन्ती श्लोकान् गातुमारेभे। तस्याः स्वरः हृदयहारी श्रवणसुखदः च आसीत्। तत्स्वरं श्रावं श्रावं पिता मंत्रमुग्ध इवाभवत्। सः मनसि इदम् समकल्पयत् यत् इमां येन केन प्रकारेण, बहुषु स्थानेषु गत्वा पौरोहित्यकर्मसम्पादन द्वारा, भिक्षायाचनेन वा प्राणार्पणेन वा सुशिक्षयिष्यामि। येन लब्धयौवनेयं विद्यावारिधिरुपाधिविभूषिता कस्मिंश्चिन्महाविद्यालये व्याख्यात्री भूत्वा अस्माकं ग्रामस्य मिथिलाञ्चलस्य च नाम सम्पूर्णे देशे प्रख्यापयिष्यति। वित्तविगर्हितं च मां द्रव्यदानेन आनन्दयन्ती स्वकीयान् पतिपुत्रादीन् सेवमाना सुशिक्षयन्ती च यावज्जीवं सुखिनः गर्वोन्नतांश्च कारयिष्यति।

तदा प्रभृत्येव सः स्वसंकल्पानुसारं पुत्रीनामाङ्कनं स्थानीयसंस्कृतपाठशालायामकारयत्। स्वयं च सम्यगुत्साहयन् समीचीनानुशासनेन साकं तां पाठयितुं प्रारब्धवान्। त्रिचतुर्षु वर्षेषु व्यतीतेषु जयन्ती प्रथमापरीक्षां प्रथमश्रेण्यां समुत्तीर्णवती।

एतेन अशिक्षिते तस्मिन् ग्रामे आनन्दोत्सवः संवृत्तः प्रसन्नवदनः पिता ब्राह्मणान् आहूय अन्यांश्च यथोपलब्धान् सर्वानपि आहूय शर्करोदकं यथेच्छम् अपाययत्। परितुष्टाः ग्राम्याः अशेषशुभाशीराशिं तस्यै प्राददुः। ग्रामीणजनैः निरतिशयं समुत्साहितः सः पुत्र्याः पाठनार्थम् भूरि धनमर्जयितुं समलगत्। सः ग्रामाद् ग्रामान्तरं गच्छन् विविधप्रकारकाणि एकादशीव्रतोद्यापन-आकाशदीपदानादिकर्मणाम् पौरोहित्येन कृषिकर्मणि परमश्रमेण चात्यन्तम् द्रव्यार्जनं विधाय ट्यूशनमाध्यमेनापि पुत्रीपाठनव्यवस्थाम् अकरोत्।

एवं व्यगात् वर्षत्रयम् तावत् जयन्ती मध्यमापरीक्षाम् प्रतिशतम् अशीतिरङ्कैः समुत्तीर्य न केवलं ग्रामेषु अपितु स्वकीये मण्डले चापि प्रथमं स्थानं लब्धवती।

कैशोर्ये पदं निदधती स्वेच्छया, पितुः दृढतरं संकल्पेन च लब्धावसरा गीतवाद्यादिशिक्षणेऽपि समभ्यस्ताऽभूत्। सा प्रत्यूषे चतुर्वादनादेव अध्ययने संरता सप्तवादनं यावत् पूर्णदत्तावधाना स्वाध्यायं विदधाति। पश्चाद् व्यायामं कृत्वा स्नात्वा भोजनं निर्माय सश्रद्धं पूजनान्निवृत्तं पितरं भोजयति ततः स्वयं भुङ्क्ते। तदूर्ध्वं क्रोशमिते ग्रामाद्दूरे स्थिते महाविद्यालये पठितुं याति। महाविद्यालये सर्वैः साकं सुसाधु समाचरति। अध्ययनविषयकं अन्यं वा प्रश्नं पृष्टा सा सत्वरमुत्तरयति। सङ्कोचाद्दूरं गता यम् कमपि विषयमधिकृत्य भाषणादिकं ददाति महाविद्यालये सरस्वतीपूजावसरे नाटके क्रीड्यमाने सा आनन्देन भागं गृह्णाति तथा च शकुन्तलादिनायिकानाम् अभिनयद्वारा दर्शकान् नितरामानन्दयन्ती पुरस्काराननेकान् प्राप्य सर्वस्य प्रशंसापथं सवेगं सहर्षं चावतरति।

ततः गृहं प्रस्थिता किञ्चित् भुक्त्वा खेले मनो नियुङ्क्ते। खेलनादागता पुनः अध्ययने संरता भवति। सा सामाजिककार्येषु अपि सोत्सुका सावधाना च अग्रे तिष्ठति सर्वदा। कुत्रापि पथनिर्माणविषये, दुर्गामूर्तिं निर्माय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूजनादिविषये तदीयपरामर्शस्य साहाय्यस्य च समाजे महत्त्वपूर्णम् मूल्यमस्ति । प्रायः सर्वेषु कार्येषु तदीय सूक्ष्मेक्षणस्य सहयोगस्य चावश्यकता सर्वस्यापि भवति । सा कथयति स्म यत् मम श्रमः अमूल्यम् धनम् नैतदतिरिक्तं भाग्यादिकम् अहं किमपि मन्ये । सा यथा वक्ति तथा करोति ।

काले व्यतीते जयन्ती संस्कृतविषये स्नातकोत्तरपरीक्षाम् उत्तीर्णवती । अस्यां परीक्षायां सा प्रतिशत नवतिरङ्कैः सफलासंजाता । सहैव गीतवाद्ये च सा कुशला संजाता सा स्वपरिवारे समस्तवस्त्राणां सीवनं स्वयं करोति । सीवनयन्त्र द्वारा अखिलानि वस्त्राणि सीव्यति । अन्येषामपि यथावसरं सीवने साहाय्यम् करोति व्यायामेन तदीयं शरीरं सौष्ठवमापेदे । तदीयमुखादिलावण्यम् सातिशयि अभूत् । प्राप्तावसरं यौवनं अङ्गे सन्नद्धम् कुसुममिव लोभनीयम् संवृत्तम् । तदीयं सौन्दर्यम् वाक्पाटवं देहमार्दवं च दृष्ट्वा सर्वे तदीयां प्रशंसां कुर्वन्ति स्म । यथा संस्कृते तदोया बुद्धिः कुशाग्रा आसीत् तथैव आङ्गल्यां हिन्द्यां च काव्यप्रकाशरसगंगाधरादिग्रन्थानामानुशील्येन काव्यशास्त्रे तस्याः कश्चिदभिनवः गाढश्चाधिकारः । उत्तर रामचरिताभिज्ञानशाकुन्तलादिनाटकानाम् दृढतरस्वाध्यायेन तस्याः आश्चर्यकारिण्याः प्रवक्तृतायाः चर्चामकुर्वाणः जनः दुर्लभः दृश्येत । रामायणस्य वाल्मीकीयस्य पाठं सा प्रतिदिनं करोति । काव्यनिर्माणे तदीयं पाटवं चमत्कारि दृश्यते ।

श्रीमद्भगवद्गीतायाः कञ्चन श्लोकं स्वैरं चर्चाविषयं कुर्वद्भिः विद्वद्भिः सा मोदमाना तस्मिन् विषये साधिकारं वक्ति । किम्बहुना मैथिलीप्रभृति भाषास्वपि सा वैलक्षण्यम् अधिगतवती । कलासु च वैचक्षण्यम्।

व्यतीतेषु बहुषु हायनेषु जयन्ती विद्यावारिध्युपाधिप्राप्तये मिथिलाशोधसंस्थाने नामाङ्कनमकारयत् तस्याः शोधविषयः आसीत् मुरलीधरझामहोदयस्य व्यक्तित्वं कृतित्वञ्च । इदं शोधकार्यमुद्दिश्य सा वाराणसीस्थस्य स्वपितुः प्राथमिकशिक्षामित्रस्य श्रीबालकृष्णमिश्रस्य चरणसरोजमाश्रितवती । तत्र सा यावदहर्निशं पुस्तकालयेषु गत्वा गुरुमुखात् श्रुतेनानुपमेन अनुसंधानतत्त्वेन च सा स्वकीयं शोधग्रन्थं पूरितवती पूर्णे शोधकार्ये 'संस्थानम्' डाक्टरोपाधिना ताम् व्यभूषयत् ।

अद्य सा डा० जयन्ती देवी इति नाम्ना सर्वैः अभिधीयते । तां दृष्ट्वा सर्वे पापमुक्तमिव आत्मानं मन्यन्ते स्म । ग्रामे ग्रामे तस्याः परिश्रमस्य चर्चा भवति, तदीयातुलसाहसस्य प्रशंसां कुर्वन्तो जनाः न श्राम्यन्ति । किम्बहुना ग्राम्यबालकेष्वपि तस्याः अध्ययनतुलां नारोहति कश्चित् ।

१९५० तमे खृष्टाब्दे तस्याः पिता कालीकान्तशर्मणा समम् तदीयपरिणयम् अकारयत् । कालीकान्त झामहोदयः कार्यपालकः अभियन्ता आसीत् । जयन्तीदेव्याः पतिगृहप्रस्थानसूचनां प्राप्य सर्वे जनाः तदीये प्रास्थानिकेऽभिनन्दने समवेताः नेत्राभ्यां अश्रूणि विमुञ्चन्तः स्वस्वगृहं दुःखिताः परावर्तन्ते स्म । जयन्ती पितृगृहं त्यक्तवती किम्वा साकारवती विद्या तं ग्राममत्यजत् इति निर्णयः सर्वेषां कृते दुष्करः अस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

टिन्-टिन् वृद्धः

—डा. बनमाली विश्वालः
वरिष्ठ प्रवक्ता, गङ्गानाथझा केन्द्रीयसंस्कृतविद्यापीठम्,
आज़ाद पार्क, इलाहाबाद नगरम्-२११००२ दिल्ली

"टिन्-टिन्-वृद्ध आगतोऽस्ति ।
टिन्-टिन्-वृद्ध आगतोऽस्ति ॥"

तस्यागमनेन ग्रामस्य समस्तबालकाः हर्षोत्फुल्ला अभवन् । कश्चिद् भोजनं त्यक्त्वा अर्द्धभुक्तोऽपि मध्ये एव बहिरागच्छत् तं द्रष्टुम् । अपरश्च कश्चित् शौचादिकमकृत्वैव अन्यैश्च बालैः सह टिन्-टिन् वृद्धम् अन्वसरत् । तडागे, क्षुद्रपल्वले वा मत्स्यान् मारयन्तः हरिजनवसतेः बालाः मत्स्यमारणदण्डान् स्कन्धे स्थापयित्वा अधावन् । समग्रग्रामस्य ये चासन् वीथीकुक्कुरास्ते सर्वे युगपदेव अबुक्कन् । धावन्तः बालाः करतालं वादयित्वा नर्तितुं प्रारभन्त । कुक्कुरा अपि इतस्ततः धावितुं प्रारभन्त । सर्वेषां कोलाहलस्यासीदेक एव लक्ष्यम्—टिन्-टिन्-वृद्धः । स तेभ्योऽभिक्रुध्य यावतीः गालीः ददाति स्म, बालास्तमभिलक्ष्य तावद् उपहासं कुर्वन्ति स्म । कश्चित् तस्य पश्चकच्छमाकर्षति, कश्चिदपरस्तस्य छत्रं, हस्तदण्डं च चोरयति स्म । अन्ये च केचन मुष्टिभिः धूलिं गृहीत्वा तस्य भिक्षापात्रे क्षिपन्ति स्म ।

"अल्पायुषाः ! रण्डापुत्राः ! ! न जाने युष्माकं मातरः कति पुरुषान् वरयित्वा युष्मान् अजनयन् ।"

टिन्-टिन्-वृद्धस्य अग्निवर्षिभिर्गालिभिः गगनपवनौ मुखरितौ अभवताम् ।

एषा तु शाश्वतिकी घटना शहीदपुरग्रामस्य टिन्-टिन्-वृद्धस्यागमनकाले । बालकास्तु तं कथमपि न त्यक्तुं बद्धपरिकराः दृश्यन्ते स्म । वृद्धस्य क्रोधमिश्रितां गालिं भ्रूक्षेपकुर्वन्तस्ते बालाः स्वस्वकर्मणि व्यस्ताः भवन्ति स्म । बालैः सहोत्साहिताः केचन दुष्टमतयो युवानः, अर्द्धवृद्धा अपि टिन्-टिन् वृद्धं व्यथयितुं तत्पराः दृश्यन्ते स्म । एतादृग् विचित्रदृश्यं केवलं शहीदपुरग्रामे द्रष्टुं मिलति । एतादृग् दृश्यं कदाचिद् ग्रामान्तरेष्वपि सम्भवेत् यदा टिन्-टिन्-वृद्धस्तं तं ग्रामं गच्छति भिक्षाटनार्थम् । यदा कदा वानराणामागमनेऽपि ग्रामेषु एतादृग् दृश्यं सुलभं भवति ।

टिन्-टिन्-वृद्धः जात्या ब्राह्मणः । वेलपडाशासनं तु तस्य मूलावासः । परन्तु प्रकृत्या यायावरस्य तस्य सम्बन्धः मूलावासेन सह नगण्य एवासीत् । स तु यथेच्छं यस्मिन् कस्मिन् ग्रामे स्वनिवासं कल्पयति स्म । तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृतनामापि न कोऽपि जानाति शहीदपुरग्रामे, ग्रामान्तरे वा । वृद्धस्य कोपशीलस्वभावात् सर्वे तं टिन्-टिन्-वृद्ध' इति नाम्नैव तं जानन्ति ।

वृद्धस्य वयः षष्टिः द्विषष्टिर्वा भवेत् । परन्तु शहीदपुरग्रामस्य बालास्तेन सह विंशतिवर्षीयो बालक इव व्यवहरन्ति । परम्पराक्रमेण सः बालेष्वतिपरिचितो वर्तते । बालानां यावदायुर्वर्द्धते तावत् ते टिन्-टिन्-वृद्धस्य सामीप्यं, सान्निध्यं च स्वयमेव त्यजन्ति, अथवा त्यक्तुं विवशाः भवन्ति । समयाभावात् ते पुनः टिन्-टिन्-वृद्धस्योपरि पूर्ववद् अत्याचारं कर्तुं नेच्छन्ति । तेषामुत्तराधिकारिणस्तु तेषां स्थानानि पूरयन्ति । अतः टिन्-टिन्-वृद्धस्य दुर्दशायां न किमपि उल्लेखनीयं परिवर्तनं भवति ।

चत्वारिंशद्वर्षेभ्यः प्राक् यदा विवाहार्थं समाजे कन्यानां नितरामभाव आसीत्, तदानीमपि टिन्-टिन् पञ्चशतरूप्यकविनिमयेन विवाहमकरोत् । स्वल्पकालात्मके गार्हस्थ्येऽपि सन्ततयः । सोऽपि स्वयं गाञ्जा (मादकबीजविशेषस्य)-प्रियः । उपरि वृत्तिहीनत्वादायशून्यः । पौरोहित्यं कृत्वा यत् किञ्चिदुपार्जयति स्म तद् गाञ्जापानार्थमपि पर्याप्तं नासीत् । स्वबालानां खाद्यकष्टं शमयितुमसमर्थः, धर्मपत्न्याः गालिं च सोढुमसमर्थः सः गृहं त्यक्त्वान् । त्यक्तवांश्च सकलगार्हस्थ्यम् । टिन्-टिन् यद्यपि गृहं त्यक्तवान् तथापि खाद्यचिन्ता तं न त्यक्तवती । तस्यैतादृशः गृहत्यागचरित्रात् पौरहित्यवृत्तिरपि समाप्तिं गता । भिक्षा-याचनादतिरिक्तं तदानीमुपायान्तरं नासीत् तत्सविधे । ग्रामाद् ग्रामान्तरं गच्छन् स भिक्षार्थमटति स्म । अद्यास्मिन् ग्रामे, श्वः कस्मिंश्चिदन्यस्मिन् ग्रामे तस्य वसतिरासीत् । परन्तु वेलपडाशासनस्य नाम तेन पुनः भ्रमादपि न गृहीतम् । यदा कदा यदि तस्य सन्ततीतां स्मृतिर्मनस्यायाति स्म तर्हि स तां परक्षणमेव मनसो निराकरोत् । कस्यचित् त्यागो वा भवतु मरणं वा भवतु सम्बन्धिनां उभयत्र समानेव स्थितिर्भवतीत्यन्वभवत् सः ।

टिन्-टिन्-वृद्धः स्वभावेनातिशयभोजनप्रियः दशपञ्चाशद्ग्रामेषु कस्य कदा विवाहः, व्रतोपनयनं, श्राद्धः, एकादशाहः, त्रयोदशाहः अथवा अष्टप्रहरं नामसंकीर्तनं भवति, भविष्यति वा तत् सर्वं सः प्रागेव जानाति स्म । तेषु कार्यक्रमेषु सम्मिलितुं तस्य कृते निमन्त्रणस्यावश्यकतैव नासीत् । समुचितसमये एवागत्य सः कदलीपत्रं प्रासारयत् पङ्क्तिभोजनाय । इदमेवासीत्तस्य वैशिष्ट्यम् । वर्षा वन्यावात्यादीनि न कदापि तस्य प्रतिबन्धकान्यभवन् भोजनविषये । मृताहश्राद्धादिषु यजमानस्य ब्राह्मणान्वेषणकार्यभारं प्रायः टिन्-टिन् एव निर्वहति स्म । यदा कस्यचिद् गृहे कश्चिन्म्रियते तदा टिन्-टिन्-वृद्धस्य मनसि प्रसन्नता भवति । द्विरहादारभ्य त्रयोदशाहं यावत् तस्य गृहे स्थित्वा तत्र ब्राह्मणभोजनं च कृत्वा सः यजमानमुपकरोति, मृतात्मानञ्च तारयति । तस्यैतादृशं व्यवहारं दृष्ट्वा जनास्तमुपहसन्ति । "कस्यचित् सर्वनाशः कस्यचित्तु पौषमास" इत्याभाणकं च स्मरन्ति जनास्तस्य प्रसङ्गे ।

मनुष्योपरि सम्भावितानां दुष्टग्रहाणां प्रभावं ह्रासयितुं उत्तमब्राह्मणेभ्यो विशिष्य कृष्णब्राह्मणेभ्यो भोजनदानस्य प्रसिद्धिरस्मत्परंपरायां वरीवर्ति । ग्रहमुक्तिभोजनार्थं सामान्यतया ब्राह्मणाः प्रस्तुताः न भवन्ति । ते तज्जनिताद् दुष्प्रभावाद बिभ्यति । मार्जारकपाले स्वयमेव दुग्धपात्रपतनमिव प्रसङ्गेऽस्मिन् टिन्-टिन्-वृद्ध एव सर्वेषां त्राणकर्ता भवति । वस्तुतः तस्मिन् क्षेत्रे एतादृशेषु प्रयोजनेषु जनाः निश्चिन्ता एव तिष्ठन्ति । ते जानन्ति यत् टिन्-टिन्-वृद्धाद् अपरः कश्चिदुत्तमः कृष्णकायो ब्राह्मणो न सम्भविष्यति संसारे । स तु सकलग्रहाणां मूर्तिमान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai

प्रतिरूपः। ग्रहेभ्यस्तस्य को भयः? अद्यत्वेऽस्मिन् महार्घतमे युगे विनामूल्येन एतादृशं सरसभोजनं कस्त्यक्तुमर्हति?

वस्तुतः टिन्-टिन्-वृद्धः नियमितरूपेण सर्वेषां गृहे ग्रहमुक्तिभोजनं कृत्वा स्वोदरे सकल-ग्रहनक्षत्राणि स्थापितवान्। यावांश्च भवतु महान् दुष्टग्रहः स टिन्-टिन्-वृद्धस्य जठराग्नौ अचिरात् सुनियन्त्रितो भवति। अतिशयगाञ्जापानं कृत्वा सः क्रमशः नीलकंठः शिव इव संवृतः। हला-हलं विषमपि तस्योदरे सुजीर्णं भवति। का कथा पुनरेषां दुष्टग्रहाणाम्? वस्तुतः स गाञ्जापानमेकं दिनं न करिष्यति चेत् तर्हि तस्य सम्पूर्ण-शरीरे समस्तग्रहाः बुध-शुक्र-शनिबृहस्पत्यादयः आविर्भविष्यन्ति सशरीरम्।

समयानुपातेन टिन्-टिन्-वृद्धस्य वयोऽपि सम्वर्द्धितम्। वार्द्धक्यमपि तस्य बुद्धितः द्वितीयविवाहस्याभिलाषं निष्कासयितुं नाशक्नोत्।

विवाह एव तस्य जीवनस्य परमदुर्बलता। यद्यपि सः सरलविश्वासी नास्ति तथाप्यागते च विवाहप्रसङ्गे सोऽविश्वस्तमपि पुरुषं विश्वसिति। एकवारं विवाहं कृत्वा यः गार्हस्थ्याश्रमभारं वोढुमसमर्थोऽभवत् सः पुनर्विवाहं कर्तुं किमर्थमिच्छति, कथं वा साहसं करोत्येतत्तु केवलं टिन्-टिन्-वृद्ध एव जानीयात्।

एकदा शहीदपुरग्रामस्य युवकसंघस्य युवानः टिन्-टिन् वृद्धस्य विवाहम् लक्ष्यीकृत्य किञ्चित् परिहासकरं दृश्यं द्रष्टुमुत्साहिता अभवन्। अतस्ते तं प्रबोधितवन्तः यत् तस्मै विना मूल्येन एका विवाहयोग्या कन्या प्रदास्यते विवाहार्थम्। विवाहात्परं च तौ दम्पती ग्रामस्य समितिगृहे एव स्थातुमर्हतः। अपरं च, विवाहस्य समस्तव्ययं युवसमितिरेव निर्वक्ष्यति। टिन्-टिन्-वृद्धस्तु एतादृशः सुवर्णसुयोगस्य प्रतीक्षायामेवासीत्। यदि सुयोगमेतं स त्यक्ष्यति तर्हि कदाचिदाजीवनं विवाहं कर्तुं न शक्ष्यति अतः सः विवाहार्थं झटित्येव स्वकीयां स्वीकृतिं प्रदत्तवान्। सः वा कथं जानीयाद् अद्यतनीययूनां दुष्टस्वभावम्?

एवं टिन् टिन् वृद्धः स्वविवाहदिवसे समयेनैव शोभायात्रायां वररूपेणागतवान्। प्रसन्नश्च समितेः युवानः नृत्यमप्यकुर्वन्। परन्तु मधुशय्यायां टिन्-टिन्-वृद्धः यां नवोढाम् अमिलत् सा युवत्येव नासीत्। स तु "मकर"—नामधेयोऽन्यतमः सदस्यस्तस्याः युवसमितेः। लज्जया टिन्-टिन् शहीदपुरग्रामं त्यक्त्वा तस्यामेव रात्रौ प्रस्थितवान्। ततः षण्मासान् यावत् तस्य दर्शनं नाभवत् तस्मिन् ग्रामे। परन्तु टिन्-टिन् वृद्धस्यानुपस्थितावपि वार्तैषा तेषु दशपञ्चाशद्ग्रामेषु प्रासरत्। जीवने द्वितीयवारं मिथ्याविवाहं कृत्वा सः पथि उर्द्धवशिरश्चलितुमपि नाशक्नोत्।

यावदसौ एतं दयनीयवृत्तान्तं न विस्मृतवान् तावदपरः कश्चिद् द्वितीयो वृतान्तोऽघटत् तस्य जीवने। एकदा केचन दुष्टमनसो युवानस्तस्य ग्रामस्य कस्यचिद् यजमानस्य मेलायां पौरौहित्यं कर्तुं तमामन्त्रितवन्तः। लोभवशात् स स्वीकृतवान् तन्निमन्त्रणम्। परन्तु यदा मेलायां सः पूजनं निर्वाहयन् आसीत् तदा सुगन्धधूपपरिवर्ते 'लङ्काधूमं' दत्वा छलनया तैः प्रकोष्ठस्य द्वारं पिहितम्। निःश्वासावरोधः जातस्तस्य धूमग्रसिते तस्मिन् प्रकोष्ठे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्वासकाशैर्यदा सः व्याकुलोऽभवत् तदा ते द्वारमुन्मोच्य तं त्यक्तवन्तः। तस्माद् दिवसात् टिन्-टिन् वृद्धो मनुष्यमपि विश्वसितुमबिभेत्।

बहूनि दिनानि ग्रामान्तरेषु यापयित्वाद्य टिन्-टिन्-वृद्धः पुनरेकवारं शहीदपुरग्रामे आगतोऽस्ति। अतः पूर्वपिक्षया बालानाम् उल्लासोपहासयोः प्रवृत्तिश्च द्विगुणिता दृश्यते-'अयि भोः टिन् टिन्। अयि भो-टिन् टिन्!' इति रटन्तः ते सर्वे बालास्तमेवानुसरन्ति। क्रोधभयाभ्यामाहतः टिन्-टिन्-वृद्धः एकमुखः सन् धावमानोऽस्ति। इत्यवसरे बालेषु कश्चिदुग्रः टिन्-टिन-वृद्धस्योपरि दूरादष्ठीवत् सशब्दम्। दुर्वासःस्वरूपः क्रुद्धः टिन्-टिन्-वृद्धः मत्तकुक्कुर इव दण्डेन प्रहर्तुं तमनुधावितवान्। प्रतिशोधप्रतिज्ञायां "हुत्-हुत्" ज्वलिते चास्तां तन्नेत्रे। छत्रभङ्गमददात् बालरूपी वानरसेना। मन्ये टिन्-टिन्-वृद्धस्येतादृशमुग्ररूपं द्रष्टुं ते प्रस्तुता एव नासन्। कियत्क्षणं यावत् सर्वे शान्ता अभवन्। स्वक्रोधं यथाकथञ्चित् शमयित्वा अग्रेप्रस्थितवान् टिन्-टिन्। परन्तु पश्चभागादेव प्रक्षिप्तेन कस्यचिल्लोष्टाघातेन सोऽचेतनो भूत्वा भूमौ अपतत्। वैशाखस्यात्युष्मे धूलिपटानले लुठन् आसीत् असौ निःसहायः। तस्य कपालात् निर्गता आसन् कतिपयकृष्णरक्तधाराः। मन्ये ताः निदाघोत्तप्तां वैशाखधूलिं शमयितुं शीतयितुं च व्यर्थचेष्टाः कुर्वन्त्य आसन्। धूलिषु लुठमानं तं टिन्-टिन्-वृद्धं दृष्ट्वा केचन खेदं प्रकटितवन्तः—"किमसौ स एव टिन्-टिन्-वृद्धो यं दृष्ट्वा तत्परितः बालानां सुदीर्घा शोभायात्रा प्रचलति स्म।" परन्तु हन्त। यद्यप्येषा टिन् टिन्-वृद्धस्य अन्तिमशोभायात्रा प्रवर्तते तथापि ताम् अन्तिमशोभायात्रां द्रष्टुमस्य शहीदपुरग्रामस्य नैकोऽपि बालः, युवा वृद्धो वा तत्र उपस्थित आसीत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation

दिल्ली-संस्कृत-अकादम्याः समाचाराः

एप्रिलमासात् सितम्बर१८ पर्यन्तम् १९९९ तमे वर्षे

—डॉ० जीतरामभट्टः

१. संस्कृत-छात्रवृत्ति-वितरण-समारोहः

नवदिल्ल्याम् । २४-७-१९९९ दिनाङ्के दिल्ली-संस्कृत-अकादम्या संस्कृत-छात्रवृत्ति-वितरण समारोहः आयोजितोऽभवत् । समारोहस्यास्योद्घाटनं कुर्वन्तः मुख्यातिथयः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः प्रावोचन् यत् 'संस्कृवाङ्मये सर्वविधं ज्ञानं वर्तते । संस्कृतभाषायाः ऋषिभिः मानवस्य सर्वांगीणविकासाय सर्वं सम्यक् चिन्तितम् । ये छात्राः संस्कृतं पठन्ति, ते स्वीकीयायाः योग्यतायाः विकासं कुर्वन्ति, येषां संस्कृते विशिष्टा योग्यता भवति, ते सर्वे छात्राः पुरस्करणीयाः भवन्ति ।' अवसरेऽस्मिन् दिल्ली संस्कृत-अकादम्याः उपाध्यक्षत्वेन श्रीमतां कुलानन्दभारतीयमहोदयानां वैदिकमन्त्रैः सह अङ्गवस्त्रश्रीफलादिभिः सम्मानोऽपि सञ्जातः । अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः समारोहस्य प्रास्ताविकं ब्रुवन्तः ज्ञापितवन्तः यत् 'अकादमी छात्राणां कृते प्रतिवर्षमनेकान् कार्यक्रमान् आयोजयति, तेष्वेको कार्यक्रमः छात्रवृत्तेरपि वर्तते । वर्षेऽस्मिन् दिल्लीस्थ-माध्यमिक उ. मा. विद्यालयानां, महाविद्यालयानां, संस्कृतपाठशालानां ५७४ छात्र-छात्राभ्यः छात्रवृत्तिः प्रदत्तवतीयमकादमी, छात्रवृत्त्यामस्यां ४ लक्षरूप्यकाणां राशिः वितरितोऽभूत् ।' समारोहेऽस्मिन् विशिष्टाः अतिथयः भारत सर्वकारस्य उपशिक्षापरामर्शदातारः डॉ. नोदनाथमिश्रमहोदयाः प्रावोचन् यत् 'संस्कृतवर्षेऽस्मिन् संस्कृतस्य प्रचाराय विविधाः कार्यक्रमाः आयोज्यमानाः सन्ति, येषु दिल्ली संस्कृत अकादम्याः कार्यक्रमाणां संख्याधिकतमा वर्तते ।' समारोहस्याध्यक्षाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतयःडॉ. मण्डनमिश्रमहोदयाः समारोहस्य कृतेऽकादम्यै वर्द्धापनमयच्छन् । अवसरेऽस्मिन् श्रीमन्तः पी. के. शर्माणः, श्रीमन्तः जयन्तीप्रसादमिश्रः अनेके चेतरे विद्वांसः आचार्याश्चोपस्थिताः आसन् ।

२. 'संस्कृतवाङ्मये युद्धविद्या' इति परिचर्चा

नवदिल्ल्याम् । २८.७.१९९९ दिनाङ्के गौतमनगरस्थ-श्रीमद्दयानन्दवेदविद्यालये दिल्ली-संस्कृत-अकादमी परिचर्चमिकामायोजितवती । यस्याः विषय आसीत् 'संस्कृतवाङ्मये युद्धविद्या' परिचर्चायाः उद्घाटनं कुर्वन्तः मुख्यातिथयः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः प्रावोचन् यत् 'संस्कृत-साहित्ये सृष्टिसम्बन्धिविषयाणां सम्पूर्णं विवेचनं विद्यते । मानव-जीवनस्यादर्शाचारसंहितायाः वर्णनमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृते वर्तते। युद्धनीतेः यादृशं चिन्तनं संस्कृत-वाङ्मयेऽस्ति तादृशमन्यासु भाषासु नास्ति। कारगिलक्षेत्रे युद्धस्य वर्तमानपरिस्थितौ विषयेऽस्मिन् परिचर्चामायोज्याकादम्या सम्यगाचरितम्। परिचर्चायाः उद्देश्यं प्रस्तुवन्तः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यत् 'अकादमी संस्कृत-साहित्ये वर्णितस्योपयोगिज्ञानस्य प्रसाराय विभिन्नाः परिचर्चाः आयोजयति, तस्यामेव शृंखलायां युद्धस्य विषये परिचर्चा आयोज्यते, पुराणेषु, महाभारते, रामायणे च युद्धविद्यायाः विस्तृतं वर्णनं वर्तते।' परिचर्चायाः अध्यक्षाः केन्द्रीय-विद्यापीठस्य पूर्व प्राचार्याः डॉ. चक्रधर-बिजल्वान-महोदयाः उक्तवन्तः यत् 'वेदेषु सर्वविधं ज्ञानं वर्तते। युद्धविद्यायाः अपि तत्र विवेचनं विद्यते,' परिचर्चायामस्यां डॉ. शशितिवारी, डॉ. मोहनचन्दः डॉ. गणेशदत्त शर्मा, डॉ. कृष्णलालः डॉ. कमलाकान्त मिश्रः, डॉ. उर्मिलरुस्तगी, डॉ. काशीनाथतिवारी, डॉ. क्षेमचन्द्रः, श्रीधरप्रसादबलूनी, डॉ. दर्शनकुमारसीकरी, डॉ. भास्करानन्दपाण्डेयः, डॉ. स्वराजगुप्ता, डॉ. प्रवेशसक्सेना, डॉ. दलवीरसिंहः श्रीमदनमोहनजोशी प्रभृतयः विद्वांसः विदुष्यश्च स्वकीयान् शोधलेखान् पठितवन्तः। गुरुकुलस्य आचार्याः श्रीमन्तः हरिदेव महोदया अनेके चेतरे विद्वांसः छात्राश्चोपस्थिताः आसन्

३. पुरस्कार-वितरण-समारोहः

दिल्ल्याम्। झण्डेवालानस्थाकादम्याः प्राङ्गणे ३१.७.१९९९ दिनाङ्के दिल्ली-संस्कृत-अकादम्याः पुरस्कारवितरणसमारोहः आयोजितः समारोहस्योद्घाटनं कुर्वन्तः मुख्यातिथयः दिल्ली सर्वकारस्य शिक्षामन्त्रिणः श्रीमन्तः डॉ. नरेन्द्रनाथमहोदयाः प्रावोचन् यत्, 'विश्व-साहित्यस्य स्रोतः संस्कृतसाहित्यं वर्तते। संस्कृतभाषायामेव सर्वतः पूर्वं ऋषिभिः मनीषिभिश्च ग्रन्थरचना विहिता। कवयः लेखकाश्च क्रान्तदर्शिन भवन्ति, ते युगप्रवर्त्तकाः भवन्ति तेषां सम्मानः करणीय एव, तेभ्यः पुरस्कारान् दत्त्वा साहित्यरचनायै अभिप्रेरणा प्रदेया।' समारोहस्याध्यक्षाः दिल्लीसर्वकारस्य शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः स्वकीयेऽध्यक्षीये वक्तव्ये प्रावोचन् यद्, 'विदेशेषु संस्कृत-वाङ्मये विद्वांसः वैज्ञानिकाश्च शोधकार्याणि कुर्वन्ति, किन्तु भारते संस्कृत-साहित्ये जनानां तादृशः विश्वासः नास्ति, यादृशः आंग्लभाषायाः वाङ्मयेऽस्ति। संस्कृतस्य ऋषिभिः मानवजीवनस्य सर्वेषु विषयेषु चिन्तनं कृतम्। तेषां विषयाणां प्रसारस्यावश्यकता वर्तते।'

समारोहस्य प्रास्ताविकं प्रस्तुवन्तः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यत् 'संस्कृत-भाषया एव भारते एकतायाः अखण्डतायाः सर्वधर्मसमभावस्य च सिद्धान्ताः चरितार्थाः सन्ति। अवसरेऽस्मिन् अखिल-भारतीय-मौलिक-संस्कृत-साहित्य-रचना-पुरस्कारैः ८ विद्वांसः, संस्कृत-शिक्षक-पुरस्कारैः १४ शिक्षकाः, लघु-कथा-लेखन-प्रतियोगितायां १८, श्लोक-समस्यापूर्ति-प्रतियोगितायां ८ संस्कृतभित्ति-चित्र-प्रतियोगितायां ९ विद्वांसः पुरस्कृताः जाताः, अथ च पाण्डुलिपि-प्रकाशन-सहयोग-योजनायां ७ विद्वांसः सहयोगराशिं प्राप्तवन्तः। समारोहेऽस्मिन् डॉ. मण्डनमिश्र महोदयाः, डॉ. वाचस्पतिरुपाध्यायमहोदयाः श्रीमन्तः शब्बीर-अहमदमहोदयाः विशिष्टातिथिरूपेण तत्रोपस्थिताः आसन्। अवसरेऽस्मिन् नैके विद्वांसः, कवयः लेखकाः शिक्षकाश्चोपस्थिताः आसन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai

संस्कृत-छात्रवृत्ति-वितरण-समारोहे छात्रवृत्तिं प्रयच्छन्तः मुख्यातिथयः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, वामतः विशिष्टातिथयः डॉ. नोदनाथमिश्रमहोदयाः दक्षिणतः समारोहस्याध्यक्षाः डॉ. मण्डनमिश्रमहोदयाः अकादम्या सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल महोदयाश्च

संस्कृत-छात्रवृत्ति-वितरण-समारोहे समुपस्थिताः छात्राः शिक्षकाः अभिभावकाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'संस्कृतवाङ्मये युद्धविद्या' परिचर्चायामुद्बोध्यन्तः मुख्यातिथयः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, मञ्चे उपविष्टा दक्षिणतः डॉ. मोहनचन्दमहोदयाः, डॉ. कृष्णलालमहोदयाः, डॉ. चक्रधर- बिजल्वानमहोदयाः, विशिष्टातिथयः डॉ. के. के. मिश्रमहोदयाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवालमहोदयाश्च

'संस्कृत वाङ्मये युदधविद्येत्यस्यां परिचर्चायां स्वकीयं शोधलेखं प्रस्तुवन्तः डॉ. मोहनचन्द- महोदयाः, मञ्चे उपविष्टाः डॉ. काशीनाथ तिवारी महोदयाः, डॉ. के. के. मिश्र महोदयाः, डॉ. चक्रधरबिजल्वानमहोदयाः डॉ. कृष्णलालमहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरस्कार वितरण समारोहे मञ्चे उपविष्टाः वामतः श्रीमन्तः शब्बीर-अहमद-महोदया, शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, दिल्ली-सर्वकारस्य-शिक्षामन्त्रिणः डॉ. नरेन्द्रनाथमहोदयाः, डॉ. मण्डनमिश्रमहोदयाः, डॉ. वाचस्पतिउपाध्यायमहोदयाः श्रीमन्तः नरेन्द्रपाण्डेयमहोदयाश्च



पुरस्कार वितरण समारोहे पुरस्कारं प्रयच्छन्तः मुख्यातिथयः शिक्षामन्त्रिणः डॉ. नरेन्द्रनाथमहोदयाः, वामतः समारोहाध्यक्षाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, दक्षिणतः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल महोदयाः, पुरस्कारं स्वीकुर्वन्तः डॉ. राजेन्द्र मिश्र महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरस्कार वितरण समारोहे उपस्थिताः विद्वांसः विदुष्यश्च



ग्रन्थ-लोकार्पण-समारोहे अकादम्याः वार्षिक्याः लोकार्पणं कुर्वन्तः मुख्यातिथयः दिल्ली सर्वकारस्य मुख्य सचिवाः श्रीमन्तःउमेशसैगलमहोदयाः, वामतः समारोहाध्यक्षाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, दक्षिणतः श्रीमन्तः रामनयनतिवारीमहोदयाः, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः, डॉ. सत्यव्रतशास्त्रिमहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ग्रन्थ-लोकार्पण-समारोहे 'संस्कृतवाङ्मये शासन-प्रबन्धन-पद्धतिः' इत्यस्य ग्रन्थस्य लोकार्पणं कुर्वन्तः मुख्यातिथयः दिल्ली सर्वकारस्य मुख्यसचिवाः श्रीमन्तः उमेशसैगलमहोदयाः, वामतः समारोहाध्यक्षाः श्रीमन्तः कुलानन्द भारतीयमहोदयाः, दक्षिणतः श्रीमन्तः रामनयनतिवारीमहोदयाः, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः, डॉ. सत्यव्रतशास्त्रिमहोदयाश्च

ग्रन्थलोकार्पण-समारोहे 'संस्कृतमञ्जर्याः' नवमवर्षस्य प्रथमाङ्कस्य लोकार्पणं कुर्वन्तः मुख्यातिथयः मुख्यसचिवाः श्रीमन्तः उमेशसैगलमहोदयाः, वामतः समारोहाध्यक्षाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीयमहोदयाः दक्षिणतः श्रीमन्तः रामनयनतिवारीमहोदयाः, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः डॉ. सत्यव्रतशास्त्रिमहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थलोकार्पणसमारोहे 'पुस्तकालय-परिचर्या-प्रसूनम्'—ग्रन्थरचयित्रे श्रीमते रामनयन तिवारीमहोदयाय ग्रन्थं प्रयच्छन्तः डॉ. सत्यव्रतशास्त्रिमहोदयाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः, वामतः समारोहस्य मुख्यातिथयः दिल्ली-सर्वकारस्य मुख्यसचिवाः श्रीमन्तः उमेश-सैगल-महोदयाः

ग्रन्थलोकार्पणसमारोहे ग्रन्थानां लोकार्पणं कुर्वन्तः समारोहस्य मुख्यातिथयः दिल्ली-सर्वकारस्य मुख्यसचिवाः श्रीमन्तः उमेशसैगलमहोदयाः वामतः डॉ. रामकरणशर्ममहोदयाः, समारोहस्याध्यक्षाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः दक्षिणतः श्रीमन्तः रामनयनतिवारीमहोदयाः, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवालमहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थलोकार्पणसमारोहे उद्बोधयन्तः मुख्यातिथयः दिल्ली-सर्वकारस्य मुख्यसचिवाः श्रीमन्तः उमेश सैगल महोदयाः वामतः डॉ. रामकरणशर्ममहोदयाः, समारोहस्याध्यक्षाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः दक्षिणतः डॉ. सत्यव्रतशास्त्रिमहोदयाः, पृष्ठेऽकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाश्च

स्वतन्त्रता-दिवसस्योपलक्ष्ये संस्कृत-कवि-सम्मेलने भाषमाणाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः, मञ्चे उपविष्टाः वामतः श्रीमन्तः नरेन्द्रपाण्डेयमहोदयाः, समारोहस्याध्यक्षाः दिल्ली विधानसभा-सदस्याः श्रीमत्यः दर्शनारामकुमार महोदयाः मुख्यातिथयः वरिष्ठाः विधायकाः श्रीमन्तः मोतीलालबोकोलियामहोदयाः, पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द-भारतीय-महोदयाः, श्रीमन्तः सुभाषविद्यालंकारमहोदयाः, डॉ. रमाकान्तशुक्लमहोदयाः, डॉ. आनन्दमहोदयाः, डॉ. हरिदत्तभट्टशैलेश महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रतादिवसस्योपलक्ष्ये संस्कृत-कविसम्मेलने उद्बोधयन्त्यः समारोहाध्यक्षाः श्रीमत्यः दर्शनारामकुमार महोदयाः, मञ्चे उपविष्टाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः, मुख्यातिथयः श्रीमन्तः मोतीलालबोकोलिया महोदयाः, श्रीमन्तः, कुलानन्दभारतीयमहोदयाः श्रीमन्तः सुभाषविद्यालंकार महोदयाः, डॉ. रमाकान्तशुक्लमहोदयाः डॉ. आनन्दमहोदयाः, डॉ. हरिदत्तभट्टशैलेशमहोदयाश्च

: स्वतन्त्रतादिवसस्योपलक्ष्ये संस्कृतकविसम्मेलने उद्बोधयन्तः मुख्यातिथयः दिल्ली विधानसभायाः वरिष्ठाः सदस्याः श्रीमन्तः मोतीलालबोकोलियामहोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

४. 'संस्कृतवाङ्मये शासनप्रबन्धनपद्धतिः' 'पुस्तकालय परिचर्या प्रसूनम्' इत्यनयोः ग्रन्थयोः लोकार्पण-समारोहः

दिल्लीस्थ ५ शामनाथमार्गे मुख्यसचिवस्य संगोष्ठीकक्षे दिल्ली-संस्कृत-अकादमीपक्षतः 'संस्कृतवाङ्मये शासन-प्रबन्धन-पद्धतिः' 'पुस्तकालय परिचर्या प्रसूनम्' इत्यनयोः ग्रन्थयोः लोकार्पण-समारोहः १२-८-१९९९ दिनाङ्के आयोजितः। समारोहेऽस्मिन् अकादम्याः पत्रिकायाः संस्कृत-मञ्जर्याः नवमवर्षस्य प्रथमाङ्कस्य वार्षिक्याश्चापि लोकार्पणम् सञ्जातम्। पुस्तकानों लोकार्पणं कुर्वन्तः दिल्ली सर्वकारस्य माननीयाः मुख्य सचिवाः श्रीमन्तः उमेशसैगलमहोदयाः उक्तवन्तः यत् 'संस्कृतम् विश्वस्य समृद्धा भाषा विद्यते। संस्कृतिः, सभ्यता, लोकव्यवहारः, लोकाचारः, शासन-व्यवस्था, गणितशास्त्रं, भूगर्भशास्त्रं, परमाणु- चिकित्सा-अर्थशास्त्र-योग प्रभृतयः विषयाः संस्कृत-साहित्ये सन्ति समारोहस्याध्यक्षाः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीयमहोदयाः प्रावोचन् यत् संस्कृतभाषा पूर्णरूपेण वैज्ञानिकी वर्तते, संस्कृत-साहित्ये येऽपि विषयाः सन्ति, तेषु अनुसन्धानं भवेत्, एतदर्थं संस्कृतज्ञानां वैज्ञानिकानाञ्च समन्वयः आवश्यकः।' अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यत् 'पुस्तकालयविज्ञाने सर्वतः पूर्वं श्रीमद्भिः रामनयनतिवारीमहोदयैः संस्कृतभाषायां पुस्तकालय परिचर्या प्रसूनम् पुस्तकं लिखितम्। अकादम्या संकृतवाङ्मयस्थिते शासन-प्रवन्धन-विषये लेखकानां शोधलेखाः संयोज्य सम्पाद्य च 'संस्कृत वाङ्मये शासनप्रबन्धनपद्धतिः' पुस्तकं प्रकाशितम् तथा च संस्कृत मञ्जरी त्रैमासिकीं पत्रिकां वार्षिकीमपि दिल्ली संस्कृत-अकादमी यथासमयं प्रकाशयति।'

समारोहेऽस्मिन् डॉ. सत्यव्रतशास्त्रिमहोदयाः, पूर्वकुलपतयः डॉ. रामकरणशर्ममहोदयाः, डॉ. सुभाष-विद्यालंकारमहोदयाः डॉ. रामकृष्णशर्मणः, डॉ. पुष्पेन्द्रकुमारमहोदयाः, डॉ. धर्मा, डॉ. वेदप्रकाशमहोदया-अनेके चेतरे विद्वांसः, शिक्षकाः आचार्याश्चोपस्थिताः आसन्।

५. स्वतन्त्रतादिवसस्योपलक्ष्ये संस्कृत-कवि-सम्मेलनम्

नव दिल्ल्याम्, १४.८.१९९९ दिनाङ्के अकादम्याः प्लाट सं. ५ झण्डेवालानस्थ प्राङ्गणे दिल्ली-संस्कृत-अकादमी स्वतन्त्रतादिवसस्योपलक्ष्ये संस्कृत कविसम्मेलनमायोजितवती, कविसम्मेलनस्योद्घाटनं कुर्वन्तः मुख्यातिथयः दिल्लीविधानसभायाः वरिष्ठाः सदस्याः श्रीमन्तः मोतीलालबोकोलियामहोदयाः प्रावोचन् यत् 'भारतस्य स्वातन्त्र्य-संग्रामे संस्कृतस्य छात्रैः आचार्यैः प्रदत्तं योगदानमविस्मरणीयं वर्तते। चन्द्रशेखरआज़ादः लोकमान्यबालगंगाधरतिलकप्रभृतिभिः संस्कृतज्ञैः देशाय स्वजीवनं समर्पितम्। संस्कृतस्य कवयः स्वतन्त्रभारतेऽपि राष्ट्रस्य विकासाय काव्यरचनाः कुर्वन्ति।' संस्कृत कवीन् सम्बोधयन्तः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः उक्तवन्तः यत् 'संस्कृतस्य कवय एव देशस्य समाजस्य दृष्टिकोणं परिवर्तयन्ति, स्वतन्त्रतादिवसस्योपलक्ष्ये कविसम्मेलनमायोज्य संस्कृत-अकादम्या स्वातन्त्र्य-योद्धृभ्यः श्रद्धाञ्जलिः प्रदीयते।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविसम्मेलनस्य प्रस्तावनायामकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः प्रावोचन् यत् 'संस्कृत कविता जीवनस्य सञ्चारं करोति। संस्कृतस्य रससिद्धाः कवीश्वराः समाजं प्रेरयितुं समर्थाः सन्ति। स्वकीयेऽध्यक्षीयोद्बोधने दिल्लीविधानसभायाः सदस्याः श्रीमत्यः दर्शनारामकुमारमहोदयाः अवदन् यत् 'संस्कृत-भाषया राष्ट्रियस्तरे परस्परं सम्मेलनाय संवादाः प्रदत्ताः। स्वातन्त्र्य-संग्रामे संस्कृतज्ञैः एव युवकाः देशभक्त्यै प्रेरिताः।' कविसम्मेलनेऽस्मिन् मसूरीतः डॉ. हरिदत्तः भट्टः, रायबरेलीतः डॉ. प्रशस्य मित्र शास्त्री, हिमाचल प्रदेशतः डॉ. हरिदत्तशर्मा, गाजियाबादात् डॉ. वागीशदिनकरः श्री प्रकाशचन्द्रजैनश्च, पौड़ीतः, डॉ. जनार्दनप्रसादमणिः, हरियाणातः डॉ. नरेशबत्रा, दिल्लीतः डॉ. रमाकान्तशुक्लः, डॉ. नोदनाथमिश्रः, कविरत्नं श्रीकृष्णसेमवालमहोदयाः काव्यपाठं कृतवन्तः। अवसरेऽस्मिन् श्रीसुभाषविद्यालंकारः, डॉ. चक्रधरबिजल्वानः, डॉ. कृष्णलालः, श्रीजयन्ती प्रसादमिश्रः, डॉ. अवनीन्द्रकुमारः, डॉ. शशिप्रभाकुमारः डॉ. वेदवतीढींगरा तथा चान्ये विद्वांसः विदुष्यः गणमान्यनागरिकाश्चोपस्थिताः आसन्।

६. डॉ. गोस्वामिगिरधारी-लाल-शास्त्रिणः जयन्त्युपलक्ष्ये संगोष्ठी

२१.८.१९९९ दिनाङ्के नवदेहल्यां मण्डीहाउसमध्ये कापरनिक्समार्गस्थ-लिटिलथियेटरग्रुपसभागारे दिल्ली-संस्कृत-अकादम्या डॉ. गोस्वामिगिरधारीलालशास्त्रिणः जयन्त्युपलक्ष्ये एका संगोष्ठी आयोजिता। अस्याः संगोष्ठ्याः विषयः आसीत् 'मानवजीवने शनिग्रहस्य प्रभावः'। संगोष्ठ्याः उद्घाटन-समारोहे पूर्वसांसदाः श्रीमन्तः सज्जनकुमारमहोदयाः स्वकीये उद्घाटनभाषणे अवोचन् यत् 'संस्कृतभाषायां सर्वविधं ज्ञानं वर्तते। डॉ. गोस्वामिमहोदयाः ज्योतिषशास्त्रस्य परमविद्वांसः आसन्।' अवसरेऽस्मिन् संसत्सदस्याः श्रीमत्यः मीराकुमार महोदयाः प्रावोचन् यत् 'संस्कृतभाषा एव भारतीयसंस्कृतेः स्रोतः वर्तते, डॉ. गोस्वामिमहोदयैः एवाहं संस्कृतिरक्षायै प्रेरिता।' दिल्ली सर्वकारस्य खाद्यापूर्तिमन्त्रिणः डॉ. योगानन्दशास्त्रिमहोदयाः गोस्वामिनः चित्रे माल्यार्पणं कुर्वन्तः प्रावोचन् यत् 'ज्योतिषशास्त्रं पूर्णरूपेण वैज्ञानिकं विद्यते, दिल्ल्यां प्राचीनकालादेव ज्योतिषशास्त्रे प्रायोगिक-कार्याणि भवन्ति स्म।'

संगोष्ठ्याः उद्घाटनं कुर्वन्तः शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः अवोचन् यत् 'संस्कृतभाषायां यदपि चिन्तनं भवति तत्सर्वं विशिष्टं भवति, संस्कृतस्य ज्योतिषग्रन्थानां महत्त्वं सर्वे स्वीकुर्वन्ति।' दिल्ली विधानसभायाः सदस्याः अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य सनातन-धर्म-प्रतिनिधिसम्मेलनस्य च महामन्त्रिणः श्रीमन्तः रमाकान्तः गोस्वामिनः स्वकीये स्वागतभाषणे प्रावोचन् यत् 'ज्योतिष शास्त्राय संस्कृतभाषायै च डॉ. गोस्वामिमहोदयैः स्वकीयं जीवनं समर्पितम्।' अकादम्याः सचिवाः श्रीमन्तः श्री कृष्णसेमवालमहोदयाः संगोष्ठ्याः प्रास्ताविकं प्रस्तुवन्तः अवदन् यत् 'डॉ. गोस्वामिनः ज्योतिषशास्त्रस्य परमविद्वांसः आसन्, अकादमी प्रतिवर्षं तेषां जयन्त्युपलक्ष्ये ज्योतिषविषये संगोष्ठीमायोजयति।' पूर्वकुलपतयः डॉ. मण्डनमिश्रमहोदयाः अवोचन् यत् 'डॉ. गोस्वामिनः संस्कृताधृत ज्योतिषज्ञानस्य प्रसारे नवीनं प्रयोगमकुर्वन्।' संगोष्ठ्यामस्यां वाराणसीतः श्रीरामचन्द्रपाण्डेयः, डॉ. नागेन्द्रपाण्डेयः डॉ. उमाशंकरशुक्लः, आन्ध्रप्रदेशतः डा० राधाकान्तठाकुरः, चण्डीगढ़तः डॉ. शक्तिधरशर्मा, जम्मूतः डॉ. वासुदेवशर्मा, राँचीतः डॉ. राजेन्द्रद्विवेदी, राजस्थानात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरमेशचन्द्रजोशी, दिल्लीत: प्रो. के. एन. राव:, पं. महिमानन्दद्विवेदी, डॉ. शुकदेवचतुर्वेदी, डॉ. ओंकारनाथचतुर्वेदी, श्रीवेणीमाधवगोस्वामी, डॉ० रामदेवझा, डॉ. प्रेमकुमारशर्मा डॉ. देवीप्रसादत्रिपाठी च 'मानवजीवने शनिग्रहस्य प्रभाव:' इति विषयेऽस्मिन् स्वकीयान् शोधलेखान् प्रस्तुतवन्त:। अवसरेऽस्मिन् सनातनधर्मप्रतिनिधि-सम्मेलनस्यानेकेऽधिकारिण: कार्यकर्तार: संस्कृतप्रेमिणश्चोपस्थिता आसन्।

७. संस्कृतदिवसस्योपलक्ष्ये सम्मानसमारोह:

श्रावणपूर्णिमाया: अवसरे दिल्ली-संस्कृत-अकादमी प्रतिवर्षं संस्कृत-दिवस-समारोहमायोजयति। वर्षेऽस्मिन् २५.८.१९९९ दिनाङ्के नवदिल्ल्याम्, मण्डीहाउसमध्ये कॉपरनिक्समार्गस्थ लिटिलथियेटरग्रुप इति संस्थाया: सभागारेऽकादम्या संस्कृत दिवसस्योपलक्ष्ये सम्मानसमारोह: आयोजित:। समारोहस्योद्घाटनं कुर्वन्त: शिक्षाया: पूर्वकार्यकारिपार्षदा: श्रीमन्त: कुलानन्दभारतीयमहोदया: प्रावोचन् 'साम्प्रतिकं वैज्ञानिकमनुसन्धानं पूर्णरूपेण संस्कृताधृतं विद्यते, किन्तु संस्कृतविदुषां कर्तव्यमस्ति यत् ते प्रमाणीकुर्वन्तु संस्कृतवाङ्मयेऽपि विज्ञानं वर्तते।' स्वकीये प्रास्ताविके भाषणेऽकादम्या: सचिवा: श्रीमन्त: श्रीकृष्णसेमवालमहोदया: अवोचन् यत् 'यै: शिक्षकै: अकादम्या: प्रतियोगिताभ्य: छात्रा: प्रेरिता: तेषां सम्मानोऽप्यकादम्यावसरेऽस्मिन् क्रियते।'

समारोहस्यास्य मुख्यवक्तार: सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य पूर्वकुलपतय: डॉ. मण्डन-मिश्र-महोदया: उपस्थितान् संस्कृतस्य शिक्षकान् सम्बोधयन्त: प्रावोचन् यत् 'संस्कृते: संरक्षणाय संस्कृतस्य व्यवहार: अत्यावश्यकोऽस्ति, संस्कृतभाषा पूर्णरूपेण वैज्ञानिकी अस्ति।' समारोहस्याध्यक्षा: माननीयानामुपराष्ट्रपति-महोदयानां विशेषकार्यक्रमाधिकारिण: डॉ. के. एल गाँधी महोदया: स्वकीयेऽध्यक्षीये उद्बोधने प्रावोचन् यत् 'विज्ञानस्य सर्वे सिद्धान्ता: संस्कृतवाङ्मये वर्णिता: सन्ति।' अवसरेऽस्मिन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतीनां डॉ. राममूर्तिशर्ममहोदयानां संस्कृतसाहित्याङ्गवस्त्रादिभि: अकादमी सम्मानमपि कृतवती। अवसरेऽस्मिन् द्वे संस्कृतसंस्थे, द्वौ संस्कृतविद्वांसौ सार्धचतु:शतसंस्कृतशिक्षका: सम्मानिता: जाता:। समारोहेऽस्मिन् नैके संस्कृतविद्वांस: संस्कृतप्रेमिणश्चोपस्थिता: आसन्।

८. संस्कृत-वाङ्मयार्थं मुस्लिमविदुषामवदानमिति परिचर्चा

दिल्ल्याम्, २९.८.१९९९ दिनाङ्के अकादम्या: झण्डेवालानस्थ संगोष्ठी-कक्षे दिल्ली-संस्कृत-अकादम्या परिचर्चैकायोजिता, यस्या: विषय आसीत् 'संस्कृत वाङ्मयार्थं मुस्लिमविदुषामवदानम्' परिचर्चाया उद्घाटनं कुर्वन्त: मुख्यातिथय: दिल्लीसर्वकारस्य पूर्वकार्यकारिपार्षदा: श्रीमन्त: कुलानन्दभारतीयमहोदया: प्रावोचन् यत् 'मुस्लिमशासकानां शासने संस्कृतं मुस्लिमविदुषां लोकप्रिया भाषा आसीत्, मुस्लिम विद्वांसोऽपि संस्कृते ग्रन्थरचना: अकुर्वन्।' प्रास्ताविके भाषणेऽकादम्या: सचिवा: श्रीमन्त: श्रीकृष्णसेमवाल महोदया: उक्तवन्त: यत् 'राजकुमार: दाराशिकोह: संस्कृतभाषाया: विद्वान् आसीत् येन उपनिषदां गीताया: योगवासिष्ठस्य च फारसीभाषायामनुवाद: कृत:।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

समारोहस्याध्यक्षाः जगन्नाथ-संस्कृत-विश्वविद्यालयस्य पूर्वकुलपतयः डॉ. सत्यव्रतशास्त्रिमहोदयाः स्वकीयेऽध्यक्षीये भाषणेऽवोचन् यत् 'अब्दुलरहमाननाम्ना: प्रसिद्धः साहित्यकारः संस्कृत-प्राकृतापभ्रंशानां विद्वान् आसीत्, अबुलफजलः संस्कृतस्य मर्मज्ञः आसीत्, येन 'खेट-कौतुकम्,' नाम ज्योतिषग्रन्थः लिखितः।' परिचर्चायामस्यां शिक्षानिदेशालयस्य पूर्वातिरिक्तशिक्षानिदेशकाः श्रीमन्तः शब्बीर-अहमद-महोदयाः, भारतसर्वकारस्योपशिक्षापरामर्शदातारः डॉ. नोदनाथमिश्रमहोदयाः, दिल्लीविश्वविद्यालयस्य प्राध्यापकाः प्रो. इसराइल-खां-महोदयाः, डॉ. सादिकमहोदयाः, डॉ. चन्द्रभूषणझामहोदयाः अपि स्वकीयान् शोधपूर्णान् विचारान् प्रस्तुतवन्तः । अवसरेऽस्मिन् नैके विद्वांसः, शिक्षकाः गणमान्याः नागरिकाश्चोपस्थिताः आसन् ।

९. प्राशासनिक-सेवा-परीक्षा-संस्कृत-शिक्षण-केन्द्रोद्घाटन-समारोहः

दिल्ल्याम् । अकादम्याः झण्डेवालानस्थ संगोष्ठी कक्षे ४-९-१९९९ दिनाङ्के दिल्ली-संस्कृत-अकादमी प्राशासनिक-सेवापरीक्षा-संस्कृत-शिक्षण-केन्द्रोद्घाटन-समारोहमायोजितवती । समारोहस्योद्घाटनं कुर्वन्तः भारतीय-प्राशासनिक-सेवायाः वरिष्ठतमाधिकारिणः मानवाधिकारायोगस्य सचिवाः श्रीमन्तः एन. गोपालास्वामि-महोदयाः अवोचन् यत् 'संस्कृतस्य स्वरूपं पूर्णरूपेण वैज्ञानिकं विद्यतेऽस्याः भाषयाः व्याकरणं च संगणकस्य कृते सर्वथोपयुक्तं वर्तते ।' समारोहस्यास्य विशिष्टातिथयः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः उक्तवन्तः यत् 'विदेशेषु या समृद्धिः दृश्यते तस्याः मूले संस्कृतवाङ्मयस्य ज्ञान-विज्ञानयोः अनुसन्धानमस्ति । प्रशासनिकसेवायै संस्कृतस्य शिक्षा अत्यन्तमुपयोगिनी वर्तते ।'

समारोहस्य प्रास्ताविकेऽकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः अवदन् यत् 'अकादमी प्रतिवर्षं प्रशासनिक-सेवा-परीक्षायां संस्कृत विषयावलम्बिछात्राणां कृते शिक्षाकेन्द्रं समायोजयति । वर्षेऽस्मिन् षष्टिसंख्याकाः छात्राः केन्द्रेऽस्मिन् भागं गृहीतवन्तः,' समारोहस्याध्यक्षाः मेरठविश्वविद्यालयस्य कुलपतयः श्रीमत्यः डॉ. आशासिंघलमहोदयाः प्रावोचन् यत् 'संस्कृतभाषा सरसा मधुरा च वर्तते, प्राशासनिकसेवायां संस्कृतमाश्रित्य प्रवेशमिच्छन्तः ये छात्राः संस्कृतं पठन्ति, ते स्वकीयान् संस्कारान् पवित्रीकुर्वन्ति । समारोहेऽस्मिन् गुरुकुल-कांगड़ी-विश्वविद्यालयस्य पूर्वकुलपतयः श्रीमन्तः सुभाषविद्यालंकारमहोदयाः, डॉ. चक्रधरबिजल्वानमहोदयाः, डॉ. रामकृष्णशर्ममहोदयाः, डॉ. धर्मानन्दशर्ममहोदया अनेके चान्ये विद्वांसः संस्कृतप्रेमिणः प्राशासनिक सेवा-परीक्षा-संस्कृत-शिक्षण-केन्द्रस्य जिज्ञासवश्चोपस्थिताः आसन् ।

१०. व्याकरण सूत्रान्त्याक्षरी प्रतियोगिता—

नवदिल्ल्याम् । ११-९-१९९९ दिनाङ्के अकादम्याः झण्डेवालानस्थ संगोष्ठी-कक्षे दिल्ली-संस्कृत-अकादम्या व्याकरण-सूत्रान्त्याक्षरी-प्रतियोगितायोजिता, यस्याः उद्घाटनं कुर्वन्तः दिल्ली-सर्वकारस्य शिक्षायाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः प्रवोचन् यत् 'संस्कृतभाषायाः व्याकरणं सूत्रेषु वर्तते सूत्रत्वेनैव संगणकयन्त्रे संस्कृतभाषा सर्वाभ्यः भाषाभ्यः अधिका उपयोगिभाषा विद्यते।' प्रस्तावनां प्रस्तुवन्तोऽकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः अवदन् यत् 'संस्कृत भाषायाः बहूनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता दिवसस्योपलक्ष्ये संस्कृतकविसम्मेलने काव्यपाठं कुर्वन्तः कविवर्याः श्रीमन्तः वागीशदिनकरमहोदयाः

स्वतन्त्रता दिवसस्योपलक्ष्ये संस्कृतकविसम्मेलने उपस्थिताः श्रोतारः श्रोत्र्यः आचार्याः छात्राश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

डॉ. गोस्वामीगिरधारीलालशास्त्रिणः जयन्त्युपलक्ष्ये संगोष्ठ्यां मञ्चे आसनेषूपविष्टाः वामतः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल महोदयाः, श्रीमन्तः वेणीमाधवगोस्वामिमहोदया, डॉ. शुकदेव चतुर्वेदिमहोदयाः डॉ. के. एन. राव महोदयाः, डॉ. मण्डनमिश्रमहोदयाः, श्रीमन्तः कुलानन्दभारतीयमहोदयाः, श्रीमन्तः सज्जनकुमार महोदयाः, श्रीमन्तः रमाकान्तगोस्वामिमहोदयाः डॉ. रमेश गौतममहोदयाः डॉ. रामचन्द्रपाण्डेयमहोदयाः अन्ये च विद्वांसः

. डॉ. गोस्वामिगिरधारीलालशास्त्रिणः जयन्त्युपलक्ष्ये संगोष्ठ्या मञ्चे आसनेषूपविष्टाः वामतः श्रीमन्तः वेणीमाधवगोस्वामिमहोदयाः, डॉ. शुकदेवचतुर्वेदिमहोदयाः, डॉ. के. एन. रावमहोदयाः, दिल्ली-सर्वकारस्य विकास-खाद्यापूर्ति-मन्त्रिणः श्रीमन्तः डॉ. योगानन्दशास्त्रिमहोदयाः, पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, श्रीमन्तः मांगेरामशर्म महोदयाः, श्रीमन्तः मदनलालमहोदयाः, पृष्ठे उपविष्टाः श्रीमन्तः महिमानन्दद्विवेदि महोदयाः, डॉ. चक्रधरबिजल्वानमहोदयाः डॉ. ओंकारनाथचतुर्वेदिमहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



डॉ. गोस्वामिगिरधारीलाल शास्त्रिणः जयन्त्युपलक्ष्ये संगोष्ठयां मञ्चं प्रति गच्छन्तः पूर्वसंसत्सदस्याः श्रीमन्तः सज्जनकुमारमहोदयाः दिल्ली-विधान-सभायाः सदस्याः श्रीमन्तः रमाकान्तगोस्वामिमहोदयाः उपस्थिताः विद्वांसः विदुष्यश्च

संस्कृत दिवसस्योपलक्ष्ये सम्मानसमारोहे मञ्चे उपविष्टाः वामतः श्रीमन्तः टी. सी. शर्म महोदयाः, डॉ. मण्डनमिश्रमहोदयाः, समारोहाध्यक्षा डॉ. के. एल. गान्धिमहोदयाः, श्रीमन्तः कुलानन्दभारतीयमहोदयाः मुख्यातिथयः श्रीमन्तः अनन्तसागरअवस्थीमहोदयाः श्रीमन्तः डॉ. राममूर्तिशर्ममहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतदिवसस्योपलक्ष्ये सम्मान समारोहे सम्मानं प्रयच्छन्तः मुख्यातिथयः शिक्षाभाषयोः विशेष सचिवाः श्रीमन्तः अनन्तसागरअवस्थीमहोदयाः, सम्मानं स्वीकुर्वन्त्यः श्रीमत्यः डॉ. कुसुमविद्यारत्नमहोदयाः

संस्कृत वाङ्मयार्थं मुस्लिमविदुषामवदानमिति-परिचर्चायामुद्बोधयन्तः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः, उपविष्टाः डॉ. इसराइलमहोदयाः, डॉ. नोदनाथमिश्रमहोदयाः, डॉ. सत्यव्रत शास्त्रिमहोदयाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, श्रीमन्तः शब्बीर-अहमद-महोदयाः, डॉ. सादिकमहोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत वाङ्मयार्थ मुस्लिमविदुषामवदानमिति परिचर्चायां स्वकीयं शोधलेखं पठन्त डॉ. इसराइल खान महोदया, उपविष्टाः डॉ. नोदनाथमिश्रमहोदयाः, पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, डॉ. सादिकमहोदयाः, डॉ. चन्द्रभूषणमहोदयाश्च

प्रशासनिकसेवापरीक्षा-संस्कृत शिक्षणकेन्द्रोद्घाटनसमारोहे मुख्यातिथीनां भारतीय प्रशासनिक सेवायाः वरिष्ठतमाधिकारिणां मानवाधिकारयोगस्य सचिवानां श्रीमतां एन. गोपालास्वामिमहोदयानां सम्मानं कुर्वन्तः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशासनिक-सेवा-परीक्षा-संस्कृत-शिक्षण -केन्द्रोद्घाटनसमारोहे वामतः श्रीमन्तः सुभाष विद्यालंकार महोदयाः, समारोहस्याध्यक्षाः डॉ. आशासिंहलमहोदयाः, पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदया मुख्यातिथयः भारतीय-प्रशासनिक-सेवायाः वरिष्ठतमाधिकारिणः मानवाधिकरायोगस्य सचिवाः श्रीमन्तः एन.गोपालास्वामि महोदयाश्च



प्रशासनिक-सेवा-परीक्षा-संस्कृत-शिक्षण-केन्द्रोद्घाटनसमारोहे उपस्थिताः विद्वांसः जिज्ञासवश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणसूत्रान्त्याक्षरीप्रतियोगितायाः उद्घाटने उद्बोधयन्तः अकादम्याः सचिवाः श्रीकृष्णसेमवालमहोदयाः मञ्चे उपविष्टाः डॉ० आर.के.शर्म महोदयाः, डॉ० अवनीन्द्रकुमारमहोदयाः, मुख्यातिथयः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः, डॉ० महावीरमहोदयाः डॉ० शिवनारायणशास्त्रिमहोदयाश्च



व्याकरणसूत्रान्त्याक्षरी प्रतियोगितायाः पुरस्कारं प्रयच्छन्तः कार्यक्रमस्याध्यक्षाः डॉ० अवनीन्द्र कुमारमहोदयाः अकादम्याः उपसचिवाः श्रीमन्त एस.एन. भट्ट महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाविद्यालयीय-संस्कृत-महाविद्यालयीय-संस्कृत-भाषण-प्रतियोगितायाः उद्घाटने मुख्यातिथिभ्यः दिल्लीविधानसभासदस्येभ्यः श्रीमद्भ्यः रूपचन्दमहोदयेभ्यः अकादम्याः साहित्यं प्रयच्छन्तः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः



महाविद्यालयीय-संस्कृत-महाविद्यालयीय-संस्कृत-भाषण-प्रतियोगितायाः पुरस्कारं प्रयच्छन्तः मुख्यातिथयः दिल्लीविधानसभायाः सदस्याः श्रीमन्तः रूपचन्दमहोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणानि सन्ति तेषु पाणिनीयव्याकरणं सर्वाधिकमुपयुक्तमस्ति, महर्षेः पाणिनेः अष्टाध्याय्याः एव सूत्रेषु प्रतियोगितेयमाधृतास्ति।' स्वकीयेऽध्यक्षीये भाषणे दिल्लीविश्वविद्यालयस्य संस्कृत-विभागाध्यक्षाः डॉ० अवनीन्द्रकुमारमहोदयाः उक्तवन्त यत् 'संस्कृतभाषायाः व्याकरणं पूर्णरूपेण वैज्ञानिकं विद्यते।' प्रतियोगितायामस्यां दिल्लीस्थानां संस्कृतविद्यालयानां षष्टिः छात्राः उपस्थिताः सञ्जाताः शारदा-देवी-संस्कृत-विद्यापीठस्य छात्रः शंकर दत्त पाण्डेयः प्रथमं पुरस्कारं प्राप्तवान्, द्वितीयं गुरुकुलगौतमनगरस्य ओमप्रकाशः, तृतीयं राजेन्द्रनगरस्थ आर्यकन्या गुरुकुलस्य छात्रा कु० कविता, चतुर्थं शारदा-देवी-संस्कृतविद्यापीठस्य विजयकुमारः पञ्चमपुरस्कारञ्च गौतमनगरस्थ गुरुकुलस्य छात्रः कन्हैयालालः प्राप्तवान्। अवसरेऽस्मिन् डॉ० आर.के. शर्मा, डॉ० शिवनारायणशास्त्री, डॉ० महावीर प्रभृतयो विद्वांसः शिक्षकाश्च तत्रोपस्थिताः आसन्।

११. महाविद्यालयीय-संस्कृतमहाविद्यालयीय-संस्कृतभाषणप्रतियोगिता

नवदिल्ल्याम्। १८-९-१९९९ दिनाङ्के संस्कृताकादम्याः झण्डेवालानस्थ-संगोष्ठी-कक्षे दिल्ली-संस्कृत-अकादमी सामान्यमहाविद्यालयानां संस्कृत-महाविद्यालयानां संस्कृतविद्यालयानाञ्च छात्राणां कृते संस्कृत-भाषण-प्रतियोगितामायोजितवती। प्रतियोगितायाः उद्घाटनं कुर्वन्तः मुख्यातिथयः दिल्लीविधान-सभायाः सदस्याः श्रीमन्तः रूपचन्दमहोदयाः प्रावोचन् यत्, 'स्वतन्त्रता संग्रामे भारतस्य नगरेषु ग्रामेषु च जनजागरणाय गुरुकुलानां छात्रैः महाप्रयत्नः कृतः, तेषां प्रयत्नैः एव देशे स्वतन्त्रतायै जिजीविषा समुत्पन्ना, जनाश्च देशरक्षणयज्ञे समर्पिताः जाताः। भाषणप्रतियोगितया वाक्शक्तेः विकासः भवति।' प्रतियोगितायाः प्रस्तावनायामकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यत्, 'अकादमी प्रतिवर्षं छात्राणां विकासाय विविधानां कार्यक्रमाणाम् आयोजनं करोति। प्रतियोगिताभिः छात्राणामभिव्यक्तेः क्षमतायाः विकासो भवति।' कार्यक्रमस्याध्यक्षाः भारतसर्वकारस्य सहायकशिक्षापरामर्शदातारः डॉ० विद्याधरशर्मा गुलेरीमहोदयाः प्रावोचन् यत् 'भारतसर्वकारः वर्षेऽस्मिन् संस्कृतस्य विकासाय विविधान् कार्यक्रमान्नायोजयति, यतः भारत सर्वकारपक्षतः ईस्वीय १९९९-२००० वर्षं संस्कृतयुगाब्दवर्षरूपे स्वीकृतमस्ति।' अवसरेऽस्मिन् डॉ० जी.आर.मिश्रः, डॉ० आर.के. शर्मा, डॉ० रमण कुमार शर्मा, श्रीमती वेदवती ढींगरा, श्रीश्रीधरप्रसादबलूनी चोपस्थिताः आसन्। प्रतियोगितायामस्यां महाविद्यालयस्तरीयं प्रथमं पुरस्कारं शारदा-देवी-संस्कृत विद्यापीठस्य छात्रः श्री विजयकुमार त्रिपाठी प्राप्तवान्, मध्यमास्तरीयञ्च प्रथमपुरस्कारं शारदा-देवी-संस्कृतविद्यापीठस्यैव छात्रः राजकुमारपाण्डेयः प्राप्तवान्, कार्यक्रमेऽस्मिन्नैके शिक्षकाः छात्राश्चोपस्थिताः आसन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी, (दिल्ली सरकार)

पूर्व भरतीयमहिलामहाविद्यालयभवन

प्लाट सं0-5, झण्डेवालान, करोलबाग नई दिल्ली-110005

दिल्ली संस्कृत अकादमी द्वारा प्रकाशित निम्नलिखित ग्रन्थ एवं पुस्तकें तथा संगीतात्मक कैसेट विक्रय के लिए उपलब्ध होंगे

	खण्ड 'क'		मूल्य (रु.)	छूट	मूल्य(रु.
1.	महाबुद्धवत्थु (महाबुद्धवस्तु)	-प्रथम भाग	250.00	25%	187.5
2.	महाबुद्धवत्थु (महाबुद्धवस्तु)	-द्वितीय भाग	400.00	25%	300.0
3.	महाबुद्धवत्थु (महाबुद्धवस्तु)	-तृतीय भाग	260.00	25%	195.0
4.	महाबुद्धवत्थु (महाबुद्धवस्तु)	-चतुर्थ भाग	350.00	25%	265.5
5.	महाबुद्धवत्थु (महाबुद्धवस्तु)	-पंचम भाग	100.00	25%	75.0
6.	महाबुद्धवत्थु (महाबुद्धवस्तु)	-षष्ठ भाग	500.00	25%	375.0
7.	मेघदूतम् (संगीतात्मक कैसेट)	-प्रथम भाग	25.00	50%	12.5
8.	मेघदूतम् (संगीतात्मक कैसेट)	-द्वितीय भाग	25.00	50%	12.5
9.	मेघदूतम् (संगीतात्मक कैसेट)	-तृतीय भाग	25.00	50%	12.5
10.	शंकराचार्य विरचित सौन्दर्यलहरी (संगीतात्मक कैसेट)	-प्रथम भाग	50.00	50%	25.0
11.	शंकराचार्य विरचित सौन्दर्यलहरी (संगीतात्मक कैसेट)	-द्वितीय भाग	50.00	50%	25.0
12.	संस्कृत मञ्जरी (त्रैमासिक पत्रिका)	वार्षिक शुल्क	32.00	-	32.0
13.	भीमशतकम् (अंग्रेजी, हिन्दी अनुवाद सहित)		100.00	25%	75.0
14.	व्यावहारिक संस्कृतम्पुस्तक	-प्रथम भाग	5.00	25%	3.7
15.	व्यावहारिक संस्कृतम्	-प्रथम भाग 16 चार्ट	16.00	25%	12.0
16.	व्यावहारिक संस्कृतम् संगीतात्मक कैसेट	-प्रथम भाग	15.00	50%	7.5
17.	वर्णात्मकभगवतीसुप्रभातम् (संगीतात्मक कैसेट)		25.00	50%	12.5
18.	हनुमत्सुप्रभातम् (संगीतात्मक कैसेट)		25.00	50%	12.5

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

19. सुभाषचन्द्रकाव्यवल्लरी	50.00	25%	37.50
20. संस्कृतसूक्तिसमुच्चयः			
वैदिक खण्डः	300.00	25%	225.00
ब्राह्मणखण्डः	200.00	25%	150.00
उपनिषद् खण्डः	180.00	25%	135.00
आरण्यक खण्डः	125.00	25%	93.75
21. संस्कृतवाङ्मये विज्ञानम्	175.00	25%	131.25
22. संस्कृतवाङ्मये शासनप्रबन्धनपद्धतिः	125.00	25%	93.75
23. प्रियदर्शिनीयम्	140.00	25%	105.00
24. संघे शक्तिः कलौ युगे	100.00	25%	75.00
25. स्वातन्त्र्यस्वर्णसौरभम्	140.00	25%	337.50

दिल्ली संस्कृत अकादमी के आर्थिक सहयोग से प्रकाशित विक्रय हेतु उपलब्ध संस्कृत पुस्तकें

खण्ड 'ख'	मूल्य (रु.)	छूट	मूल्य(रु.)
1. पत्रकाव्यम्	300.00	50%	150.00
2. बालैकविंशतिः-बाल कथा संग्रह	12.00	50%	6.00
3. सावित्री-नृत्य नाटिका	25.00	50%	12.50
4. श्रीविष्णुभगवतो नाम वैदिकशतकस्त्रोम्	10.00	50%	5.00
5. सुभाषचरितम्-काव्य	30.00	50%	15.00
6. सरला वासन्ती-बाल कथा संग्रह	50.00	50%	25.00
7. लक्ष्य वेधकः बुद्धिमान्-बाल कथा संग्रह	50.00	50%	25.00
8. वानरिका मुक्तमालिका च-बाल कथा संग्रह	50.00	50%	25.00
9. एकांकिनाट्यद्वयम्	20.00	50%	10.00
10. नीतिकथामकरन्दः-बाल कथा संग्रह	60.00	50%	30.00
11. परिवर्तनम्-एकांकिनाटक	40.00	50%	20.00
12. सामभाष्यम्-टीका	125.00	50%	62.50
13. विविधा (संस्कृत रचना संग्रह)	30.00	50%	15.00
14. उच्छ्वासानां प्रतिच्छाया-उपन्यास	125.00	50%	62.50
15. अनुभूतिः-कविता संग्रह	80.00	50%	40.00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

16.	शतकचतुष्टयम्-काव्य	40.00	50%	20.00
17.	के ते आसन् डायनासोरा:	50.00	50%	25.00
18.	श्रीमद्भगवद्विलासम्	60.00	50%	30.00
19.	शतकत्रयम्	45.00	50%	22.00
20.	व्यामोह:-उपन्यास	40.00	50%	20.00
21.	महर्षिमाल्यार्पयणम्	25.00	50%	12.50
22.	श्रीवात्स्यनारायणम्	40.00	50%	20.00
23.	गीतिमञ्जरी	60.00	50%	30.00
24.	पुस्तकालयपरिचर्या प्रसूनम्	200.00	50%	100.00
25.	वेदनावल्लकी	50.00	50%	25.00
26.	वैदिकीय यज्ञविद्या	200.00	50%	100.00

* खण्ड 'क' में उल्लिखित पुस्तकों पर एक सैट क्रय करने पर 25% छूट तथा अधिक प्रतियाँ क्रय करने पर अधिक छूट दी जायेगी।
* सरकारी संस्थाओं के लिए कुल छूट 25% ही होगी

श्रीकृष्ण सेमवाल
सचिव
दिल्ली संस्कृत अकादमी
दूरभाष : 3555676

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकरण संख्या/एफ-२ (एस) (३७) प्रेस/९०/२०९७

वर्षं नवमम् (चतुर्थाङ्कः)

जनवरी २००० तः मार्च २००० पर्यन्तम्

संस्कृत-मञ्जरी

(त्रैमासिकी)

('स्वतन्त्रता' शब्दपरक-समस्यापूर्ति-विशेषाङ्कः)

सम्पादकः

श्रीकृष्णसेमवालः

सचिवः

दिल्ली-संस्कृत-अकादमी

(राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-सर्वकारः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशकः—
सचिवः
दिल्ली-संस्कृत-अकादमी
(राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-सर्वकारः)

© **दिल्ली-संस्कृत-अकादमी**

प्राप्तिस्थानम्—
विक्रय-विभागः
दिल्ली-संस्कृत-अकादमी
(राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-सर्वकारः)
पूर्व-भारती-महिला-महाविद्यालयभवनम्
प्लाट सं० ५ झण्डेवालानम् करोलबाग़ोपनगरम्, नवदिल्ली-११०००५
दूरभाषः ३५५५६७६/७५३५५९२

मूल्यम् — ८.०० रूप्यकाणि

मुद्रकः—
अमर-प्रिण्टिङ्ग-प्रेस्स्
विजयनगरम्, दिल्ली-११०००९
दूरभाष : ७२५२३६२, ७१३५७२५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ मिश्रोऽभिराजेन्द्रः
आचार्यः, शिमलाविश्वविद्यालयीयः, हिमाचलप्रदेशः

(१)

स्वजीवनाऽमृतोद्भवप्रभूतसौख्यदायिनी
पराऽवमाननाशिनी प्रसुप्तचिद्विकासिनी।
दयाकृपाक्षमाऽर्जवप्रतापशौर्यसंश्रिता
जयन्त्यनेहसि त्रयेऽपि जन्मिनां स्वतन्त्रता ॥

(२)

नभोगतुङ्गतामपि स्वतुङ्गताऽतिलङ्घिनी
पयोध्यगाधतामपि ध्रुवं दृढातिशायिनी।
प्रचण्डवाय्वपेक्षयाऽप्यहोऽधिकं प्रवेगिनी
महौजसां प्रचारिणी जयेदियं स्वतन्त्रता ॥

(३)

दृषत्कठोरहृद्भिनत्ति सत्वरं स्वतन्त्रता
निरर्गलप्रपातवारुणद्ध्यहो स्वतन्त्रता।
असम्भवान्यहोऽखिलानि कल्पते स्वतन्त्रता
जगत्यमेयशक्तिका महीयतां स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

न रोचते शुकाय हेमपञ्जरोऽपि यां विना
प्रमोदते न मन्दुरामृगेन्द्रकोऽपि यां विना ।
असार्थकं निरुत्सवं यया विनाऽस्ति जीवनं
विलक्षणोद्धवप्रदा जयत्यहो स्वतन्त्रता ।।

(५)

स्फुरन्ति वृक्षपल्लवाः प्रभञ्जनोपलालिता
लसन्ति वृन्तमूर्ध्नि पुष्पसञ्चयाश्च वीरुधाम् ।
समुत्पतन्ति बद्धपङ्क्तयोऽम्बरे पतत्रिणः
ययाऽनुकम्पिताः प्रवर्धतामसौ स्वतन्त्रता ।।

(६)

कृशानुरेति दाहतां न किं जलैरबाधितो
जलं बिभर्ति शीततामबाधितोऽग्निना न किम् ?
बलाहको न किं ददाति वारि झञ्झया विना
समर्थतां प्रकाशयत्यहो द्रुतं स्वतन्त्रता ।।

(७)

सुखं समेधतां कथं पराश्रयोपजीविनां
गुणो विकाशतां कथं परावमानभोगिनाम् ?
कथम्महीयतामहो निसर्ग एव मानिना-
मवाप्यते हृषीकशंसिनी न चेत्स्वतन्त्रता ।।

(८)

त्रिदोषतापिनी कलङ्ककल्मषौघनाशिनी
दयाकृपापरोपकारबन्धुताप्रकाशिनी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखाम्बुजस्मितोत्थसंविधानसूत्रधारिणी
त्रिलोकशोकवारिणी विभासतां स्वतंत्रता ॥

(९)

निकृष्टकन्थयाऽपि छाद्यते न किं कलेवरं
विलक्षभिक्षयाऽपि किन्न याप्यते स्वजीवनम् ?
स्वपित्यलं सुखेन किं जनो न चत्वरेशयोः
यतस्तदीयजीवने प्रवल्गते स्वतन्त्रता ॥

(१०)

चकास्ति भूरि भूतले न किं स्वतन्त्रभारतं
स्वभव्ययत्नसर्जकं स्वगौरवोपरक्षकम् ।
महीयते पुनर्जगत्यहोऽस्मदीयसंस्कृति-
स्तदीयहेतुरस्ति केवलं वृता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ परमानन्दशास्त्री,
सिद्धार्थसदनं, राममन्दिरमार्गः, अलीगढ़ः उत्तरप्रदेशः

(१)

अनातुरा वसन्तु बुद्धिचातुरी पराः कथम्
भवेत् स्वदेश एव चेत् परस्य संस्थितो वशे ।
पतत्त्रिणापि पञ्जरे समस्तसौख्यभोगिना
यदिष्यते स्वपक्षतेः प्रसारिणी स्वतन्त्रता ॥

(२)

स्वतन्त्रताऽऽजिघोषमानिशम्य भारतोत्थितम्
अपृच्छदेत्य वृत्रहा किमेभिरिष्यते विधे !
चतुर्भिरूच आननैर्वचः समं चतुर्मुखः ।
स्वतन्त्रता स्वतन्त्रता स्वतन्त्रता स्वतन्त्रता ॥

(३)

अभूत्तदांऽऽग्लराष्ट्रमत्र भूतले तथा प्रभुः
न यस्य राज्य ईयिवान् कदापि तिग्मदीधितिः ।
यदाप शाम्बराधिपत्यमम्बरे जले स्थले
प्रसह्य भारतैर्धृतास्ति तत्कारात् स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

अलौकिकी विभाति लोकमान्य-लोकगर्जना
यदस्ति जन्मनाधिकार एव नः स्वतन्त्रता।
जयत्यदः सुभाषहिन्दसैनिकाभिनन्दनम्
प्रयच्छ रक्तमेहि मच्च गृह्यतां स्वतन्त्रता॥

(५)

असंख्यघोरकष्टदष्टमातृभू-विमोचकै-
रसूनपि प्रदाय यार्जिता पुनः, परैर्जिता।
विधेयमेक मिष्यते निजोत्तराधिकारिणाम्
तथागता न जातु यात्वनागते स्वतन्त्रता॥

(६)

नवप्रबोध भासिता विभाषिता पुनः पुनः
पुरस्कृतास्तु नः सदा पुरः कृता स्वतन्त्रता।
श्रमाम्बुनैव सिञ्चिता न चेयमेधते लता
प्रतिष्ठितास्ति शोणिताभिषेकतः स्वतन्त्रता॥

(७)

सुवर्णवत्सरोत्सवे विबोधयन्नवां शतीम्
विशोधयन् निषिक्ततैलकर्णशायिनां श्रुतिम्।
अतोऽणुघोष उत्थितो गतस्तथा विहायसम्
यथा गतव्यथा श्वसित्यथात्र नः स्वतन्त्रता॥

(८)

व्यभादथाटलेन रक्तदुर्गतोलितो ध्वजः
हिमाद्रिणापि गौरवेण तानितं निजं शिरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकारि हिन्दसागरेण वीचिनर्तनोत्सवः

सुचारु कारुणारुतेन वीणिता स्वतन्त्रता ॥

(९)

अपायनीकृता विभाकरेण हेमरश्मयः ।

प्रमोद निर्भराऽभवत् करम्बिता वसुन्धरा ।

निधाय साहसे पदं मयाप्यकिञ्चनेन रे ?

सुवर्ण पद्ममालिकाभिरर्चिता स्वतन्त्रता ॥

(१०)

जयत्यभूतपूर्वभूतभावनी स्वतन्त्रता

जयत्यशेषभूनिवेशपावनी स्वतन्त्रता ।

त्रिवर्गसारचुम्बिका वसुन्धराकुटुम्बिका

सुनीतिकुम्भिकाऽमृतस्य भारती स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ श्रीपरमानन्दझा

ग्रामः—गङ्गौली, पो.-राजे, जनपद-मधुबनी, बिहारः

(१)

तृणादिदानैः परितोषितः सदा,
जनैर्मनोहारिवचोभिरर्चितः।
रुचिं खगोऽप्यञ्चति चेन्न पञ्जरे,
कुतो वयं, सर्वमता स्वतन्त्रता॥

(२)

अहो महोत्साहभृतां स्वजन्मभू-
विपत्तिशान्त्यै क्षणमप्यतन्द्रता।
समुज्झितारातिबलप्रचण्डता
यैरर्जिता भारतभूस्वतन्त्रता॥

(३)

समर्प्य सर्वस्वमपि स्वजन्मभू-
पवित्रपादाम्बुजयोः किलाञ्जसा।
वीरैरसंख्यैरिह भारताजिरे
समर्जितैवाभिमता स्वतन्त्रता॥

(४)

एवं हि यासीन्महतां हृदिस्थिता
स्वकीयदेशोन्नतिकामकल्पिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो महोच्छृङ्खलताऽपराभिधा
सैवाधुनाधः पतिता स्वतन्त्रता ॥

(५)

छात्राः स्वतन्त्रा, गुरवः स्वतन्त्रकाः,
पत्यः स्वतन्त्राः, पतयः स्वतन्त्रकाः ।
भृत्याः स्वतन्त्रा, भृतिदाः स्वतन्त्रका
एवं विधा ह्यद्यतनी स्वतन्त्रता ॥

(६)

स्वच्छन्दमान्दोलयितुं जनान् सदा
मुदा कदाचारपराः स्वतन्त्रकाः ।
तान् धर्तुमारक्षिगणाः स्वतन्त्रका
अहो भुवो नोऽद्यतनी स्वतन्त्रता ।

(७)

किमप्यहो कर्तुमकर्तुमन्यथाकर्तुं
स्वतन्त्राः खलु नेतृतल्लजाः ।
न्यायालये सत्यमसत्यमञ्जसा-
ऽधिवक्तुरावक्तुमथ स्वतन्त्रता ॥

(८)

इत्थं हि पञ्चाशतिवत्सरेष्वपि
व्यवस्थिताऽभून्न च भूरि भूरियम् ।
अतः स्थितिं वीक्ष्य विचिन्त्यतां कथं
सुरक्षिता स्यात् सततं स्वतन्त्रता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

यथायथं चेन्निजकर्मसु स्थिताः
समे वयं स्याम पुनर्नयान्विता ।
शान्तिप्रदा कान्तियुता सुतालये
सुरक्षितास्याद्धि तदा स्वतन्त्रता ॥

(१०)

विद्या, विवेकः, सुनयः, सुहार्दता,
कलाकलापो नृषु सच्चरित्रता ।
इमानि लक्ष्याणि बिभर्ति चेत्तदा
सदा समुल्लासमियात् स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ ओम्प्रकाशत्रिवेदी
प्रवक्ता, राष्ट्रिय उ. मा. महाविद्यालय
बरहन जनपद-आगरा, उत्तरप्रदेश

(१)

पटेल-नेहरु-तिलकादि-नेतृभि-
महात्मना च विहितयत्नकारणात् ।
चिरन्तनीमपि विनिवार्य दासतां
प्रपेदुषी भरत भुवं स्वतन्त्रता ॥

(२)

सुवत्सरे तुरगयुगग्रहावनी-
तमेऽभवत्सिततनुशासनक्षयः ।
अतस्तदा प्रभृति जनैर्महोत्सवैः
समर्च्यते प्रतिशरदं स्वतन्त्रता ॥

(३)

सुभारतप्रियजनतासुखप्रदा
विदेशिनां च विविधतापवर्धिनी ।
यशः श्रियं दशसु दिशासु तन्वती
विराजते भरतभुवि स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

एकदा जनसमूहसम्मुखे
तत्सुभाषमुखनिर्गतं वचः।
यूयमर्पयत मे स्वशोणितं
दास्यते खलु मया स्वतन्त्रता॥

(५)

कुत्सितं हि वचनं विनिन्द्यते
कीर्त्यते मितमुदीरितं वचः।
पारतन्त्र्यमनिशं प्रबाधते
मोमुदां च तनुते स्वतन्त्रता॥

(६)

राजराजदिशि राजते यथा
पार्वतीप्रियपिता हिमाचलः।
एवमेव निखिलेऽपि भारते
राजतामविरतं स्वतन्त्रता॥

(७)

धीमतां नयविदां मनीषिणां
लोकशम्प्रदमिदं सुभाषितम्।
राक्षसीव परतन्त्रता मता
प्रेयसीव सुखदा स्वतन्त्रता॥

(८)

राजनीतिचणराष्ट्रनायकै-
रुग्रवाददलनाय यत्यताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैः पुनर्भरतभूसमृद्धये
रक्ष्यतां च सततं स्वतन्त्रता ॥

(९)

विलोक्य वैयाकरणस्य योग्यतां
न विस्मयं कोऽपि जनः प्रपद्यताम् ।
स्वतन्त्रशब्दादमुना निरुच्यते
तला च टापा च किल स्वतन्त्रता ॥

(१०)

नितान्तशान्तिदायिनी निकामकामपोषिणी
त्रिवर्णचक्रशोभनध्वजाधिरोहणद्युतिः ।
स्वयंप्रभाप्रभासुरावलक्षकीर्तिसंयुता
चिराय भारते प्रियेऽवतिष्ठतां स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ आचार्यो बाबूराम-अवस्थी
वाजपेयी कालोनी लखीमपुर खीरी, उत्तरप्रदेश:

(१)

कदापि पार्श्वं न परित्यजत्यहो
भवत्यलं या समभाव-भूषिता ।
प्रवर्तते या च हिताय नः सदा
सखीव साऽऽभाति भुवि स्वतन्त्रता ॥

(२)

दशाननेनापहृता तु जानकी
पुनर्मिलापेन यथा ह्यनन्दयत्-
रघूत्तमं वीरवरं तथा जनं
प्रसादयत्यङ्कगता स्वतन्त्रता ॥

(३)

दिने दिने देव-विभैकताश्रिता
समेधिता सौख्य-सुधान्विता हिता ।
प्रकाशमाना जनतन्त्र-चन्द्रिका
नवागता सोमकला-स्वतन्त्रता ॥

(४)

अधीनतां नो सहते परस्य या
यया च धन्या वर-भारतावनिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुरक्षणीया सुसुतैर्गरीयसी
स्वजन्मदात्रीव हि सा स्वतन्त्रता ।।

(५)

यया विना नो लभते समादरं
न चास्मितां धारयतीह भारतम् ।
अनिन्दिता याऽभिमता सुधीमतां
वसेत्सदा सा सुखदा स्वतन्त्रता ।।

(६)

विदेशि-दुःश्शासन-नाशकारिणी
स्वदेश-दुःखादिक-दोष-दारिणी ।
सुराष्ट्र-सत्यव्रत-वृत्त-पोषिका
शिवेव साक्षाल्लसति स्वतन्त्रता ।।

(७)

तपोभिरुग्रैः सुकृतैश्च लभ्यते
शुभैश्चरित्रैः सततं सुरक्ष्यते ।
क्रियावतामेकतया प्रपोष्यते
सुसंस्कृता दिव्यगुणा स्वतन्त्रता ।।

(८)

श्रियं प्रयच्छत्यभयं करोति च
तनोति कीर्तिं द्रढयत्यखण्डताम् ।
जनैकतां वर्धयतीह शोभिता
विजृम्भते कल्पलता-स्वतन्त्रता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

पणीकृतं यैर्निज-जीवनं प्रियं
तिरस्कृतं तन्महनीय-वैभवम् ।
दृढीकृतं राष्ट्रमथो समर्चितं
सुतान्हि तान्स्वान्नमति स्वतन्त्रता ॥

(१०)

विदूष्यते या विविधैः प्रदूषणै-
र्विखण्ड्यते स्वार्थपरैश्च कैश्चन ।
कुदृष्टिपातेन विहन्यते सखे !
सुरक्ष्यतां सा सततं स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

जगदीशप्रसादः सेमवाल
उपाचार्यः, व्याकरणविभागे पञ्जाब विश्वविद्यालय
होशियारपुरं, पञ्जाब

(१)

प्रभेव भास्करोदये निशेव चन्द्रतारका
सुधेव सिन्धुमन्थने लतेव पुष्पमण्डिता ।
नदीव तोयवाहिनी पयस्विनीव गौरियं
समस्तभारते नवा विराजते स्वतन्त्रता ॥

(२)

परैर्निपीडिता यदाऽत्र भारती वसुन्धरा
भृशं रुरोद मुक्तये विदेशिदास्यबन्धनात् ।
तदा विमुक्तबन्धना कृता प्रदाय जीवनं
सुतैः स्वमातृभूरियं, विभात्यतः स्वतन्त्रता ॥

(३)

निदाघपीडितस्य सा नवीनवारिदावली
विहङ्गमालिकेव सा निशात्ययाम्बरे न वा ।
प्रभूतसौख्यदायिनी प्रभूतमोदकारिणी
स्वभारतावनौ नवा समागता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

नृशंसशासनक्रियाप्रपीडनव्यथाकुला
मृगाङ्गनेव लुब्धकस्य पाशबद्धताङ्गता ।
समस्तभारती धरा परन्तु शोभतेऽधुना
प्रयत्नतः समागता यदा पुनः स्वतन्त्रता ॥

(५)

यशस्विवीरपुत्रकैः समर्प्य जीवनं स्वकं
विमोचिता स्वमातृभूर्विदेशिदास्यपाशतः ।
ततो विकासकारिणी जनैकचित्तहारिणी
समस्तमङ्गलास्पदा समागता स्वतन्त्रता ॥

(६)

प्रदीप्तमालिकेव सा तमोविनाशकारिणी
द्वितीयसिन्धुजेव सा दरिद्रतापहारिणी ।
पवित्रजाह्नवीव सा समग्रपापदारिणी
पुनश्च भारते नवा समागता स्वतन्त्रता ॥

(७)

सुराङ्गनेव दैव्यपाणितो विदेशिशासनाद्
विमुक्तिमाप्य शोभतेऽखिला धराऽद्य भारती ।
न कस्य जायते सुखं समस्तगात्रहर्षकं
भवेद्धि यस्य यत्नतः समागता स्वतन्त्रता ॥

(८)

गिरीन्द्रशेखरा तथा समुद्रमेखलान्विता
वनान्तभूमिशोभिता सुरापगादिसंयुता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवौकसामपि प्रिया मुनीन्द्रवृन्दसेविता
पुनर्मुदङ्गता मही यदागता स्वतन्त्रता ॥

(९)

महेन्द्रतुल्यविक्रमैर्दृढव्रतोत्तमक्रमैः
सदैव सत्यपालकैरहिंस्रशोभिभालकैः ।
निरन्तरप्रयत्नतो विमोचिता स्वमातृभू
र्विदेशिदास्यतो यदा तदागता स्वतन्त्रता ॥

(१०)

स्वकन्यकेव पितृभिः स्वभामिनीव भर्तृभिः
स्वजन्मदायिनी सुतैर्यथा च रक्ष्यते सदा ।
समस्तभारतैर्जनैर्विशेषतो यशोधनै-
स्तथैव रक्ष्यतामियं मुदावहा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. शिवसागरत्रिपाठी
संस्कृतविभागाध्यक्षचर; राजस्थानविश्वविद्यालय:
ए-६५, जनता-कालोनी, जयपुरम्

(१)

पुरस्कृता धरातले दिवि स्थितैः सुरासुरैः
परिष्कृता समर्पितैरमर्षभावधारिभिः।
नमस्कृता नरोत्तमैः प्रसन्नदेशवासिभिः
शुभा वरा प्रभावती यशस्विनी स्वतन्त्रता॥

(२)

विनिन्दिताः प्रताडिताः विहिंसिता विदेशजाः
विलोक्य देशभावनां भयार्दिताः प्रदुद्रुवुः।
सुरक्षिताः प्रसादिताः प्रिया स्वदेशवासिनः
अतः सदा हि भारते समर्थ्यते स्वतन्त्रता॥

(३)

तिरस्करीति वैरिणां विजित्वरी सदाशया
मुधाभिमानकालिका स्वताप्रबोधपालिका।
विकासरत्नदायिनी समस्तदोषनाशिनी
मनःप्रफुल्लकारिणी समुन्नता स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

इदं स्वतन्त्रभारतं न दीनहीनमन्दिरम्
इदं सुशक्तभारतं न षण्डकातरस्थलम् ।
इदं न भीरुभारतं, बलिष्ठसंघजन्मदम्
इदं तपस्विभारतं ब्रवीति नः स्वतन्त्रता ॥

(५)

रसोज्ज्वला बलोज्ज्वला गुणोज्ज्वला महोज्ज्वला
यशस्विनी तरस्विनी पयस्विनी महस्विनी ।
समानता-सहिष्णुता-क्रियान्विता समाहता
सुपावनी विचक्षणा विकस्वरा स्वतन्त्रता ॥

(६)

मतान्तरावलम्बिनो विभिन्नशब्दभाषिणो
वसन्ति ते सहैव रे विभिन्न वेशधारिणः ।
स्वभारतीयसभ्यतां स्वभारतीयसंस्कृतिं
सभाजयन्ति खल्वहो फलायिता स्वतन्त्रता ॥

(७)

मनुष्यताप्रकाशिनी ह्यनार्यताविनाशिनी
विदग्धता-सुधीरता-स्वराष्ट्रभक्तिदायिनी ।
स्वराज्यसिद्धिदा तथा सुराज्यरामराज्यदा
गुणातिशायिनी भवेच्छमान्विता स्वतन्त्रता ॥

(८)

स्वदेशवैरिणः प्रतारणाचणातितायिनः
दुराक्रमान् दुराशयान् विनाश्य, प्रेष्ठराष्ट्रियान् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजागरान् बलान्वितान् कृतश्रमान् समुद्यतान्
सदायुधान्नुदायुधान् करोतु नः स्वतन्त्रता ॥

(९)

स्वराष्ट्रशक्तिवर्धनं स्वदेशशक्तिरक्षणम्
स्वधर्मकर्मसर्जनं स्वशत्रुसङ्घतर्जनम् ।
परम्परासमर्चनं स्वविघ्नपुञ्जकर्तनम्
मनुष्यता-प्रपूजनं करोतु नः स्वतन्त्रता ॥

(१०)

गृहे गृहे विकासकार्यगौरवं प्रवर्धताम्
कृते कृते विभासतां नवीनयोजनादिकम् ।
गते गते प्रकाशतां प्रशस्तजागरा गतिः
ददाति मामकी प्रियेह वाचिकं स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरं जयेत् स्वतन्त्रता

■ डॉ. कृष्णलालः,
दिल्लीविश्वविद्यालयीयसंस्कृतविभागस्य पूर्वाचार्यः
ई-९३७, सरस्वतीविहारो, नवादिल्ली।

(१)

प्रदाय रक्तमात्मनः प्रसह्य यातना घनाः
स्वयं हसद्भिरेव मृत्युबन्धनं गले कृतम्।
असून् ददुः स्वमातृभूमिमुक्तये सदा मुदा
स्मरन्तु वीरसैनिकांश्च रक्ष्यतां स्वतन्त्रता॥

(२)

न विस्मरन्तु चन्द्रशेखरं च बिस्मिलं प्रियाः
बलिं ददुः स्वमातृभूमिमृत्तिकाहिते च ये।
स्मरन्तु रे स्मरन्तु भक्तसिंहवीरतां ध्रुवाम्
इयं सुभाषवीररक्तसिक्तभूः स्वतन्त्रता॥

(३)

सुखं स्वराज्यसंश्रितं न चापरं जुघोष यः
ऋषिं स्मरन्तु तं दयामयं स्वतन्त्रतापरम्।
विनायकः सवर्करः स्वतन्त्रताग्निधुक्षकः
तदीयवाग्गतिप्रगीतकर्मतः स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

अहिंसयार्जिता महात्मना च सत्यनिष्ठया
स्वयं च बालजाह्नवीधरेण धैर्यघोषिता।
जने जने परां मुदं प्रसारयन्त्यहो प्रिया
भवेच्चिरं स्वतन्त्रता जयेच्चिरं स्वतन्त्रता॥

(५)

श्वसद्द्विषत्करालपन्नगो यदा विषं वमेत्
यदा च पात्यते स्वसंस्कृतिर्विदेशिलुण्ठकैः।
विहाय निद्रितं मनस्तदा हि जागरो वरम्
गतालसैः प्रबोधितैश्च रक्ष्यते स्वतन्त्रता॥

(६)

तदुत्थिता वयं निजे हि कार्यभारवाहने
भवेय दत्तमानसाश्चलेम सत्पथे सदा।
समुज्ज्वलं यशश्चकास्तु भारतस्य सूर्यवत्
सदैव रक्षिता भवेदियं प्रिया स्वतन्त्रता॥

(७)

त्वमेव भारतीयशो हिमालयोऽचलो दृढो
गभीरसागरस्त्वमेव निर्भयः प्रभञ्जनः।
न वेत्सि वर्त्मरोधनं न वेत्सि बाधनं क्वचित्
त्वया पदैरकम्पितैश्च रक्ष्यतां स्वतन्त्रता॥

(८)

विपत्सु धैर्यधारणं युधि प्रकम्पनं द्विषां
चरित्रमद्भुतं युवन् न ते युवन् क्वचिद् भयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गिरिर्भवेत् पथि क्वचित्तवाङ्घ्रिणा स मर्दितो
विहाय जीवितं सदा हि रक्षिता स्वतन्त्रता ॥

(९)

प्रबुद्धशुद्धयुद्धवीरदेहदाननिर्जिता
पटेललालबादुरादिनीतिभिः सुरक्षिता ।
प्रवीरयोद्धदुर्दमप्रतप्तरक्ततर्पिता
युवन्नसूनपि प्रदाय रक्ष्यतां स्वतन्त्रता ॥

(१०)

अखण्डसर्वमण्डलध्वजत्रिवर्णमण्डिता
विमुक्तवर्णजातिसम्प्रदायदेशभिन्नता ।
समुच्छलज्जनप्रतप्तधैर्यशौर्यसंधृताऽ
विजेयशक्तिरात्मनो जयेच्चिरं स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ पद्मशास्त्री
१२८, मुक्तानन्दनगरं गोपालपुरमार्गः जयपुरम्

(१)

सर्वधर्मसमभावभाविता
लोकतन्त्रमतविग्रहाङ्कुशा ।
मानवीयमहिमासमन्विता
भारते विजयतात् स्वतन्त्रता ॥

(२)

विश्वविस्मयकरी त्रिलोचना
बम्बकाण्डकुपिताननाऽधुना ।
दग्धुमिच्छति दिगन्तजित्वरी
शत्रुसैन्यनिवहं, स्वतन्त्रता ॥

(३)

संभृता नवति कोटिपुत्रकै
र्दैन्यतापबहुला विभाव्यते ।
स्वप्रतापपथसञ्चरक्रमा
राहुणा निगलिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

राष्ट्रभक्तिरिव पुत्रवत्सला
शत्रुसैन्यबलभेदनक्षमा ।
दुष्टदर्पदलनाय चोद्यता
चण्डिकेव चपला स्वतन्त्रता ॥

(५)

मानसस्थजलपावितान्तरा
सत्वकर्मभिरमोघविक्रमा ।
वारुणीव मदरागरञ्जिता
घूर्णिता कथमहो स्वतन्त्रता ? ॥

(६)

नीरगव्यरसनिर्झरोदका
श्यामला सुरभिता मनोहरा ।
आम्रनीपवणशोभिताना
नापयात्वधिगता स्वतनन्त्रता ॥

(७)

वर्धते प्रतिदिनं महार्घता
संकटे जनगणस्य जीवनम् ।
नन्दने निवसितुन्न शक्यते,
कीदृशी वद सखे ! स्वतन्त्रता ? ॥

(८)

आत्मजैरपि सदा प्रवञ्चिता
खण्डिता प्रचुररक्तरञ्जिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मशक्तिपरिवर्तनोत्सुका
क्व प्रयाति विधुरा स्वतन्त्रता ॥

(९)

धूर्तनर्तकविटैर्विदूषकै-
र्निश्छलापि छलिता पदे पदे ।
कुट्टिनीव नयदूषिताशया
दृश्यतेऽतिचतुरा स्वतन्त्रता ॥

(१०)

सीम्नि सीम्नि रणकोविदैर्भ-
टैर्जन्मभूमिपरिरक्षणोद्यतैः ।
साभिमानमभिवन्द्यते सदा
स्तूयते, न सुलभा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवत्वमेति स्वतन्त्रता

■ डॉ. कृपारामत्रिपाठी
संस्कृत-विभागः-एम.एल. के. पी. जी. महाविद्यालयः, बलरामपुरं (उ.प्र.) २७१२०१

(१)

इहात्मनः स्वात्मनि तन्त्रमिष्यते,
न कैर्नरैः काङ्क्षितमन्यजन्तुभिः ।
विहाय सर्वस्वमपीह काम्यते,
सुखेप्सुभिर्मूलतया स्वतन्त्रता ॥

(२)

अशेषमेतद्धि जगच्चराचरं,
विनिर्मितं विश्वसृजेति निश्चितम् ।
अचेतनांशः परवानशेषतः,
प्रचेतनांशस्य गुणः स्वतन्त्रता ॥

(३)

चिराय दुर्दैव कुचक्रयन्त्रितः,
सुबोधवानप्यतिशक्तिमानपि ।
वशंवदस्तिष्ठति मायया हरे-
रुदेति यावन्न पुनः स्वतन्त्रता ॥

(४)

जडत्वमापद्यत एव चेतनो,
निमज्य दैवात्परतन्त्रताम्बुधौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृपालुनासौ हरिणोद्धृतो यदा,
प्रसादितोदेति तदा स्वतन्त्रता ॥

(५)

निबद्धमात्मानमवैति यावता
पशुर्बलीयानापि निर्बलैर्नरैः ।
न चेष्टते मुक्तय एव तावता
सुदुर्लभा तस्य ननु स्वतन्त्रता ॥

(६)

नरो यथा कोऽपि पशुर्यथाथवा,
खगोऽपि मीनोऽपि निबध्यते नरैः ।
तथैव देशेऽपि पराश्रितो भवेत्,
कदाचिदेषा ह्रियते स्वतन्त्रता ॥

(७)

सुधीः सुधीरो नर एव केवलो,
विशिष्यते लक्षमितासु योनिषु ।
स जातमात्रोऽधिकृतः स्वयम्भुवा,
स्वतन्त्रतायाञ्जयति स्वतन्त्रता ॥

(८)

स वेत्ति देशश्च नरः स्वतन्त्रताम्
सुखानि सा येन चिरेण लभ्यते ।
यथार्थतामृच्छति सा प्रसूयते
यदीह सर्वाभ्युदयं स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

स्वशासनं स्वीयजनप्रशासनं
स्वसर्वकारस्वविधानसंसदः ।
स्वदेशसीमाबलसंस्थितिं गतिं,
विकासमाविष्कुरुते स्वतन्त्रता ॥

(१०)

अखण्ड विश्वैककुटुम्बतामतिः
सनातनी भारतवासिनामहः ।
पुरातनीसत्यपि साम्प्रतं पुन-
र्नवत्त्वमभ्येति यथा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ पं. श्रीराम दवे
५५९ बी, श्रीनिकेतनम्, सरदारपुरा, जोधपुरं
राजस्थानप्रदेशः ३४२००३

(१)

अनेक-वीर-विक्रमाप्तगौरवा यशस्विता ।
विराजते यदन्तरा प्रियास्ति सा स्वतन्त्रता ॥

(२)

महात्ममार्गमण्डितैः जवाहराख्यपण्डितैः ।
हृदा मुदा समादृता मुदेऽस्तुनः स्वतन्त्रता ॥

(३)

अनेक-संकटोद्धृता निराकृतारिविक्रमा ।
स्वराष्ट्रभक्ति-भाविता विराजते स्वतन्त्रता ॥

(४)

कृषीवलश्रमाम्बुसेक-शाद्वला यशोधरा ।
अनेकयन्त्रतन्त्रणाऽभिमन्त्रिता स्वतन्त्रता ॥

(५)

समस्त-विश्व-वन्दितात्म-संस्कृति-प्रकाशिता ।
तरस्विताऽब्धिवारिभिस्तरङ्गिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

स्वपूर्वजाप्त-पुण्यपुञ्ज-पोषण प्रमोदिता ।
मनस्विताऽभिशंसिता विभातिनः स्वतन्त्रता ।।

(७)

हताऽस्तु नो न संहतिः, मनःसु नो विसङ्गतिः ।
स्वशौर्यभाव-गर्विता सदाऽस्तुनः स्वतन्त्रता ।।

(८)

प्रदेश-जाति-भावना विभेदिकाऽस्तु नो नृणाम् ।
जना भवन्तु निर्भयाः श्रियेऽस्तु नः स्वतन्त्रता ।।

(९)

स्वधर्म-पालने-रता भवन्तु देशवासिनः ।
मृषार्थकाममोहिता भवेन्न नः स्वतन्त्रता ।।

(१०)

हुतात्म-जीवनैर्मुदा प्ररोपिता सुधालता ।
फिरङ्गि-कूट-मूर्च्छिता न जायतां स्वतन्त्रता ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. नारायणशास्त्रीकाङ्करः विद्यालङ्कारः
विद्या-वैभव-भवनम्, सुमेरुकर्ण-मार्गः, रामगञ्जः,
धान्यमण्डी, जयपुरम्-३०२००३ (राजस्थानम्)

(१)

कीटाः पतङ्गाः पशवश्च पाक्षिणो,
देवाः पिशाचा असुराश्च राक्षसाः ।
यक्षा मनुष्याः स्पृहन्ति यत्कृते,
सा रक्षणीया प्रथमं "स्वतन्त्रता" ॥

(२)

हे मातृभूमे ! तव तान् सुतानहं,
नमामि नक्तन्दिवमार्य-मार्गिणः ।
येषाममूल्यैर्बलिदान-राशिभिः,
प्राप्ताधुनेयं सुखदा "स्वतन्त्रता" ॥

(३)

प्रदीयतां मेऽपि तथा बलौघो,
यथा मदीयैर्बल-सञ्चयैस्तव ।
विश्वप्रसिद्धाखिल-मार्ग-दर्शिका,
निरापदेयं[१] भवतात् "स्वतन्त्रता ॥

१ "आपं चैव हलन्तानां यथा वाचा । निशा दिशा" इत्यनुशासनान् आपच्छब्दोऽत्र आबन्तः प्रयुक्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

विदेशिभिर्दुष्ट-प्रशासकैः पुरा,
प्रदत्त-पीडा अपि मर्म-भेदिकाः ।
सोढ्वाऽधुना या समवायि सा प्रिया,
संरक्षणीया प्रथमं "स्वतन्त्रता ॥" ॥

(५)

स्वसम्प्रदायं च तथा स्वसंस्कृतिम्,
एवं स्वधर्मं च वलम्ब्य[१] कर्मणाम् ।
सम्पादनं यद्यभिलष्यतेऽधुना,
संरक्षणीया प्रथमं "स्वतन्त्रता" ॥

(६)

शारीरिकं मानसिकं तथाऽपरं,
स्वास्थ्यं यदीष्टं स-सुदीर्घजीवनम् ।
व्यूहं विदार्यापि महत्त्व-कर्मणां,
संरक्षणीया प्रथमं "स्वतन्त्रता" ॥

(७)

यदेप्सितं वस्तु मिलेन्न किञ्चन,
भ्रष्टाचरित्रैर्मलिनाः प्रशासकाः ।
महार्घता व्योमतलं च चुम्बेत्,
प्राप्ता फलं रक्षति किं "स्वतन्त्रता" ॥

---

१ 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यनुशासनात् 'वलम्ब्य' इत्यत्र उपसर्गस्य अकारस्य लोपः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

न शिक्षणे नापि च दीक्षणे पुनर
न्‍र्न संस्कृतौ-नापि च भाषणे तथा।
न भोजने चापि यदा स्वदेशिता,
प्राप्ता फलं रक्षति किं "स्वतन्त्रता" ॥

(९)

बलात्कृतिः स्त्रीषु यदाऽस्तु सन्ततं,
व्यापारिषु स्यात् करचौर्य-कारिता।
आतङ्कतो मुक्तिरवाप्यते नहि,
प्राप्ता फलं रक्षति किं "स्वतन्त्रता" ॥

(१०)

राष्ट्रस्य भाषा न यदा हि संस्कृतं
तदासने राजत इंग्लिशं पुनः।
विदेशि-वाचा च प्रशासिता हि ये,
किं नाम तेषामपि भोः। "स्वतन्त्रता" ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. गोस्वामिबलभद्रप्रसादशास्त्री
१४ अशोकनगरं नैनीतालमार्गः बरेली-उत्तरप्रदेशः

(१)

स्वनामधन्यान् जनवन्दितानहं,
नमामि तान् भारतगौरवास्पदान्।
शिरःप्रदानै-र्बलिवेदिकासु यैः,
समर्चिता भारतभूस्वतन्त्रता ॥

(२)

हिमाद्रिशृङ्गेषु दुरन्तदुर्गम-
स्थलेषु युद्धेऽरिबलप्रमाथिनः ।
सदाऽभिवन्द्या अपि वीरसैनिकाः,
सुरक्ष्यते यैः सततं सवतन्त्रता ॥

(३)

कथं प्रवृत्तिर्निजभोगसाधने,
सुखाकरोतु प्रभुतापि मानिनाम्।
यदा स्वराष्ट्रस्य समृद्धिलुण्ठकै-
र्हृता भवेन्मातृभुवः स्वतन्त्रता ॥

(४)

तदर्थसंघर्षरतैर्महाजनै-
श्चिरायकारागृहभुक्तजीवनैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुरन्तदास्यग्रहमुक्तवन्दिता ।
नवेन्दुवन्द्याऽधिगता स्वतन्त्रता ॥

(५)

प्रतिष्ठितं विश्वसमाजमानसे,
विकासशीलं प्रविधाय भारतम् ।
तथा कृतं तैर्जनतन्त्रसत्पथे,
यथा दृढाधारमधात् स्वतन्त्रता ॥

(६)

दुरन्तदुश्चक्रकठोरबन्धना-
दवाप्य मुक्तिं श्रमशक्तिसाधनैः ।
दिने दिने चान्द्रमसी कलेव सा,
विकासदीप्ता शुशुभे स्वतन्त्रता ॥

(७)

समस्तसद्धर्मसमानदर्शनैः,
स्वलोकतन्त्रे प्रतिबद्धचेतनैः ।
जनैरुदारैरनसूयमानसैः,
सुरक्षिता मातृभुवः स्वतन्त्रता ॥

(८)

देशोऽस्मदीयः कुटिलप्रचारकैः
संवीक्ष्यतेऽसौ जनहिंसकैः परैः ।
शस्यं यथा क्षेत्रगतं कृषीवलै-
रक्ष्या तथा भारतभूस्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

स्वराष्ट्रधर्मे क्षणचेतना क्षता ।
रिपुप्रवेशावसरप्रदायिनी ।
अतः सदा संयतजागरैर्जनै-
र्विधीयते स्थैर्यबला स्वतन्त्रता ॥

(१०)

विपुलैर्नवसाधनैरणु-
प्रतिभाशक्तिसमन्विताप्यसौ ।
समतामपि विश्वबन्धुतां,
तनुते भारतभूस्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोदमयी स्वतन्त्रता

■ आचार्यश्यामसुन्दरझा
गुरुकुलमहाविद्यालयः पूठ पो. बहादुरगढ़
जनपद-गाजियाबादः उत्तरप्रदेशः

(१)

गगने सुखितो विहङ्गमः
व्यथितः पञ्जरसंस्थितः शुकः
नियतं स तु भाग्यवान् जनः
वृणुते यं जगति स्वतन्त्रता ॥

(२)

परवान् बलवानपीह किं
लभते मोदलवं मनागपि
सततं धिगिमं पराश्रयं
जयति श्लोकमयी स्वतन्त्रता ॥

(३)

परनिघ्नजनो विलोक्यते
घृणया सर्वजनैरहर्निशम्
पुरुषं पुरुषार्थिनं सदा
कुरुते मोदमयी स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

हरते सकलं सुसाहसं
पुरुषस्यात्मबलं पराश्रयः
हृदये कुरुते कुतूहलम्
सततं सौख्यप्रदा स्वतन्त्रता ॥

(५)

क इहेच्छति पारतन्त्रयकं
लघुजीवोऽपि जनैर्विगर्हितम्
व्रियते सकलैः स्वभावतः
परमानन्दमयी स्वतन्त्रता ॥

(६)

न जना न च राष्ट्रकं क्वचित्
अभिलषन्त्यशुभं पराश्रयम्
सकलैरपि जन्तुभिः सदाऽऽ-
द्रियते माङ्गलिकी स्वतन्त्रता ॥

(७)

जगतीह तु कीटकैरपि
परवत्ता समुपेक्ष्यते सदा
अवसादयते पराश्रयः
मनुजान्, मानवती स्वतन्त्रता ॥

(८)

सकलोऽपि हि मोदते दिवा
अपहायासुरवैभवानिह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घनघोरतमः पराश्रयः

सुखदा सूर्यप्रभा स्वतन्त्रता ॥

(९)

न समुन्नतिराप्यते मनाक्

मनुजैः कुण्ठितमानसैः क्वचित्

अत एव तु देशवासिभिः

अधियाता शुभदा स्वतन्त्रता ॥

(१०)

भवबन्धनमाप्य कुर्वते

यतनं त्रोटयितुं शरीरिणः

परमेशकृपां विना कथं

भवताद् हस्तगता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समर्हणीया सततं स्वतन्त्रता

■ डॉ. मनुलता शर्मा
संस्कृतविभागाध्यक्षा
आर्यमहिलामहाविद्यालय:, वाराणसी, उत्तरप्रदेश:

(१)

सर्वं मतं स्वात्मवशं परं सुखं
पराश्रितं सर्वमतीव दुःखदम्।
पराश्रिता सत्पुरुषैर्विगर्हिता
सभाजिता नित्यमसौ स्वतन्त्रता ॥

(२)

स्वजातसम्मानविधूनने रता
तिरस्कृता सभ्यसमाजगर्हिता।
अधीनता क्वापि परस्य नोचिता
समर्हणीया सततं स्वतन्त्रता ॥

(३)

सुवर्णसम्पादितशुभ्रपञ्जरे
वसन्नदन् दाडिमबीजमञ्जुलम्।
पिबन्नपि स्वच्छपयः समं पुनः
विहाय यां वाञ्छति सा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

समस्तविश्वस्य समेऽपि जन्तवः
समस्तजातिर्निखिलाऽपि संस्कृतिः ।
अवाप्य यां यान्ति सदात्मगौरवं
प्रशंसिता सा सुजनैः स्वतन्त्रता ॥

(५)

शुभेच्छया शुभ्रधिया सुसज्जिता
भवन्तु सर्वेऽवहिता स्वतन्त्रता ।
स्वकीयतन्त्रेण जनाः सुशासिताः
स्वकीयकर्तव्यरताः सुशिक्षिताः ॥

(६)

चरित्रभाभासितभावना शुभा
बलान्वितोत्साहसुसङ्गतैकता ।
स्वदेशरागो दृढता स्वकर्मणि
गुणैः समग्रैर्लभते स्वतन्त्रता ॥

(७)

कदाचिदेतैः सुगणैर्विवर्जितान्
परस्परोद्रिक्तविरोधपीडितान् ।
प्रजेश्वरान् वीक्ष्य तदार्थलोलुपै
र्हता गुरुण्डैर्विपुला स्वतन्त्रता ॥

(८)

स्वमातृभूमिं निगडैर्नियन्त्रितां
वीतक्षणा वीक्ष्य विचक्षणा जगुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनारतं भारतमातरं बुधैः
स्वजन्मसिद्धाऽधिकृता स्वतन्त्रता ॥

(९)

निसर्गसर्गप्रभवात् पुरस्कृता
मनस्विभिर्मानधनैर्मनीषिता ।
रणोद्भटैः प्राणपरैः सुरक्षिता
वरीयसी भारतभूस्वतन्त्रता ॥

(१०)

स्वदेशसम्मानमहोत्सवायिता
स्वगौरवोत्थानकृते समुद्यता ।
स्वराष्ट्ररक्षाव्रतिभिः सभाजिता
सदैव रक्ष्या कृतिभिः स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० हरिश्चन्द्रदीक्षितशास्त्री
८/३४ लवकुशनगरं वार्ड बिठूर-कानपुरं-उत्तरप्रदेशः

(१)

न पारतन्त्र्यं प्रियमस्ति कस्यचित्
भवन्ति खिन्नाः पशवोऽपि बन्धने।
न पञ्जरे स्वादुफले खगः सुखी
न कांक्ष्यतां किं मनुजैः स्वतन्त्रता॥

(२)

न पाशवी किन्तु स्वतंत्रता वरा
परस्य यस्यां न विचार्यते क्षतिः।
परस्य यस्यां हितमस्तु स्वस्य च
सतां सदा सैव शुभा स्वतन्त्रता॥

(३)

किमस्ति स्वातन्त्र्यप्रयोजनं शुभम्
हितं भवेद् येन समाजराष्ट्रयोः।
न तस्य रोधो वचने न कर्मणि
शुभे सदा स्याद् विभया स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

जनेषु यस्यां सुमतिः समर्घ्यताम्
सखित्वसौहार्दसहायताक्रिया ।
विनश्यतां द्वेषघृणा च शत्रुता
सदेदृशी स्यात् सुखदा स्वतन्त्रता ।।

(५)

न कोऽपि यस्यां खलु साहसी भवेत्
प्रवञ्चयनाऽन्यायबलात् कुकर्मसु ।
कृतोऽपराधोऽचिरमेव दण्डयताम्
बलीयसी स्यादियती स्वतन्त्रता ।।

(६)

न पक्षपातः क्रियतां प्रजाधिपैः
स्वशक्तिवृद्ध्यै दमनं न कस्यचित् ।
कुशासनोऽच्छेदनशक्तिसन्मतिः
प्रजाबला स्यात् सुधियां स्वतन्त्रता ।।

(७)

न पारतन्त्र्यं खलु तद्धि दुःसहम्
यतः स्वदेशे परदेश्यशासनम् ।
न संस्कृतौ स्यात् पतनं न लाघवम्
स्वशासने काम्यतरा स्वतन्त्रता ।।

(८)

वयं प्रमादेन भयेन येन वा
मतेषु भेदेन हितेन येन च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरा विपत्तौ पतिताः पराजिताः
पुनर्न स्यात् तेन हृता स्वतन्त्रता ॥

(९)

महात्मभिर्यैः पुरुषैः सहिष्णुभिः
भृशं सहित्वा विकटार्तियातनाः ।
असाधि या तच्चरिताऽनुपालनात्
सुरक्षणीया खलु सा स्वतन्त्रता ॥

(१०)

वयं सुनीतौ मिलिताः परस्परं
भवेम राष्ट्रस्य तथैव नायकाः ।
भवेयुरुत्थानव्रते च संगताः
स्थिरा भवेद् भारत-भूस्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० बालकृष्णशर्मा
शासकीय-संस्कृत-महाविद्यालयः ग्वालियरनगरम्, मध्यप्रदेशः

(१)

गन्तन्नदीनां सलिलं सुगन्धितं
तथा समीरस्य गता पवित्रता ।
अनाविलम्मानवजीवनङ्गतं
यदा स्वतन्त्राधिगता स्वतन्त्रता ॥

(२)

गतञ्चरित्रञ्जगतः सुनिर्मलं
तथा गतं वेदमतावगाहनम् ।
गतं समस्तञ्च विधानजालकं
यदागतेयं विधुरा स्वतन्त्रता ॥

(३)

गता स्वदेशस्य विचारशेमुषी
मनुष्यता मानवशेवधिर्गता ।
समुज्ज्वला देवगिरा तथा गता
यदागता भेदकरी स्वतन्त्रता ॥

(४)

गता गुरूणाम्पदवी गरीयसी
महीयसी जन्मधरारतिर्गता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसुन्धरारत्नविभा तथा गता
यदाविला साधिगता स्वतन्त्रता ॥

(५)

प्रजादरो यत्र न दृश्यतेऽथवा
स्वदेशरागोऽपि न चावलोक्यते ।

न वा स्वभाषाव्यवहारदर्शनं
कथन्न जाने खलु सा स्वतन्त्रता ॥

(६)

न दृश्यते यत्र कलासमादरस्-
तथा न दृश्यास्ति पुराणभावना ।
नवीनचिन्ताजनितोहपूरिता
सखे ! न जाने यदसौ स्वतन्त्रता ॥

(७)

न यत्र कर्तव्यविवेकभावना
न राष्ट्रसेवापरितोषवासना ।
न चापि लोकेऽस्ति मिथस्समीपता
सखे ! किलेयं विकृता स्वन्तत्रता ॥

(८)

न यत्र शान्तिः परिपूर्णसूचिका
न वा विकासस्य लवोऽपि दृश्यते ।
निरन्तरं सा मृदिता समन्ततो
न किं सखे ! सङ्कुचिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

न पूज्यपूजा न च मान्यमानना
न देशभक्तिश्च भृशङ्गरीयसी ।
न चानुरागः स समाजयोजकः
सखे ! नु यस्यान्नहि सा स्वतन्त्रता ॥

(१०)

न यत्र साहित्यकलासभाजनं
न चार्षविज्ञानविभावनम्पुनः ।
न दिव्यविद्याविभवप्रकाशनं
किलेदृशी सास्ति मृषा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ पं. सूर्यनारायणशास्त्री
२१ शाहपुराबाग-आमेर-मार्गः, जयपुरम्,
राजस्थानप्रदेशः

(१)

समेऽपि लोका विधिना नियन्त्रिताः
स्वकर्मनद्धा ननु सर्वलोकपाः
अनेहसाऽऽयान्ति च यान्ति मृत्यवे
इहास्ति कस्यापि किमु स्वतन्त्रता ॥

(२)

मनोवशीकृत्य विहाय वासनाः
विमुक्तसंगा मुनयोऽत्र सुव्रताः
भजन्ति विश्वं किल ये ह्यनारतम्
शुभाय तेषां हि सदा स्वतन्त्रता ॥

(३)

चरन्ति येषां विषयेषु गोगणाः
असंयताज्ञानवृताः प्रमाथिनः ।
स्वदेहगेहाद्यभिमानशालिनाम्
शुभं न तेषां जनयेत् स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

स्वदेशभक्तैर्बलिदानलम्भिता ।
स्वतंत्रता याऽद्यमरोर्मरीचिका
जनैरनाचारपरैः सुसेविता
कथं हि सा स्यात्सफला स्वतन्त्रता ॥

(५)

स्वतन्त्रतायाः परिणाम एष नः
विलोक्यते हा जनतन्त्रशासने ।
विनाशदोऽभूज्जननेतृदूषितः
प्रशस्यतेऽथापि जनैः स्वतन्त्रता ॥

(६)

हितं न शृण्वन्ति परस्य दाम्भिकाः
विनाशकाले किल ये कुबुद्धयः ।
परस्परं घ्नन्ति वने वृका इव
तेषां कथं स्यात् सुफला स्वतन्त्रता ॥

(७)

विशुद्धसत्वा जनता सदाशया
भवेत्सदाचारपरायणा यदा ।
मिथोऽनुरागप्रवणा च सर्वदा
जगद्धिता यैव तदा स्वतन्त्रता ॥

(८)

मुधार्थलुब्धाः कवयः प्रियंवदाः
अनन्तकूटव्यवहारतत्पराः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परार्थचौरा जननायका यदि
भवेन्नु भद्राय कथं स्वतन्त्रता ॥

(९)

ब्रह्मणः प्रतिबिम्बस्य मिथ्याभूतस्य चात्मनः
कुहकावृतरूपस्य जीवस्य का स्वतंत्रता ॥

(१०)

जगदाधार भूतस्य जगद्रूपस्य ब्रह्मणः
अखण्डानन्दरूपस्य केवलेह स्वतंत्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डा. उमारमणझा, प्राचार्यः,
केन्द्रीय-संस्कृत-विद्यापीठम्, विशालखण्डः-४,
गोमतीनगरं लखनऊ-२२६०१०, उत्तरप्रदेशः

(१)

धनं हिरण्यं प्रचुरं हि भारते,
समागता लब्धुमतीव लोलुपाः ।
छलञ्च चक्रुः परदेशवासिन-
स्तदा गता हन्त निजा "स्वतन्त्रता" ॥

(२)

यदाऽभवद्बन्धुविरोधभावना,
विदेशनीतौ हृदि रागबन्धनम् ।
जिता वयं हा सबलैश्च दुष्टै-
र्हता स्वदेशस्य भुवि "स्वतन्त्रता" ॥

(३)

अयुध्यतैकः सबलेन शत्रुणा
जहास चोच्चैः नृपतिस्तदापरः ।
ददौ यदा शत्रुसहायतां पुन-
स्तदा विलुप्ता सहसा "स्वतन्त्रता" ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

विकेन्द्रिता भारतशक्तिसंघता
कुनीतिमार्गेण पराजिता वयम् ।
तदा हता हन्त नराः सहस्रशः
हताऽस्मदीया सहसा "स्वतन्त्रता" ॥

(५)

यदाऽभवन् कामपरायणा नृपाः
न राष्ट्ररक्षां शुशुचुर्विलासिनः ।
स्वसत्तया दर्पबलेन मोहिता-
स्तदा विनष्टा क्रमशः स्वतन्त्रता ॥

(६)

मतैक्यहीनानवलोक्य भूपतीन्
छलेन गौराङ्गजनाश्च लोलुपान् ।
वशीप्रचक्रुः क्रमशो नरान् वरान्
तदा विनष्टा भुवने स्वतन्त्रता ॥

(७)

विलोक्य दीनां धरणीं मनस्विनो
यदानुरक्ताः सुजना विमुक्तये ।
पटेल-गान्धिप्रमुखादिनेतृभि-
र्व्यधायि देशस्य तदा स्वतन्त्रता ॥

(८)

सुभाष-राजेन्द्र-खुदी-पटेलकाः
प्रसह्य दुःखं विषमं सुदारुणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरोधमार्गे सुदृढा नरा यदा
तदागता क्लेशहरी स्वतन्त्रता ॥

(९)

कठोरघातैर्बहुदण्डदण्डिताः
स्थिताश्च कारागृह एव कष्टतः ।
यदा विरोद्धुं स्वमतिं प्रचक्रिरे
तदागता राष्ट्र इह स्वतन्त्रता ॥

(१०)

यदा गताश्चांग्लजनाः विहाय नः
स्वराष्ट्रसञ्चालनकार्यमागतम् ।
निशम्य नादं जयघोषपूर्वकं
ध्रुवं सुलब्धा भुवने स्वतन्त्रता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० जी० एस्० आर्० कृष्णमूर्तिः
वरिष्ठव्याख्याता
केन्द्रीय-संस्कृत-विद्यापीठम्
विशाल खण्डः-४, गोमतीनगरं, लखनऊ-२२६०१०

(१)

पुरांऽऽग्लशासनस्य भूरिदुष्टतां विशृङ्खलाम्
निरोद्धुमेव भारतीयसेनया निरस्त्रया।
अहिंसया सुचेतसा च नित्यसत्यनिष्ठया
महात्मगान्धिनार्जिता स्वभारते स्वतन्त्रता॥

(२)

सुभाष-लोकमान्य-गान्धि-देशबन्धु-मेधया
सुमङ्गला[१] न्ध्ररामराज-[२]-चन्द्रशेखरासुभिः।
सदङ्गनाभिरर्पितैस्सुबालकैस्समर्पितैः
स्वजीवनैस्स्वमातृभूमिरर्जिता स्वतन्त्रता॥

(३)

सुकेसरैर्विभूषितं स्वभारतस्य मस्तकम्
सुरक्षितुं स्वमस्तकं सुरक्तसिक्तमञ्जसा।

१. सुमङ्गलः = मङ्गल पाण्डेयः
२. आन्ध्ररामराजः = अल्लूरि सीताराम राजु॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वमातृभूमिगौरवाय संततं ददामहे
तदर्थमस्ति नस्सदा स्वभावजा स्वतन्त्रता ॥

(४)

सदाऽबला, जरातुरास्सुबालका, ज्वरातुराः
कुमार्गगामि-चोरभीति-वञ्चनैर्विशङ्किता ।
नरे नरेऽमनीषिता पदे पदे सुजन्तुता
प्रचण्डताण्डवे रता कुतो नु मे स्वतन्त्रता ?

(५)

सुसार्षपे तिलोद्भवे नु दुर्विषादिमिश्रणम्
मया विलोक्य भक्षितं सुदुर्विषं सुमिश्रितम् ।
विषस्य मिश्रितस्य तस्य भक्षणैर्मृतिर्न मे
स्वतन्त्रभारते कदा कुतो नु मे स्वतन्त्रता ? ॥

(६)

सदाश्रयास्सुभोजिनो नु सुष्ठुवस्त्रधारिणो
निरामया दयामयास्त्रयीमया[१] श्श्रयामहे ।
हिमाद्रिसेतुसीमितं स्वभारतं भजामहे
सदाऽस्तु मे मुदाऽन्विता स्वभारत स्वतन्त्रता ॥

(७)

सुशिक्षितास्सुधीवराः ! स्वमातरं विहाय नो
विदेशिनां दुराश्रयं तु नैव चाप्नुत प्रजाः ।
स्वदेशसेवया विना शिवार्चनं न विद्यते
भवद्भुजैस्सुरक्षिताऽस्तु भारतस्वतन्त्रता ॥

---

१. त्रयीमयाः = वेदमयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

ऋणं विदेशतः कदाऽपि नैव चाददामहे
धनं स्वदेश एव नो नियोजयाम भूयसा।
सुशिक्षितां सुदक्षतां प्रदर्शयाम संततम्
नवीनभारतं सदा सृजाम नस्स्वतन्त्रता॥

(९)

निराशया न जीव्यतां दुराशया न भाव्यताम्
सदाशया महाशया भवन्तु सोदरा मम।
भवद्भिरेव विश्वमद्य दीपनीयमद्भुतम्
यतोऽर्थ-नीति-मोक्ष-धीषु वस्सदा स्वतन्त्रता॥

(१०)

अहिंसया प्रभूयतां सहिष्णुताऽनुपाल्यताम्
विलासिता सुहीयतां सशस्त्रता समेधताम्।
जगत्प्रभावमण्डले ह्यणुप्रशस्त्रभञ्जनैः
स्वभारतं प्रशस्यतां विराजतां स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ श्रीसन्तोषकुमारपाण्डे

स्नातकोत्तरसंस्कृतविभागः षष्ठवर्षः, क्रमांकः

राँची विश्वविद्यालयः, राँची बि

(१)

भवेन्न कुत्रापि विरोधभावना
द्वेषादिकं नश्यतु दीर्घभारतात् ।
ये भारते ते न च सन्तु पीडिता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(२)

समानभावेन युताश्च मानवा
भवन्तु सर्वे सुखिनो निरामयाः ।
बन्धुत्वभावस्य भवेत् प्रधानता ।
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(३)

सर्वे जनाः सन्ति यतो हि मानवा
न पीडनं क्वापि न हिंसनं भवेत् ।
मनुष्यधर्मे किल सन्तु दीक्षिता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

भवेन्न देशे किल जातिवादिता
देशान्न नश्येत् विदिता मनुष्यता ।
देशोपकाराय विभातु वीरता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(५)

अन्नं विना सन्तु न कालताडिता
जलं विना नात्र जनाः पिपासिताः ।
वस्त्रं विना क्वापि भवेन्न नग्नता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(६)

निरक्षराः क्वापि न सन्तु भारते
प्रवञ्चका स्वार्थरताः प्रपीडिताः ।
सामान्यमन्त्रेण जना नियन्त्रिता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(७)

कादर्यहीना हि भवन्तु मानवा
न तेषु दैन्यं न पलायनं भवेत् ।
शिक्षाफले स्यात् प्रथिता विनम्रता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(८)

स्वतन्त्रदेशे न च बन्धनं क्वचित्
विचारदाने धनधर्मरक्षणे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकोपकाराय भवेन्मनुष्यता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(९)

धर्मेण युक्तं धनमर्जितं भवेत्
कल्याणकार्ये च धनस्य योजनम् ।
योगस्य यात्रा खलु कर्मप्रेरिता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

(१०)

सम्मानिता स्याद् यदि कार्यसंस्कृतिः
नष्टा भविष्यन्ति तदा दरिद्रताः ।
भूमण्डले चास्य विभातु शिष्टता
ब्रूते स्वदेशे मुदिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. रामाशीषपाण्डेयः
आचार्योऽध्यक्षश्च-संस्कृत-विभागस्य
मारवाड़ी महाविद्यालय, राँची (बिहारः)

(१)

यैः स्वतन्त्र-संगरे समर्जिता समानता
राष्ट्रभावनाबलेन शत्रवः पराजिताः।
तैरिहाद्य जातिवादता कथं प्रचारिता
तथ्यमातनोति भारतस्थिता स्वतन्त्रता॥

(२)

या समानता तदा गृहे गृहे समागता
द्वेषभावना तथा विभिन्नता विनिर्गता।
साऽद्य नास्ति दृश्यते वसुन्धरा व्यथान्विता
तथ्यमातनोति भारतस्थिता स्वतन्त्रता॥

(३)

द्वेषभावनं विना समस्त मानवैर्यदा
मुक्तये ममैव राष्ट्रभावना समर्जिता।
एकताबलस्य सातिबद्धता कथं गता
साम्प्रतं ब्रवीति दुःखिता भृशं स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

या स्वतन्त्रमालिका वृता मदीयपुत्रकैः
सा धृता कथं न तैः प्रतीयते विखण्डिता।
क्षुद्रलाभहेतवे स्वनीचता प्रदर्शिता
भारतस्थिता ब्रवीति पीडिता स्वतन्त्रता॥

(५)

मुक्तभारते कथं प्रवर्द्धते दरिद्रता
भोजनं न लभ्यते समन्ततोऽस्ति नग्नता।
जातिवादताऽऽगता गता समग्रबन्धुता
तथ्यमातनोति भारतस्थिता स्वतन्त्रता॥

(६)

राजनीतिधारकैः प्रवञ्चिताश्च मानवा
ध्वंसकर्मसंयुता विभेदनीतिरागता।
उग्रवादता विवर्द्धते प्रदेशवादता
साम्प्रतं ब्रवीति पीडिता भृशं स्वतन्त्रता॥

(७)

लोकलाभहेतवे प्रकल्पितं धनादिकं
मूषिकैरिवाद्य शासकैश्छलेन भक्षितम्।
दीनता विवर्द्धते समानता विनिर्गता
तथ्यमातनोति भारतस्थिता स्वतन्त्रता॥

(८)

द्रौपदी सभागृहे निरादृताऽथ जायते
वस्त्रवर्द्धनाय माधवः क्वचिन्न दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्त्रकर्षणे मदान्विता सदान्धकात्मजाः
साम्प्रतं ब्रवीति दुःखिता भृशं स्वतन्त्रता ॥

(९)

बालकाय शिक्षणं निरक्षराय चाक्षरं
भोजनं बुभुक्षिताय नग्नकाय वस्त्रकम् ।
दीयते यदा तदा सुखाप्तये हि मुक्तता
साम्प्रतं ब्रवीति भारतस्थिता स्वतन्त्रता ॥

(१०)

कार्यसंस्कृतिर्भवेदिहाद्य सर्वपूजिता
साम्यभावनाबलान्विता सदा मनुष्यता ।
भिन्नता प्रयातु नश्यतु ध्रुवं दरिद्रता
साम्प्रतं ब्रवीति भारतस्थिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

गङ्गाधरद्विवेदी
निदेशकः प्राच्यशोधसंस्थानम् ३३ सरस्वतीपीठम्
सीतारामबाजारः ब्रह्मपुरी, जयपुरम्-२ राजस्थानम्

(१)

पुरातनं भारतराष्ट्रगौरवं
यथा यथा सौष्ठवशालि संभवेत्।
तथा तथाऽस्मत्प्रतिभाप्रकर्षत-
श्चिराय भूयात् सुखदा स्वतन्त्रता ॥

(२)

परम्पराऽऽयातु विवेकशालिनी
नवोदयोल्लासविशेषभास्वरा।
यथोत्तरं स्याज्जनता समादृता
मनस्विलोकप्रवणा स्वतन्त्रता ॥

(३)

परस्परस्नेहसुसिक्तमानसा
लोकोपकाराय सदैव तत्परा।
ईर्ष्यादिदोषोत्थविकारवर्जिता
स्वदेशभूत्यै भवतात् स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

कालप्रभावादिव राष्ट्र गौरवं
विस्मारितं हन्त ! जनैः पुराभवम् ।
संस्कारसौहित्यविधानयत्नतः
समर्पितान्ताःकरणा स्वतन्त्रता ॥

(५)

या मानवाचारविचारपद्धतिः
प्रवर्तिता शिष्टजनानुमोदिता ।
सा गर्हिता दूषणसंकुलाभवत्
तामुद्धरेल्लोकहिता स्वतन्त्रता ॥

(६)

वैदेशिकैः शासनसूत्रधारकैः
समन्ततः स्वार्थपराभियोजनैः ।
स्वातन्त्र्यभावाभिभवैः तिरस्कृता-
नुद्धर्तुकामा भविता स्वतन्त्रता ॥

(७)

स्वातन्त्र्यसंघर्षविधानवेदिभि-
र्या बालगङ्गाधरगान्धिकौशलैः ।
स्वदेशभक्तिप्रथितात्मपौरुषै-
रासादिता भ्रातरियं स्वतन्त्रता ॥

(८)

स्वदेशसेवाव्रतभावभासिताः
नानाभिधानैर्विदितात्मबन्धवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषां समायोजितभाषणैरहो
फलायिताऽभूद् बहुधा स्वतन्त्रता ॥

(९)

स्वराज्यलाभोत्सुकलोकमण्डलं
विषण्णभावाकुलितं निरन्तरम् ।
अतोऽद्य संभूय समन्वयादृते
फलोन्मुखी नैव भवेत् स्वतन्त्रता ॥

(१०)

हा ! हन्त ! भ्रष्टाचरणैः समन्ततः
स्वार्थान्धलोकच्छलना निमज्जिता ।
यायात् यथा शान्ति पथाधिरूढतां
प्रशंसिता चास्तु तथा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० अशोककुमारडबरालः

प्रवक्ता

संस्कृत-जयहिन्द-उ. मा. महाविद्यालयः

चरथावलः, मुजफ्फरनगरम्, उत्तरप्रदेशः

(१)

सुवीरमातुस्तनयाश्च जित्वरा,
मदीयभक्ताः सकला दृढव्रताः ।
तपस्विनो वीरपुरोगमा ध्रुवम्, -
ननन्द चालोक्य शुभा स्वतन्त्रता ॥

(२)

अनेकजैत्राः सुभटाः परन्तपाः,
संतप्तकाः शत्रुविशारणव्रताः ।
स्वदेशभक्ताश्च दिवङ्गता रणे,
चिखेद दृष्ट्वा सरला स्वतन्त्रता ।

(३)

स्वतन्त्रताप्ता प्रविदारणे मृतैः,
स्वदेशभक्तैः खलु जीवने न या ।
प्रमापणात् शत्रुदलस्य हेलया,
चिरस्य दत्ता ननु सा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

सहस्रसंख्यैर्बलिभिर्महात्मभिः,
सुमातृभक्तैर्जनसेवकैर्नतैः ।
सुभारतीयैर्जननीसुतैर्बलात् ।
सुरक्षिता रक्षतु नः स्वतन्त्रता ।।

(५)

इयं सदानन्दकरी शुभङ्करी,
शिवङ्करी सर्वजनेश्वरी सती ।
प्रियङ्करी सौख्यकरी च सुन्दरी,
विराजतां मे हृदये स्वतन्त्रता ।।

(६)

सुरक्षिता सैन्यदलैर्बलान्वितैः,
समादृता देशनिवासिभिर्जनैः ।
स्वराष्ट्रभक्तैः समुपासिता च या,
विराजतां सा हृदये स्वतन्त्रता ।।

(७)

मृतेषु जैत्रेषु हि सांपरायिके,
वरैश्च हीनेषु जगत्सु सत्सु सा ।
स्वयंवरा वीरवराय सोत्सुका,
कुमारिकाद्यापि दृढा स्वतन्त्रता ।।

(८)

मनोहरा या परिकल्पना कवे-
र्मनुष्यसन्मानसवापिहंसिका ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियंवदा स्वैरगतिश्च गौरिका,
न लभ्यते जन्मनि सा स्वतन्त्रता ॥

(९)

चतुर्मुखः पृच्छति चन्द्रशेखरं,
चर्तुर्भुजं पृच्छति सोऽपि सादरम् ।
स्वतन्त्रता काऽस्ति ? सखे ! ब्रवीतु मां,
"मया न दृष्टा कतमा स्वतन्त्रता ॥"

(१०)

स्वतन्त्रतायाः परिरक्षणेऽक्षमाः,
शठाश्च स्वार्थे निरताः प्रमादिनः ।
भवन्त्यहो भारतवर्षमानुषाः,
पुनः स्वतन्त्रा, गमने स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

आचार्यः गिरिजाशङ्करमिश्रः
कैथीटोला, बिसवाँ सीतापुरम्, उत्तरप्रदेशः

(१)

गता न नेत्राम्बुझरी तव क्षयं
तथा न दृष्टा वदने स्मितद्युतिः ।
स्वराष्ट्र ! यावन्नव-मुक्ति-मौक्तिक-
प्रदा न लब्धा भवता स्वतन्त्रता ॥

(२)

स्वदेश-मुक्ति-व्रत-बद्ध-मानसै—
रधिग्रहीता निजदेहनिष्क्रियैः ।
जनस्य सर्वोन्नति-बीज-रूपिणी
परात्परा प्राप्तिरियं स्वतन्त्रता ॥

(३)

यथा प्रकाशो नयनद्वयस्य नु
यथानिलः फुस्फुसयोः कृते मतः ।
अपेक्षिताऽऽस्ते खलु राष्ट्रजीवने
तथाऽनिवार्या महती स्वतन्त्रता ।

(४)

वृथैव तद्राष्ट्रकृता महोन्नतिः
वृथाऽधिसंख्यं जनशक्तिरेधिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृथा तदीया नृपनीतिरप्यसौ
यदङ्कलग्ना न भवेत्स्वतन्त्रता ॥

(५)

अयेऽधुना जाग्रत देशवासिन-
स्तथा कुरुध्वं निजदेश-चिन्तनम्।
न येन भूयोऽपि भवेत्तपस्विनी
विपद्-वृताऽऽस्माकमियं स्वतन्त्रता ॥

(६)

पतेच्च द्यौः शोषमुपैतु चाम्बुधि-
श्चलेद् गिरिः खण्डमयी भवेद् धरा।
न कम्पनीया भुवि किन्तु विद्यते
सुरक्षिता स्वीयसुतैः स्वतन्त्रता ॥

(७)

ममत्व ! कान्ता-सुत-गेह-सम्पदां
प्रयाहि दूरं हृदयात् नमोऽस्तुते।
न मेऽवकाशोऽस्ति भवत्कृतेऽधुना
ममास्ति सेव्या जनिभू-स्वतन्त्रता ॥

(८)

अशेष-देश-वासि-हत-चकोर-चारु-चन्द्रिका
स्फुरद्-विकास-कीर्तिमान-लज्जितामर-व्रजा।
दिगन्त-चुम्बि-गौरवा विखण्डितारि-साहसा
जगद्धिताय जायतामियं प्रिया स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

अतिप्रियं भवत्कृते किमस्ति वस्तु ? भोः सुराः !
पुरेदमेव पृष्टवान् नभःसदः चतुर्मुखः ।
विमृश्य तारक-स्वरेण ते सुरास्तमब्रुवन्
स्वतन्त्रता स्वतन्त्रता स्वतन्त्रता स्वतन्त्रता ॥

(१०)

मेषायन्ते जना देशे, तृणायन्ते च सम्पदः ।
विकासाश्चावरुध्यन्ते, न चेद्देशे स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ गिरिजा-प्रसाद-गिरीश:
(१९१३ लड़ी वालों की गली सौथली वालों का रास्ता)
सत्यनारायणमन्दिरस्य समक्षं जयपुरम् (राजस्थानम्)

(पञ्चचामरवृत्तम्)

(१)

अनेक-कोटि-भारती-सुपुत्र-शौर्य्य-मण्डिते
हिमाद्रि-तुङ्ग-शृङ्गतः समुद्र-मेखलायिते ॥
यदा स्वतन्त्रता-मखः प्रवर्तितोऽस्ति भारते
तदा वराह-दंष्ट्रगा समागता "स्वतन्त्रता" ॥

(२)

अनेक-हृत्स्फुरत्प्रचण्ड-चण्ड-वह्नि- चाण्डिले
समुज्ज्वलत्कराल-हव्यवाह-मध्य-मण्डले ॥
वपुः प्रसूनवर्षणैश्च शोणिताज्य-तर्पणै-
रनिन्द्य-यूप-शीर्षगा समर्चिता "स्वतन्त्रता" ॥

(३)

रणाय वीर-वल्लभा धवान् समर्प्य जीववत्-
समुज्झितश्रियोऽपि ता अवापुरद्भुतश्रियम् ॥
अकज्जला अमण्डना सुता दृशा विलोकितुम् ।
सवत्सला प्रसूः स्वयं समागता "स्वतन्त्रता ।" ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

अमर्षरोषदीपितश्च शीतलो हिमालयः
स्फुलिङ्ग-कोटि-दीपनैश्च दीपिताः सुदिङ्मुखाः ॥
प्रचण्ड-काल-सर्पणैः प्रभञ्जन-प्रकम्पनै-
र्वृता गजेन्द्र-शीर्षगा समागता "स्वतन्त्रता ॥

(५)

न चन्द्रमा न शर्वरी कुहूर्न चैव तारका
दिनेऽपि नो दिवस्पतिर्नगा अगाः खगाः सुभाः ॥
मिथोऽपि नैषु शत्रुता न धृष्टता न मोषणम्
तथा निरापदा भवेद् यशस्विनी "स्वतन्त्रता" ॥

(६)

(अनुष्टुब् वृत्तम्)

स्ववशा तन्तुवत् स्निग्धा त्रयी भाव-समन्विता
सदा तारुण्यभावाढ्या लोके भाति "स्वतन्त्रता" ॥

(७)

समायाते वधूराज्ये
श्वश्रूराज्यं तिरोहितम् ।
मोदतेऽहर्निशं चाऽत्र
सर्वतन्त्रा "स्वतन्त्रता ॥

(८)

(न-र-जगैर्भवेन्मनोरमा)

(मनोरमा वृत्तम्)

नयन-गर्भगा कनीनिका
प्रियतमा मनोनिवासिनी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रितयमत्र दृश्यते समम्
निरुपमा मनः "स्वतन्त्रता" ॥ ७ ॥

(९)

(वंशस्थ वृत्तम्)

शिवस्त्वपर्णामहितो हिमालये
तथाम्बुधौ विष्णुरुपास्यते श्रिया ॥
प्रियानुबद्धौ वसतो हरीश्वरा
वनन्यपूर्वा श्वशुर-स्वतन्त्रता ॥ ९ ॥

(१०)

(अनुष्टुब् वृत्तम्)

स्वर्णास्यः स्वर्णदृक् स्वर्ण-श्रोत्रः स्वर्णमयो नरः
मूकान्ध-बधिराज्ञाय, किन्नु देया ? स्वतन्त्रता ।

(यथा च लिखितं श्रुतौ "हिरण्यमयेन पात्रेण स्यत्यसापिहितं मुखं" वस्तुतो स्वर्णं धनं वा सर्वपापमूलम् । आधुनिको नरो स्वर्णं गृहीत्वा मूको भवति, दृष्ट्वा च लोचनैरन्धस्त द्वार्तां च श्रुत्वा बधिरोऽन्ते चाज्ञो मनुष्यो वा भवतीति दिक् ।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. कृष्णचन्द्रचतुर्वेदी
उपाचार्यः
केन्द्रीय-संस्कृत-विद्यापीठम् बी. ८९ गणेशमार्गबापूनगरम् जयपुरं
(राजस्थानम्) ३० २०१५

(१)

मुक्त्यध्वरे मातृभुवः समर्प्य वै
स्वकीयसर्वस्वमहो प्रियामपि ।
आहूय प्राणान् नरपुङ्गवैरियं
कष्टेन लब्धा महता स्वतन्त्रता ॥

(२)

धृत्वा हसद्भिर्निजमातृमुक्तये
पाशं यथा हारमहो स्वयं गले ।
स्वदेशभक्तैः कतिभिर्न वेद्म्यहं
कष्टेन लब्धा कियता स्वतन्त्रता ॥

(३)

मुधैव हिंसानिरतान्निरङ्कुशान्
विना गुरुण्डानपसार्य हेतिभिः ।
यैरर्पिताऽस्मभ्यमियं क्षणं हृदा
तान् वन्दनीयान् स्मरति स्वतन्त्रतात ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

प्रियाँश्च प्राणादपि मातृभिः सुतान्
भ्रातृन् सखे ! स्वान् भगिनीभिरादरात् ।
समर्प्य सौभाग्यमहो वधूजनैः
समर्पिताऽस्मभ्यमियं स्वतन्त्रता ॥

(५)

स्तुवन्तु प्रीत्या प्रणमन्तु सादरं
हृदाऽभिनन्दन्तु धियास्मरन्त्वपि ।
तान् वीरवर्यांश्चिरतः प्रतीक्षिता
यैरर्पिताऽस्मभ्यमियं स्वतन्त्रता ॥

(६)

नयन्ति मेरेयमदेन सद्मनि
स्थिताः प्रमत्ताः सह सुन्दरीजनैः ।
यत्र स्वकालं ननु देशनायकाः
सखे ! किमेषैव स्वतन्त्रता ॥

(७)

संप्राप्य शिक्षामपि भिक्षवो यथा
वृत्यै प्रतिद्वारमटन्ति चाकुलाः ।
देशे युवानो यदि यत्र तत्र वै
मान्या भवेदेव कथं वद स्वतन्त्रता ॥

(८)

हेतोः कणस्यापि सहक्षुधाकुला
डिम्भाः श्वभिश्चेद्रचयन्त्यहोरणम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मत्ता रमातोऽथ पिबन्ति पायसं
सखे ! किमेषैव वद स्वतन्त्रता ॥

(९)

भ्रष्टाश्च ये सन्ति निजेन कर्मणा
त एव शिष्टा ननु नीतिरीदृशी ।
मान्या भवेच्चेच्च तिरस्कृता बुधा
यत्रस्यु रेषा कतमा स्वतन्त्रता ॥

(१०)

मनुष्यमुण्डैः कुटिला विनिर्भयं
क्रीडन्ति यत्र प्रतिचत्वरं दिवा ।
पश्यन्ति मूका इव निर्वशा भटाः
सखे ! वदैषा कतमा स्वतन्त्रता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. मिथिलाप्रसादत्रिपाठी

५७-अ वैशालीनगरम्, इन्दौरम् मध्यप्रदेशः ९

(१)

पठन्ति सर्वतः स्वदेश संस्कृतिं न बालकाः
पठन्ति चापि हीनवृत्तिदूषिता भवन्त्यलम्।
न शासकीय-वृत्तिषु स्वराष्ट्रवाणिनिष्ठता
प्रचार्यते न पाल्यतेऽत्र कीदृशी स्वतन्त्रता॥

(२)

न हिन्दवः सुरक्षिता न संहता न निष्ठिताः
विभाजिताश्च वर्गजातिधर्मतो भयाकुलाः॥
विभज्य नैव रक्षिता दलानुभाववत्सलैः
कथं भवेद्धि भारते सुरक्षिता स्वतन्त्रता॥

(३)

स्वसंस्कृतेः समर्चका मठाधिपा भुवस्तले
स्वसम्प्रदाय-पोषका विभाजिता अटन्त्यहो !
धनापकर्षणे रताश्च धर्मशोषका वृथा
कथं भवेद्धि भारते सुरक्षिता स्वतन्त्रता॥

(४)

प्रदर्शयन्ति भाषणेषु धर्मपीनतां सदा
विलासयन्ति भोगपण्डिताः प्रवर्तनेऽनिशम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा हि राष्ट्रबोधका भवन्ति नो मठास्तदा
कथं भवेद्धि भारते सुरक्षिता स्वतन्त्रता ॥

(५)

यतेर्व्रतं कषायितं कषायवस्त्रसंपुटे
सरस्वती-व्रतानुगाश्च राजनीतिनिर्भराः ।
अपूज्य पूज्यताऽस्ति पूज्यपूजनं बहिर्गतम्
प्रतिष्ठिताऽस्ति चाटुता भवेत्कथं स्वतन्त्रता ॥

(६)

सदाऽर्यमार्गलङ्घने निरङ्कुशा दृढव्रताः
समाजशोषकाश्च नेतृवर्गवन्दिता मुहुः ।
न राष्ट्रभावबोधनं न चास्ति राष्ट्रचिन्तनं
कथं भवेच्च भारते सुरक्षिता स्वतंत्रता ॥

(७)

विदेशपोषिताः सुरक्षिता न राष्ट्रधर्मिणः
सदाऽल्पसंख्यकाः प्रभूतसङ्ख्यतां प्रयान्त्यलम् ।
प्रभूतसङ्ख्यकाः प्रयान्ति चाल्पतां दिने दिने
कथं भवेत्तु भारते सुरक्षिता स्वतन्त्रता ॥

(८)

शिशुर्युवाऽप्यथाङ्ग्लपाठशिक्षणे समर्पितो
न भारतस्य सज्जनाः पठन्ति संस्कृतां गिरम् ।
सरस्वतीनिकेतनेषु चाङ्ग्लपद्धतिस्तता
कथं सुरक्षिता भवेच्च भारते स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

न भारतीय-वृत्तिरक्षणं विधीयते क्वचिद्
न भारतीयचिन्तनं समाहतञ्च नेतृभिः ।
न भारतीयभाषया प्रवर्तनं प्रचार्यते
कथं भवेच्च भारते सुरक्षिता स्वतन्त्रता ।

(१०)

न वर्तनेन बोधनेन संस्कृतेश्च पालनम्
न पाठनेन वृत्तिभिश्च संस्कृतेस्तु रक्षणम् ।
न कर्मणाऽनुपालनं स्वधर्मजाध्वनः सदा
कथं भवेद्धि भारते सुरक्षिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ आचार्यो नारायणदत्तपाण्डेयः (व्याकरणाचार्यः)
शक्तिपुरम्, पत्रालयः- दुग्धपोखरा (चम्पावतम्)
जनपदः-चम्पावतम् उत्तरप्रदेशः-२६२५२३

(१)

मनस्विभिर्ह्यात्मतया समर्थिता,
विचारकैः सत्यतया समीक्षिता ।
विवेकिभिः स्पष्टतयाऽनुमोदिता,
समादृता नागरिकैः स्वतन्त्रता ॥

(२)

नितान्त दुःखा ननु दीनदुर्बला,
यदाप्तितस्ते सुविहाय दुःस्थितम् ।
सुखायमाना विचरन्ति निर्भयाः
इतीदृशी सा शुभदा स्वतन्त्रता ॥

(३)

स्वतन्त्रता केवलमेकमेव वै
जनस्य सम्यक् चरितं निगद्यते ।
सुरक्षणं सर्वजनैर्विधीयताम्,
छविर्हि देशस्य मता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३)

स्वतन्त्रता केवलमेकमेव वै
जनस्य सम्यक् चरितं निगद्यते ।
सुरक्षणं सर्वजनैर्विधीयताम्,
छविर्हि देशस्य मता स्वतन्त्रता ॥

(४)

धनं प्रशस्तं विपुलः कलाचयः
प्रसाधनं पूर्णतया विराजितम् ।
असूनृते देह इवासते समे,
विना हि यां, साभिमता स्वतन्त्रता ॥

(५)

निरस्यतां कुत्सितलोभधारणा,
सुधीयतां सद्‌गुणशालिनी कृतिः
विधीयतां कर्म विविच्य मेधया,
सुरक्ष्यतां हस्तगता स्वतन्त्रता ॥

(६)

किमस्ति सौख्यं नरलोकमध्यगम्
समैः सदाचारपरैर्विचार्यताम् ।
स्वधर्मबुद्ध्या परिपाल्यतां तथा,
यथा नु सा पोषयति स्वतन्त्रता ॥

(७)

वितन्यतेऽस्या रमणीयरूपकं
स्वकीयदेहाः सुखमुज्झिता हि यैः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विहाय सर्वं स्वजनादिकञ्च तैः
प्रत्याहता देशहिते स्वतन्त्रता ॥

(८)

परस्परं भेदविधा निरस्यतां,
प्रदीयमानस्तु सदैव दीयताम् ।
मनोवचस्कायकृतिः समीयताम्,
विलोक्यतां सच्छवियुक् स्वतन्त्रता ॥

(९)

वचः प्रमाणीक्रियतां सदा हितम्,
समीक्ष्य कार्यं क्रियताञ्च मङ्गलम् ।
हृदा च सत्कारविधिः प्रयुज्यताम्
इत्यादिशन्ती किल सा स्वतन्त्रता ॥

(१०)

नृलोकवास्तव्यजनैः स्वतन्त्रताऽ-
धिकारकर्तव्यपरैः प्रवर्द्धयतां ।
यतो हि सा विश्वजनीनकारिणी,
मता, तदा पूर्णतमा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ गोपबन्धुमिश्रः
एच. डी. जैनमहाविद्यालयः धारा-८०२३०१ बिहारः

(१)

मनीषिणां मनः कन्या पूर्वजैर्बहुकल्पिता।
कल्पवृक्ष इवाऽऽभाति संकल्पजा स्वतन्त्रता॥

(२)

कारावासो गृहत्यागो मित्रता शत्रुताऽथवा।
यस्याः कृते तृणैस्तुल्या आसन् सैव स्वतन्त्रता॥

(३)

ग्रामीणा नागराश्चैव मिलित्वोचुः समादरात्।
'वन्दे मातर' मित्येवं यद्धेतोः सा स्वतन्त्रता॥

(४)

क्व गतं दैहिकं सौख्यं परिवार सुखं च किम्?
बहुभिर्नैव विज्ञातं यत्पणात् सा स्वतन्त्रता॥

(५)

छागा इव यदा सिंहा दृष्टाः कैश्चिद् विदेशिभिः।
तान् मृगेन्द्रान् समुद्धर्तुं समायाता स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

'स्व'शक्ति परिचिन्वद्भिः सुभाष-तिलकादिभिः ।
संहुतात्मप्रयासेन समानीता स्वतन्त्रता ॥

(७)

स्वर्गतुल्यं भुवः खण्डं परैस्तु नरके गतम् ।
एतत् पावयितुं सम्यग् गङ्गेवाऽऽप्ता स्वतन्त्रता ॥

(८)

मातुः स्वायत्तसम्मानः सन्तानसुखसाधकः ।
अतोऽस्मत्सुखसंधाननिमित्तेयं स्वतन्त्रता ॥

(९)

जीवन्ती जीवयत्येषा हितायैव प्रवर्तते ।
स्वाभिमानैः प्रतिप्राणं पूर्तिकामा स्वतन्त्रता ॥

(१०)

या जननीव संरक्ष्या धनैरपि सुखैरपि ।
यस्याः कृते समर्प्याः स्युः प्राणाः साऽस्ति स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाजपेयिसंभृता समेधते स्वतन्त्रता

■ सत्यनारायणशास्त्री
४१-शास्त्रिसदनं, शिवपुरी हाथीमाटा अजमेरः, राजस्थान प्रदेशः

(१)

क्रान्तिकारिसत्प्रयाससंभवाऽभिवन्दिता,
गान्धिना प्रसारिताऽनु नेहरूप्रभाविता।
बोधघोषिता, पटेलपोषिताऽभिनन्दिता,
वाजपेयिसंभृता विजृम्भते स्वतन्त्रता॥

(२)

काकलीकलस्वनेषु गुञ्जति स्वतन्त्रता,
किं न वल्लकीरुते निशम्यते स्वतन्त्रता।
माध्यमाधवीप्रसूनसौरभी स्रवद्रसाऽऽ
स्वाद्यते सदा मरन्दवर्षिणी स्वतन्त्रता॥

(३)

वारिवाहचङ्क्रमेषु गर्जति स्वतन्त्रता,
किं न विद्युदर्चिषि प्रकाशते स्वतन्त्रता?
भार्गवप्रपातमध्यगाऽस्ति नः स्वतन्त्रता,
प्रत्यणु प्रतिक्षणं महीयते स्वतन्त्रता॥

(४)

भारती मनोरमाऽप्यलङ्कृतेव नृत्यति,
नव्ययौवना विलासिनीव मोदवर्धिनी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते गृहे गृहे, पदे पदेऽन्तरङ्गता,
हन्त ! हेलया हलाऽऽलि ! खेलति स्वतन्त्रता ॥

(५)

आशुगोऽपि शीफरोऽति राति शाश्वतं शमं,
ज्योत्स्नयाऽमृतांशुरैषु सौधशं किरत्यलम् ।
शर्वरीव तारकाचमत्कृतं चलाञ्चलं,
चैलमादधत्यलं चकास्ति नः स्वतन्त्रता ॥

(६)

निम्नगा मुदाऽवहन्विविक्ततोयसंभृता,
प्रारभन्त नर्तनं नगाः प्रमत्तमानसाः ।
पल्लवादिरोमराजिराजिताऽभवल्लता,
भारते यदोदिता जयन्त्यलं स्वतन्त्रता ॥

(७)

फुल्लतां गतं मनः प्रहृष्टतावशंवदं,
वापुषं त्वपाकरोन्महाधिमप्यरुन्तुदम् ।
तोषमावहन्नरा मिथोऽधिकण्ठमाश्रिता,
वीक्षिता सुवर्णरुग्जयन्त्यलं स्वतन्त्रता ॥

(८)

शाद्वला, सुशस्यसंकुलाऽजनि त्वरा धरा,
संस्रवज्झरालिझंकृता व्यभुर्धराधराः ।
केकिनः शुकः पिका ननृतुरद्य निर्भया,
भारते यदाऽविशत्समुद्हदा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

किन्त्विमां चिरं प्रतीक्षयोपतस्थुषीं जनाः ।
सत्प्रसादमाप्नुवन्निभाल्य देवतामिव ।
श्रद्धया सभाजिता जनैरियं तपस्विनी,
सा चिराय जीवतादधिक्षमं स्वतन्त्रता ॥

(१०)

भिन्नवर्णसंस्कृतिप्रसूतचित्रवाससा,
संवृता प्रयासलब्धभार्गवीव शोभना ।
स्वप्रजाप्रमादने समर्पितस्वजीवना,
चारुमातृकानिभा सुरक्ष्यतां स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० बनमाली विश्वाल:
वरिष्ठप्रवक्ता
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर-आजाद-पार्क: इलाहाबाद: उत्तरप्रदेश:

(१)

कदा सुतप्तैः किरणैः प्रपीडिताः
कदा पुनर्भूस्खलनेन ताडिताः ।
कदा प्रवातेन कदा च, वन्यया
बत ! प्रकृत्या विहता स्वतन्त्रता ।।

(२)

"स्त्रियोऽस्वतन्त्रा" स्त्वनृतं मनोर्वचः
स्वयंसमर्थाः ह्यबला न दुर्बलाः ।
पदे पदे चेदसुरक्षिताः स्त्रियः
किमद्य नार्याः सफला स्वतन्त्रता ? ?

(३)

वयं हि पाश्चात्यपरम्पराप्रियाः
स्वसंस्कृतेर्विस्मरणे कृतोद्यमाः ।
लघूकृतं हा ! वसनं विदेशिवत्
क्व नग्नचेष्टा भवति स्वतन्त्रता ? ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

गृहं विधातुं नगरे न चेत् प्रभुः
समाश्रयेयं खलु भाटकं गृहम् ।
गृहे न विद्युत् सुलभं न चेज्जलम्
परस्य गेहे ननु का स्वतन्त्रता ? ?

(५)

स्वकार्यसिद्ध्यै प्रणमन्ति दुर्जनान्
विदन्ति मिथ्या न विरोधसाधुतां ।
प्रवञ्चिताः सत्यवचांसि भाषितुं
न चेद् विदन्त्यत्र कुतः स्वतन्त्रता ? ?

(६)

दिवाप्रकाशेऽत्र धरातले स्त्रियः
समाजकीटैस्तु भवन्ति धर्षिताः ।
हरन्ति मार्गेऽपि धनानि तस्कराः
बलाद्धि मुष्टौ दलिता स्वतन्त्रता ॥

(७)

असह्यदुःखे हसिते ह्यनिच्छया
भयेन सेवाविहिताधिकारिणः ।
परस्य लाभाय कृता त्वपक्रिया
किमत्र व्यर्थाऽधिगता स्वतन्त्रता ॥

(८)

मतं स्वकीयं परबुद्धिचिन्तितं
धनं स्वकीयं परतन्त्रचालितम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनः स्वकीयं परचित्तचोरितं
क्वचित् स्वतन्त्रताऽस्ति बत ! स्वतन्त्रता ॥

(९)

यथा तथा श्लोककथाविलेखनैः
पदे पदेऽश्लीलमनोविचेष्टनैः ।
पदस्य चाश्लीलमयस्य गायनैः
विवर्द्धतेऽश्लीलमयी स्वतन्त्रता ॥

(१०)

गृहे तु पत्नी मुखरा कुशासिका
कुसङ्गदोषात्तनयः प्रगल्भवाक् ।
यदि स्वकन्या युवती च पुंश्चली
किमस्ति गेहेऽपि मनाक् स्वतन्त्रता ? ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ माधवजनार्दनरटाटे
के. २२/४७ दुर्गाघट्टः वाराणसी, उत्तरप्रदेशः

(१)

गान्धीसुभाषादिसुराष्ट्रनायकैः
स्वजीवनं न्यस्य पणेऽप्यतिप्रियम्।
स्वार्थं परित्यज्य समर्जिता मुदा
सा रक्षणीया नितरां स्वतन्त्रता॥

(२)

ईशीयमौहम्मदहिन्दुधर्मजं
भेदं परित्यज्य च जातिसम्भवम्।
स्वक्षेत्रभाषादि विभेदमन्यथा
कृत्वैव लब्धैकतया स्वतन्त्रता॥

(३)

तस्मात् स्वजात्यादिविभेदमन्यथा
कृत्वेह राष्ट्रस्य समुन्नतौ वयम्।
कुर्याम यत्नं परया हि निष्ठया
तदा भवेत् सा सफला स्वतन्त्रता॥

(४)

फिरङ्गितो दैशिकमुक्तिवद् यदि
तेषां प्रभावाच्च भवेत् स्वतन्त्रता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्ववेषभाषादि भवेन्न तैः सदृक्
तदा भवेत् सा सफला स्वतन्त्रता ॥

(५)

वैदेशिकोत्सृष्टकुचक्रतो ध्रुवं
विभेदकं कर्तृभिरेव सन्ततम् ।
अशान्तिकारैश्चतथोग्रवादिभिः
सा रक्षणीया नितरां स्वतन्त्रता ॥

(६)

राष्ट्रोन्नतिं नित्यमहं यथाबलं
करिष्य इत्येष भवेद्धि निश्चयः ।
उत्कोचलोभादि विहाय यत्नतस्तदा
भवेत् सा सफला स्वतन्त्रता ॥

(७)

स्वप्नो हि स्वातन्त्र्यसमर्जकैः पुरा
यो देशभक्तैर्जनतैक्यसंयुतः ।
अदर्शि अस्यैव सुपूरणं भवेत्
तदास्ति साफल्यमयी स्वतन्त्रता ॥

(८)

विद्यार्थिनः सत्यपराः सुशिक्षिता
लोभादिहीना अनुकारवर्जिताः ।
राष्ट्रस्य कल्याणविमर्शका यदि
रक्ष्या तदा भारतभूस्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

आनृण्यमस्त्वेव विदेशतस्तथा
निरक्षरत्वं जनवृद्ध्यजीविका ।
समाप्तिमायान्तु प्रदूषणञ्च चे-
न्निरन्तरा सौख्यमयी स्वतन्त्रता ॥

(१०)

उन्मूल्य राष्ट्रस्य रिपूनशेषतः
सम्मान्यसद्राष्ट्रहितैषिणस्तथा ।
सर्वैर्हि देशस्य निवासिभिः सदा
रक्ष्या यथा स्वं प्रयतैः स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

आचार्यः डॉ. सहदेवकृष्णचतुर्वेदी
९६६ गतश्रम-टीला-मथुरा उत्तरप्रदेशः

(१)

नरोऽस्वतन्त्रो निजदेशमध्यगः,
तथा धरित्री वसुधा विलासिनी ।
कथं करिष्यन्ति जनाः सुरक्षणं,
विचिन्तयामास पुरा स्वतन्त्रता ॥

(२)

विचिन्त्य झाँसीनृपतेश्च मानिनी,
करोम्यहं प्राणपणेन पावनीम् ।
धरां विमुक्तां रणभेरिवादिनी,
समागता शैशवगा स्वतन्त्रता ॥

(३)

अनेक भूमण्डलभूपपीडिता,
प्रजाजनानां कलुषेन दुःखिता ।
महात्मगान्धेर्वचनैश्च संस्तुता,
समागता भारतगा स्वतन्त्रता ॥

(४)

स्वराज्यमेवास्ति ममाधिकारकः,
अत्राह गंगाधरनामबालकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र प्रसन्नाननधारिणी भृशं,
बभूव तुष्टाश्च पुनः स्वतन्त्रता ॥

(५)

सुभाष बोसोऽत्र यदा समागतः
उवाच रक्तं निजकं प्रदीयताम् ।
ततो विवर्णा परतन्त्रताऽभवत्,
बभूव सद्यो मुदिता स्वतन्त्रता ॥

(६)

ततः समारभ्य गृहे गृहे जने,
निजार्पणं चक्रुरहो सुमानवाः ।
शहीदकैश्चात्मसमर्पणेन वै,
प्रिया कृतासीदिह वै स्वतन्त्रता ॥

(७)

न चाङ्ग्लशिक्षानिजलाभदायिनी,
न यन्मतिर्भारतमानवर्द्धिनी ।
अतः पटेलैर्नेहरूजवाहरैः
सुदर्शिता भारतगा स्वतन्त्रता ।

(८)

अनेक हिन्दूयवनैः सुपूजिता,
सुसिक्खधर्मानुगतैः प्रपूजिता ।
"जियो तथा जीवन दो" ध्वनिर्युता,
विराजते भारतगा स्वतंत्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

जयन्ति यस्यास्ति सुवर्णलालिता,
अनेक विज्ञानप्रकाशनात्मिका।
स्व-बोधसंज्ञापनकौशलात्मिका,
विवर्धते भारतगा स्वतन्त्रता॥

(१०)

न चात्र कश्चिन्महिमाऽभिमण्डितः,
न चाऽबला कापि न वा दरिद्रता।
समान विद्या-गुण-कर्म-धारिका,
समा समेषामिह वै स्वतन्त्रता॥

(११)

पठन्तु शास्त्राणि वदन्तु ग्रन्थकान्,
रामे रतिः स्यादथवा रहीमके।
जिनेषु बौद्धेषु नमाज़कर्मणि,
विराजते सर्वगता स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ गोपालसिंहः

प्रधानाचार्यः, सेठ-लक्ष्मी-नारायण-संस्कृत-विद्यालयः

प्रेम-सरोवर-बरसाना-मथुरा, उ. प्रदेशः

(१)

नमांसि तस्यै करवाणि सन्ततम्,
समं जगद्यामुपलब्धुमीहते ।
वदामि सा का ? यदि बोद्धुमुत्सुकः
स्वनामधन्या प्रथिता स्वतन्त्रता ॥

(२)

प्रभातकाले विपिनाय बन्धनं
विहाय वत्सञ्च पयस्विनी व्रजेत् ।
न तन्निमित्तं नवशष्पमात्रकम्,
प्रधान हेतुं भजते स्वतन्त्रता ॥

(३)

शुकोस्ति बद्धो यदि हेमपञ्जरे,
नृपस्य सौधे प्रभुनक्ति गोस्तनीम् ।
स्मृतिर्यदा चेतसि तस्य जायते,
वनस्य तेन ध्रियते स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

कृतिर्विचित्रा जगतो मुरारिणा,
परं विचित्रं रचितं पुनर्मनः ।
विभिन्न रूपेषु मनस्सु यैकका,
तदेकरूपा कथिता स्वतन्त्रता ।।

(५)

समस्तजीवेषु च जन्मतः स्थिता,
तदस्ति का त्वं वद मे स्वनिश्चयम् ।
वदन्ति सर्वे मुनयो यदुत्तरम्,
अवेहि तां सा महती स्वतन्त्रता ।।

(६)

महात्मना मोहनचन्द्रगान्धिना,
स्वमातृभूमिं परतन्त्रतायुताम् ।
विलोक्य यस्यै सकलं समर्पितं,
विलोकिता सा सुभगा स्वतन्त्रता ।।

(७)

सुभाष गङ्गाधरलोकमान्यकै-
र्बल प्रयोगं प्रविधाय जम्बुकात् ।
यथा स्वभागो हि मृगाधिपेन
लब्धस्तथाप्ता ब्रिटिशात्स्वतन्त्रता ।।

(८)

मुखं यथा विस्तृतमस्ति
सौरसन्तथोग्रवादेन सहाद्य दुष्टता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवानिशं वृद्धिपथं व्रजेत्तदा,
कथञ्चिरं स्थास्यति नः स्वतन्त्रता ॥

(९)

यथा स्वपापेन विहिंस्यते खलः,
तथोग्रवादः शममेतु हे प्रभो ।
सुदीन्दुवच्चानुदिनं समेधता-
मखण्डतामेतु तथा स्वतन्त्रता ॥

(१०)

गुणैर्विहीनो न गुणी कदापि स्या-
द्यथा रविन्नोत्यजतीह तत्प्रभा ।
अखण्ड भावम्पुनरेतु भारत-
न्त्यजेन्न नः सौख्यकरी स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० रामदेवसाहू
सहायक आचार्यः
दादू-महाविद्यालयः, जयपुरम् उत्तरप्रदेशः

(१)

निहन्तुमस्त्रं निशितं च दासतां,
यया प्रजानां समवेतकामना।
सुरक्ष्यते साऽद्य दलप्रवातैः,
हा हा हता हन्त युगे स्वतन्त्रता॥

(२)

न पूर्णशिक्षा जनतासु दृश्यते,
क्रमक्रमात्साक्षारताप्रचारणात्।
क्व वाऽस्ति दायित्वमिहाद्य देशे
सुनेतृणां, हन्त हता स्वतन्त्रता॥

(३)

समाजतन्त्रे जटिले नृणामहो,
कुतः स्वतन्त्रता जनताविचारणा।
प्रचारसंसाधनमाध्यमं यदा,
विचारहीनं नु हता स्वन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

विभाजनाद्राजनयेन कारिता-
दुतार्थबाधापरिवेशपेषणात् ।
स्वतन्त्रभागेषु विभाजितं जगत्,
ततोऽपि नैराश्यगता स्वतन्त्रता ॥

(५)

क्व साम्प्रतं विश्वजनेषु वर्तते,
समात्मताभावितविश्वबन्धुता ।
न जायते चेदिह विश्वसंस्कृति-
स्तदाऽवमूल्यातिगता स्वतन्त्रता ॥

(६)

समेषु क्षेत्रेष्विह भेदभावना,
च राजनीतावपि नीतिपालनम् ।
निरर्थगाम्भीर्ययुता यथार्थता,
ह्यकिञ्चना साऽद्य भुवि स्वतन्त्रता ॥

(७)

विमुक्तता स्यादिह बाह्यशासनैः,
समूहसंव्यूहकदम्यतादिभिः ।
मतिः स्थिरा वै विधिमान्यतासु च,
तदैव देशे भविता स्वतन्त्रता ॥

(८)

निजोन्नतौ स्यात्सकले च देहिनः,
सदा स्वतन्त्रताः पथि बाध्यता च न ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनर्भवेत्, सार्वजनीनता यदा,
व्यवस्थिता वै भविता स्वतन्त्रता ॥

(९)

सर्वत्र चेन्मानवता दृढा स्या-
ददेशकालोपहिता च शान्तिः ।
दृशश्चिराभ्यस्तदरप्रणाशे,
रतास्तदा वै भविता स्वतन्त्रता ॥

(१०)

सुसभ्यतायाः प्रथमे युगेऽस्मिन्,
जगद् भवेच्चेदविभक्तरूपम् ।
समेषु राष्ट्रेषु सुरक्षिता तदा,
विकासमार्गेऽग्रगता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चकास्ति राष्ट्रे वरदा स्वतन्त्रता

■ रामेश्वरदत्तशर्मा
३ विकासनगरं, भिवानी उत्तरप्रदेशः

(१)

अनेकवर्षैः परतन्त्रयन्त्रणां,
विदेशिराज्याश्रितदुष्टमन्त्रणाम्।
विनाश्य लब्धा बलिदानकारिभिः,
चकास्ति राष्ट्रेऽधिगता स्वतन्त्रता ॥

(२)

अदम्यवीरा बलिदानमार्गिणः,
स्वतन्त्रताप्त्यै च गतासवोऽभवन्।
तदीयदीप्तोज्ज्वलकर्मपाविता,
विभाति राष्ट्रे महसा स्वतन्त्रता ॥

(३)

असह्य पीडां परिसह्य निर्भयाः,
चुचम्बुरेते समुदं हि शृङ्खलाम्।
अवापुरेते यमपाशमुन्मुखाः,
न देहदानं हि विना स्वतन्त्रता ॥

(४)

ययाद्य जाता जगतीह सत्कृतिः,
मनस्विता चापि यशस्विता परा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यया‍द्य सर्वत्र सुखं च गौरवम्,
सुशोभते नो वरदा स्वतन्त्रता ॥

(५)

सशक्तसेना कृषकाः कृषौ रताः,
स्वकीयवृत्तौ श्रमजीविनोऽपि वा ।
यस्याः प्रभावेण जगच्च जागृतं
चकास्ति देशे सुखदा स्वतन्त्रता ॥

(६)

अणवस्त्रसम्पन्नबलान्विता वयम्,
अपारसम्पद्-धन-धान्य-साधनाः ।
महोच्च-भावाः परमोच्च-वैभवाः,
विशालदेशे बलदा स्वतन्त्रता ॥

(७)

यदस्मदीया छविरस्ति भास्वरा,
शिरोऽस्ति तुङ्गं हिमवच्च भारते ।
नमन्ति लोकाः परिदृश्य संस्कृतिं,
सुसभ्यरूपा ननु सा स्वतन्त्रता ॥

(८)

न जाति-भेदो न च वर्गभिन्नता,
न लिङ्ग-भेदो न हि पक्षपातिता ।
समानवृत्तिः, समधर्मभावना,
समन्वयार्था शिवदा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेकतायां वसतीह चैकता:—

(९)

अनेक भाषाकुलधर्मधारिणः,
अनल्पवेशाश्रितरूपभूषितान्।
विभिन्नवर्णाश्रमवासिमानुषान्,
अहो ! सुबध्नाति सदा स्वतन्त्रता ॥

(१०)

समग्रनिष्ठा कुरुलोकजागृतिं
कवीश ! दीव्यात् तव काव्यधर्मिता।
त्वयैव नेयाऽतुलतुङ्गमस्तके,
महार्हमूल्याप्तवरा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रतादशकमुक्तकम्

■ विपिनकुमारझा
३७०४ चर्खेवालानम्,
चावड़ी-बाजार-दिल्ली—११०००६

(१)

सुदीर्घकालादियमाङ्ग्लशासकै-
रजस्रमुत्पीडितभग्नमानसा
विखण्डनार्थं खलु शृंखलां खला-
मितस्ततो दग्धदृशा स्वतन्त्रता ॥

(२)

बलात्प्रदत्तां दयनीयतां दशां
प्रदर्शयन्तीयमवाचिशासकैः ।
उवाच भीता हरिणीव पाशिनोऽ
बला सुरक्ष्याऽहमिति स्वतन्त्रता ॥

(३)

समुद्यतानां निजतन्त्रताऽप्तये
प्रकोपवह्निज्वलितां चतुर्दिशम् ।
सुदीप्तदावाग्निमिवाऽतिभीषण-
मवेक्ष्य लब्धा मुदतां स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

भुजङ्गचन्द्राऽप्ततिथावगस्तजे
तुरङ्गतुर्यग्रहसूर्यहायने ।
घृतावलिप्तेव सुदीपदीप्तिता
समागता सान्ध्यवधूः स्वतन्त्रता ॥

(५)

गता धरेयं निजतन्त्रतान्त्रिकैः
सुशासिता स्वर्णजयन्तिवर्षताम् ।
तथापि नाऽद्यापि यथार्थपूर्णता-
मवेक्ष्य रुग्णा मनसा स्वतन्त्रता ॥

(६)

अथापि विज्ञानविकासरक्षिता
विभिन्नसंसाधनवृद्धिमागता ।
तथापि सामाजिकबन्धनादियं
दृढं विबद्धाऽप्यधुना स्वतन्त्रता ॥

(७)

खलैश्च कैश्चिज्जनतन्त्रवञ्चकैः
प्रमादपुण्यैरधितृप्तचेतसा ।
विहन्यमानेति निजार्थसिद्धये
प्रमत्तकान्तेव हता स्वतन्त्रता ॥

(८)

वृथा निशायां रजनीशवल्लभा
वने वृथाऽभाति वनाधिपप्रिया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परञ्च सर्वत्र विना विरोधितां
विभाति भूताधिकृता स्वतन्त्रता ॥

(९)

तनोति चित्तं हरतीति भीरुतां
ददाति ऋद्धिं भयमेति दूरताम् ।
जनप्रिया कल्पलतेव तेजसा
दधाति किं किं न सदा स्वतन्त्रता ॥

(१०)

परप्रियत्वं कथमाश्रयस्यहो !
अवेहि भीरो ! मनसा यथार्थताम् ।
सुखं हि याति परतन्त्रवृत्तितः
परं प्रसूते सुफलं स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. मृदुला शर्मा
४१ प्रभातनगर इज्जतनगर बरेली (उत्तरप्रदेश:)

(यदा ग्वालियरदुर्गे झाँसीराज्ञी भुशुण्डी-शतघ्नी-आद्याग्नेयायुधैः परिवारिताऽभूत् तदा तस्या राज्ञा ये स्वतन्त्रतां प्रति उद्गाराः उदपद्यन्त तेऽत्र प्रस्तूयन्ते ।)

(१)

नवा पिकीनां मधुरा सुकाकली
न चन्द्रिका चन्द्रमसोऽपि शीतला ।
न सौरभं पुष्परसो न रोचते
प्ररोचते मे, जननी स्वतन्त्रता ॥

(२)

नृपासनं मां तु दिधक्षति ध्रुवम्
यदाऽहमीक्षे निजमातुरन्दुकान् ।
न वाऽपि धित्सामि च जीवनं क्षणम्
न लभ्यते यावदियं स्वतन्त्रता ॥

(३)

तदाङ्ग्लशत्रुप्रपदप्रधर्षितम्
नृपासनं द्रष्टुमिदं च न क्षयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलेवरे नाभिलषाम्यसून् धृतान्
मयाऽधिगम्या ऽसुप्रिया स्वतन्त्रता ॥

(४)

अथान्तरे चाङ्ग्लचमूप्रभञ्जनः
प्रचण्डरूपागत एव निश्चितम् ।
बुबोध झाँसी तु सपत्नकावृता
सुरक्षिता सम्प्रति नो स्वतन्त्रता ॥

(५)

कटौ निबध्याऽशु शिशुं स्तनन्धयम्
हयं समारुह्य च दुर्गशेखरात् ।
जगर्ज शम्पेव पपात शत्रवे
यतोऽवनीयाऽस्ति तया स्वतन्त्रता ॥

(६)

न जीवनेऽपश्यमहम् स्वभारतम्
स्वतन्त्रमेतत्वनुतापनम् मम ।
असृक्-प्रवाहेण निरागसां परम्
न शक्ष्यते हर्तुमियं स्वतन्त्रता ॥

(७)

अस्त्रैः प्रदिग्धाङ्ग-कलेवरम् निजम्
समार्पयत् सा ज्वलिते चिताऽनले ।
चितानलाद् धूधुधगद् रवेण वै
अधुष्यत द्राग् जननी स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

समध्वरा हव्यवाहने, निज-
प्राणाधिकवल्लभान् सुतान्।
बहुवीरसमाः वराङ्गनाः,
तल्लब्धा स्वभुवः स्वतन्त्रता ॥

(९)

जुहुवुहुः पुरन्यगुः स्वयं
मिलितुम् ताश्च पुनर्दिवालयम्।
इतरेऽपि गताः प्रबोधितुम्
अभवत् मातृभुवः स्वतन्त्रता ॥

(१०)

बलिदानिसुरक्तसिञ्चिता
श्रमिकैः साधुसुपोषिता चिरम्।
सुमिताफलितात्वियम् लता
अवनीया सुतराम् स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

डॉ० केशवप्रसादगुप्तः
आदर्श-महाविद्यालयः-चरवा-कौशाम्बी-२१२२०३ उ. प्रदेशः

(१)

पुरा तु गौराङ्गजनैः प्रशोषितं
विमुक्तभावैः सकलञ्च भारतम् ।
हता हि निर्दोषजना यदा तदा
दधार चित्तेषु पदं स्वतन्त्रता ।।

(२)

प्रताडिता निष्ठुरशासकैः सदा
श्रमे रता भारतदेशवासिनः ।
अचिन्तयन् बुद्धिधना निरन्तरं
भवेत् स्वदेशेऽपि कथं स्वतन्त्रता ? ?

(३)

करे गृहीत्वा सुखशान्तिसूचकं
ध्वजं त्रिवर्णं विजयप्रदायकम् ।
गताश्च शूराः कुशलं रणाङ्गणं
रराज देशे फलतः स्वतन्त्रता ।।

(४)

कृतः प्रयत्नः स्वजनैः समन्ततो
विहाय सौख्यं सुविधाञ्च सर्वदा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुगङ्गधारेव समागता तदा
विशालदेशे महती स्वतन्त्रता ॥

(५)

सुभाष-बाबूसदृशैर्विचारकैः
प्रतिष्ठितैश्शेखरतुल्यसैनिकैः ।
कृतैः प्रयासैः सुकृतैश्च भारते
विराजते मूर्तिमती स्वतन्त्रता ॥

(६)

गताः सखेदं सबलाः प्रशासकाः
हृते यतस्तेजोबले प्रभावतः ।
विचारयन्तो हृदये परस्परं
करोति किं ना भुवने स्वतन्त्रता ? ?

(७)

ददाति प्रीतिं सहजं शुभेच्छया
दधाति नीतिं स्वजनैर्विनिर्मिताम् ।
तनोति नित्यं प्रभुतां समर्जितां
ततश्च कीर्त्तिं सुतरां स्वतन्त्रता ॥

(८)

न बाधते यत्र परस्य वक्रता
न दृश्यते निर्धनवर्गशोषणाम् ।
सुसुप्तभावं सततं सुबोधिनी
सुपूज्यते तत्र सदा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(९)

यदा स्वभावेन धृतं न सत्पथं
शुभञ्च कृत्यं न कृतं प्रमादतः ।
तदा न देशस्य विभाति गौरवं
न शस्यते साधुजनैः स्वतन्त्रता ।।

(१०)

स्वतन्त्रदेशे विकसन्तु मानवाः
सदा सवत्सा निवसन्तु धेनवः ।
करोमि कांक्षां विपुलां जगत्पते !
विभातु लोके सुखदा स्वतन्त्रता ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ 'रसराजः' डॉ. जयदेवजानी

'अरुणोदयः' सी-१, डी सी. एस. पटेल एन्क्लेवः

३, प्रतापगंजः, बड़ोदरा-३९०००२

(१)

स्वतन्त्रता स्वतन्त्रता स्वतन्त्रता स्वतन्त्रता-
ऽथ मानवीयभावना प्रतारिका स्वतन्त्रता ।
पुरातनीयवेदसद्गुणोज्झिता स्वतन्त्रता
वदन्तु का स्वतन्त्रताऽस्ति कीदृशी स्वतन्त्रता ॥

(२)

सुदीर्घतप्तजीवनप्रशामिका स्वतन्त्रताऽ-
थ शान्तजीवजीवनप्रदाहिका स्वतन्त्रता ।
सुखावहा स्वतन्त्रताऽथ दुःखदा स्वतन्त्रता
वदन्तु का स्वतन्त्रता विषादिका स्वतन्त्रता ॥

(३)

महान्धकारगर्तमध्यपातिका स्वतन्त्रता
प्रभाकरप्रभाप्रफुल्लपद्मिका स्वतन्त्रता
नयान्विता स्वतन्त्रताऽथ दुर्णया स्वतन्त्रता
वदन्तु का स्वतन्त्रता प्रमादिका स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

सुबन्धुबन्धुभावनाविभाविका स्वतन्त्रता
सगर्वधर्मकर्मभिर्विभीषिका स्वतन्त्रता ।
गुणोत्करा स्वतन्त्रताऽथ निर्गुणा स्वतन्त्रता
वदन्तु का स्वतन्त्रता भयावहा स्वतन्त्रता ॥

(५)

स्वधर्मतुष्टदेशबान्धवात्मिका स्वतन्त्रता
स्वदेशवेशधर्मकर्मलोपिका स्वतन्त्रता ।
सभक्तिका स्वतन्त्रताऽथ दुर्मदा स्वतन्त्रता
वदन्तु का स्वतन्त्रता मदोद्धता स्वतन्त्रता ॥

(६)

स्वतन्त्रताप्तमुक्तिसुन्दरीपदप्रणामिका
स्वतन्त्रताप्तिमुक्तजीवतर्पणप्रणाशिका ।
कुराजिता स्वतन्त्रताऽथ राजिता स्वतन्त्रता
वदन्तु का स्वतन्त्रता तमोऽन्विता स्वतन्त्रता ॥

(७)

समाजराज्यभाग भेदलोपिका स्वतन्त्रताऽ-
थ संघशक्तिसाम्मनस्यभेदिका स्वतन्त्रता ।
विनाशिका स्वतन्त्रताऽथ लासिका स्वतन्त्रता
वदन्तु का स्वतन्त्रता विभेदिका स्वतन्त्रता ॥

(८)

अशेषजीवसर्वधर्मदीपिका स्वतन्त्रता
वयोधनप्रमाप्रमाणजृम्भिका स्वतन्त्रता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभया स्वतन्त्रताऽथ निर्भया स्वतन्त्रता
वदन्तु का स्वतन्त्रता प्रतारिका स्वतन्त्रता ॥

(९)

समानकर्मवित्तलाभसाधिका स्वतन्त्रता-
ऽथ मानवीयमूलधर्मनाशिका स्वतन्त्रता ।
विषान्विता स्वतन्त्रताऽथ सामृता स्वतन्त्रता
वदन्तु का स्वतन्त्रता विषप्रदा स्वतन्त्रता ॥

(१०)

समान भाव चित्तशान्तिदायिका स्वतन्त्रता
समानधर्मकर्मवर्मनायिका स्वतन्त्रता ।
सुखेन शान्तिसौख्यतुष्टिपुष्टिवृष्टिकारिका
भवेत् सुराष्ट्रकारिका प्रभाविका स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. रामकिशोरमिश्रः
संस्कृत-विभागाध्यक्षः
म. मा. महाविद्यालयः, खेकड़ा—२०११०१
(बागपत) उत्तरप्रदेशः

(१)

यस्य स्वस्मिन् स्वकीयेऽर्थे,
तन्त्रं स्यादनुशासनम् ।
स्वतन्त्रः सोऽत्र, तद्भावः
कथ्यते सा स्वतन्त्रता ॥

(२)

यो जनो निर्भयं वक्ति,
प्रियमप्रियमादि वा ।
स्वातन्त्र्यं वचने यस्य,
कथ्यते सा स्वतन्त्रता ॥

(३)

स्वदेशे गमने यस्य
बाधा क्वापि न विद्यते ।
निर्भयं ह्यटनं यस्य,
कथ्यते सा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

परम्परागतं कर्म
परित्यज्य निजेच्छया।
अन्यत्करोति यः कर्म,
कथ्यते सा स्वतन्त्रता॥

(५)

धनस्योपार्जने यस्य
विद्यायाश्च समागमे।
भवेत्क्वापि विरोधो न,
कथ्यते सा स्वतन्त्रता॥

(६)

अत्र जात्यां विजात्यां वा
यस्य स्वेच्छापरिणये।
नहि क्वापि भवेद् रोधः,
कथ्यते सा स्वतन्त्रता॥

(७)

योऽत्र देशे विदेशेषु
स्वधर्म-परिवर्तनम्।
स्वेच्छया कुरुते तस्य
कथ्यते सा स्वतन्त्रता॥

(८)

आहारे व्यवहारे च
परिवारे तथाऽऽपणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वेच्छयाऽऽचरणं यस्य,
कथ्यते सा स्वतन्त्रता ॥

(९)

मन्दिरे मस्जिदे वाऽत्र
गिरिजा-गुरुद्वारयोः ।
पूजने यस्य बाधा न,
कथ्यते सा स्वतन्त्रता ॥

(१०)

भक्त्यां कस्याऽपि देवस्य
प्रार्थने वाऽर्चने तथा ।
बाधा काऽपि न यस्याऽग्रे,
कथ्यते सा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ श्रीकिशोरीरमणझा
सान्निध्यं—डॉ० उमारमणझा
प्राचार्य: केन्द्रीयसंस्कृतविद्यापीठम् विशालखण्ड:,
गोमतीनगरं लखनऊ पिन-२२६०१० उ. प्र.

(१)

किशोरीरमणेनात्र दशपद्यैर्विलिख्यते।
समस्यापूर्तिरूपेण कथं लब्धा स्वतन्त्रता॥

(२)

आंग्लेया भारतं प्राप्य छलनीतिपुरस्सरम्।
यदा च चक्रुर्मिथो भेदं गतास्माकं स्वतन्त्रता॥

(३)

परस्परं यदा भूपा द्वेषभावं प्रचक्रिरे।
तदा दुष्टजनैर्नूनं हृतास्माकं स्वतन्त्रता॥

(४)

नृपा लिप्ता विलासेषु न चक्रुर्ये प्रतिक्रियाम्।
तदा नूनं हृतास्माकं गौराङ्गैस्तु स्वतन्त्रता॥

(५)

गौराङ्गा भारतं व्याप्य वशीकृत्य दुरात्मनः।
यदा चक्रुर्वशे लोकान् गतास्माकं स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

दुर्बुद्ध्याकपटैर्धूर्तैः गौराङ्गैः राज्यवर्धनम्।
यदा कृतं तदाऽस्माकं हृता देशे स्वतन्त्रता ॥

(७)

आक्रोशो भारतीयानां पुञ्जीभूतो यदाऽभवत्।
तदाऽस्माभिः स्वदेशस्य लब्धा नूनं स्वतन्त्रता ॥

(८)

विवशा भारतीयास्तु सेहिरे घोरसंङ्कटम्।
तदा चिन्ताऽभवत्तेषां कथं स्यान्नः स्वतन्त्रता ॥

(९)

देशस्य दुर्दशां दृष्ट्वा क्रान्तिरेका यदाऽभवत्।
तदा लब्धातिकष्टेन राष्ट्रस्यास्य स्वतन्त्रता ॥

(१०)

चक्रुः राष्ट्रस्य नेतारो मिलित्वा घोरविप्लवम्।
गतास्त्यक्त्वा विदेशीयास्तदा लब्धा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ रामस्वरूपदोतोलिया
प्रधानाध्यापकः,
राजकीय-प्रवेशिका-संस्कृत-विद्यालयः,
सालासर, ज़िला-चुरु, राजस्थानप्रदेशः

(भवतामन्त्रिता श्लोकाः प्रेष्यन्ते दश संख्यकाः ।
कामयेऽहं भवन्त्वेते, भवद्भ्यो रुचिकारकाः ।।)

(१)

स्वतन्त्रतान्दोलनवीरसैनिकाः
मृताश्चये भारत भूमिरक्षणे ।
नुमस्समान् सत्पुरुषान् मनस्विनः
यदीयशौर्यस्य फलं स्वतन्त्रता ।।

(२)

स्वमातृभूम्यै बलिदानभावना
स्वतन्त्रतान्दोलनकालचेतना ।
न दृश्यते त्यागसुभावनाधुना
स्थिरत्वचिन्तापतिता स्वतन्त्रता ।।

(३)

जनातिसंख्या सुरसामुखंयथा,
विवर्द्धिताऽनन्ततया महार्घता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिने दिने गच्छति सच्चरित्रता,
विलोक्य हा उच्छ्वसति स्वतन्त्रता ॥

(४)

स्वदेशतो हा क्व गता पवित्रता
प्रशासने नित्यमिहास्त्यनित्यता ।
विदेशयात्रामकरोत् विवेकता,
विलोक्य हा उच्छ्वसति स्वतन्त्रता ॥

(५)

स्वपूर्वजातिवीरता, महापराक्रमार्जिता,
स्वराज्यसौख्यदाचाया, स्वजीवनाधिका प्रिया ।
विना स्वदेशभावनां, विनानुशासनं सदा,
कदा स्थिराभवेदियं, स्वराष्ट्रिया स्वतन्त्रता ॥

(६)

यदि स्वदेशहेतवे, स्वजीवनार्पणं भवेत् ।
स्वजीवनञ्च तर्हि मे, शुभं सुलाभदं भवेत् ।
इयं सुभावना न चेत्, कुजीवनं तदन्यथा,
तदैव नश्च सुस्थिरा, भवेदियं स्वतन्त्रता ॥

(७)

समस्तदेशवासिनां न चैकता भविष्यति,
न धर्मकर्मभावना, सहिष्णुता भविष्यति ।
न देशतो विनश्यतीह, नेतृणां विमूढता,
कदापि सुस्थिरा न नो भविष्यति स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

स्वदेशहेतुजीवनं, जनोपयोगि सर्वदा,
स्वमातृभूमिहेतवे, च मृत्युरस्तु वा कदा।
समैकदेशवासिनः, सुपुष्पितास्तु बंधुता,
विनानया सदिच्छया, कदा स्थिरा स्वतन्त्रता ? ॥

(९)

वयं परस्परं सदाहवेषु चेद्धि निर्बलाः,
पराजयं गताः समे, विदेशिभिर्यदा कदा
धनं हृतं बलं च तैरधीनतामवाप्युत,
विनैकतां सुजागृतिं कदा स्थिरा स्वतन्त्रता ? ॥

(१०)

समानता सहिष्णुता च बन्धुता गृहे गृहे,
स्वदेशभक्तिभावनास्तु बालकेषु भारते।
तथास्मदीयशिक्षका, अपि स्वकर्मतत्पराः
सदा स्थिरा भविष्यति स्वराष्ट्रिया स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्ष्यतां स्वतन्त्रता

■ डॉ० उर्वी
वरिष्ठप्रवक्ता
संस्कृतविभाग:
श्रीवेङ्कटेश्वरमहाविद्यालय: धौला कुआं, नव दिल्ली

(१)

अर्धशत्यामतीतायां दृश्यतां विबुधाः स्वयम्।
बभुक्षापीडिता लोकाः कीदृशीयं स्वतन्त्रता ॥

(२)

कार्यालयेषु सर्वत्र शिक्षालयेषु सर्वथा।
तिरस्कृता स्वभाषास्ति दास्यभाषास्वतन्त्रता ॥

(३)

लोकानां मेलन पूर्वं सम्यगासीन्निरन्तरम्।
आरक्षणेन विद्वेषो वर्धते न स्वतन्त्रता ॥

(४)

भेदान् हित्वा सुबद्धाः स्युः न द्विषेयुः परस्परम्।
विस्मृत्य जातिधर्मांश्च रक्ष्या प्राणैः स्वतन्त्रता ॥

(५)

आतङ्किनोऽखिला धूर्ता मातृभूमिविभेदकाः।
निष्कास्य दण्डनीयास्ते भयहीना स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

श‍ृण्वन्तु विबुधाः सर्वे दृष्टिर्यूनां विकार्यते ।
विचार्यते कथं किञ्चिद् रक्षणीया स्वतन्त्रता ॥

(७)

आज़ादो भक्तसिंहश्च रामप्रसादबिस्मिलः ।
बलिं यस्यै ददुः सर्वे साह्वयति स्वतन्त्रता ॥

(८)

भरतोऽत्र जनिं लेभे रामकृष्णवसुन्धरा ।
वेदर्षिभिश्च या पूता किं सा त्याज्या स्वतन्त्रता ॥

(९)

अनिशं स्मारयेद्वीरान् त्यागमप्रतिमं भुवि ।
त्यागवीर्यगुणैरेव संरक्ष्या सा स्वतन्त्रता ॥

(१०)

सर्वश्रेष्ठगुणस्त्यागो देशे त्यागो महान् स्मृतः ।
धनवैभववीर्याणां त्यागमिच्छेत् स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ० बलवीरदत्तशास्त्री
अध्यक्षः, बैन्दा आयुर्वेदिक फार्मेसी प्रा० लि०
१४९२/१४, फरीदाबाद, हरियाणा प्रदेशः

(१)

या मत्तवीराग्रसराऽसुहापनैः
प्रक्रान्तिकृन्नारिशिरोर्पणैश्च ।
फिरंगिणां शासनतो गृहीता
श्रीगान्धिना सा जयति स्वतन्त्रता ॥

(२)

यां पाशितां भारतभूमिमेतां
रुरोद दृष्ट्वा बटुकेश्वरो, गुरुः ।
श्रीभक्तसिंहः सुखदेव एषां
शरीरपुष्पार्पणजा स्वतन्त्रता ॥

(३)

यया प्रवृद्धा महिलाः सुशिक्षिता
जाताश्च या आत्मसमर्थतायुताः ।
सर्वत्र लब्धाः प्रचुरोन्नतिप्रभा-
सम्मानिता सा जयतु स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

यस्यै सदा प्राणपणैर्मनुष्याः
कृषिं विधास्यन्ति च रक्षणं भुवः।
प्रशिक्षणं चार्तजनस्य सेवां
धनार्जनं सा सफला स्वतन्त्रता॥

(५)

यस्या धरण्याश्चरितस्य शिक्षां
विज्ञानविद्याध्ययनं विधाय।
समन्ततो यान्ति विदेशिलोका-
स्ततः प्रशस्या ननु नः स्वतन्त्रता॥

(६)

यस्या भुवो मातृगणेषु लोकाः
कदा चरिष्यन्ति बलात्कुकृत्यम्।
वह्निप्रदाहं परिवर्जनञ्च
तावद्भवेत्कीदृगियं स्वतन्त्रता॥

(७)

यस्यां सुरा जन्म समाद्रियन्ते
समागताः लुण्ठितुमेव लुण्ठकाः।
तेषां प्रहारैः परिरक्षणीयाः
नास्माभिरेषा किमियं स्वतन्त्रता॥

(८)

हे ईश यावत्प्रभवाम योद्धुं
सर्वात्मनाऽघैः सह सौख्यमाप्तुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरामयाः सन्तु नराः सुवित्तिनो
विधेहि तावन्न सरेत्स्वतन्त्रता ॥

(९)

यदा न लभ्यं घृततैलशाकं
फलादिभक्ष्यं वसुहीननृणाम् ।
हा हा कथं जीवनधारणक्षमा-
स्ते कीदृशीयं गृहिणां स्वतन्त्रता ॥

(१०)

देशो भवेत्स्वर्ग समो न दीनः
नाऽशिक्षितो न व्यथितश्च कोऽपि ।
रुग्णो न काचिन्महिलाऽप्यतुष्टा
न सद्महीना सुखदा स्वतन्त्रता ॥

(११)

विरचिता स्वयमेव मनोहरैः
सुवचनैरिह कारकभूषिता ।
निखिलकर्णयुतैः सुप्रशंसिता
विजयते बलवीरसुतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ संतोषकुमारगर्गः
शास्त्री-प्रथम-वर्षः, प्राच्य-विद्या-प्रतिष्ठानम्,
जोड़ा तालाब मार्गः वरियातूः, राँची-८३४००९

(१)

उत्पद्यमानस्य शरीरधारिणो
विचारसौन्दर्यविवेचनायाः ।
भावादभावो यदि वर्धते पुनर्हता
वयं नाधिगता स्वतन्त्रता ॥

(२)

दधीचिभूमौ परमार्थतायार-
स्थिप्रदानेन प्रदिष्टमार्गः ।
सचर्मस्त्रग्दग्धविवाहबद्धां कन्यां
यदा याति मृता स्वतंत्रता ॥

(३)

स्थूलेन देहेन विवृद्ध कान्त्या
सशक्तबाहुः पुरुषार्थभाक् च ।
आतङ्कवादं तनुते प्रमत्तः
कूलङ्कषा हन्त ! गता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

निजः परोऽयं हि पुराणचर्यां
विस्मृत्य भेदो लघुचेतसा कृतः ।
वसुन्धरादत्तनिसर्गरूपा दूराद्
गता कष्टप्रदा स्वतन्त्रता ॥

(५)

जीवन्तु सर्वे 'शरदः शतात्'
चेद्वेदो यदाकामयते सपत्नम् ।
कथं जनो हन्ति जनं प्रलोभाद्
धनस्य प्राप्ताऽपि हता स्वतन्त्रता ॥

(६)

रीतिं च नीतिं परधर्मनीतिं
विनाश्य राष्ट्रस्य विनाशकस्य ।
संवर्धनेन परितुष्टमानः पूज्यस्त-
दाऽवध्यवधा स्वतन्त्रता ॥

(७)

शास्त्राणि धर्माननुशासनानि
संहत्य पन्था यदि निर्मितश्चेत् ।
दिग्भ्रान्त-दुष्टोत्पथगामिनः कथ
त्यक्ता अदण्डा विवशा स्वतन्त्रता ॥

(८)

देयं भिया वोपनिषत्प्रमाण-
मातङ्कबुद्धेश्च ददाति शिक्षाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं न शिक्षन्त्यधुनोपदेशाश्चङ्क्रम्य-
माणापि धृता स्वतन्त्रता ॥

(९)

बहुश्रुतां भारतदानमान-
प्रकर्षगाथोऽर्द्धशताब्दपूर्वाम् ।
जनाः कथं ज्ञात कथा स्मरन्ति
पश्यन्ति नाद्यार्थगता स्वतन्त्रता ॥

(१०)

किं वच्मि दीन ! रुचिहीन ! विवेकभ्रष्ट !
दुर्दैवभाग् ! विगतप्राण ! विनाशदक्ष !
किं स्वप्नवत्स्वर्गसुखमपेक्ष्यते ?
नूनं सुकर्माधिगमा स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

ब्रजभूषणमिश्र आक्रान्तः
मारुति-संस्कृत-शोध-संस्थानम् प्रकाशपुरी आरा, बिहारः-८०२३०१

(१)

महतां सत्प्रयत्नेन त्यागेन च तपस्यया ।
भारतीयैरियं प्राप्ता सर्वतन्त्रा स्वतन्त्रता ॥

(२)

युवानो यस्य देशस्य युवत्यश्च तथैव याः ।
सर्वं त्यक्तुं समर्था वै साऽऽराध्या च स्वतन्त्रता ॥

(३)

परतन्त्रस्य देशस्य जनानां दयनीयता ।
सह्या न जायते तस्मात् प्राप्यते सा स्वतन्त्रता ॥

(४)

परतन्त्रस्य दुःखस्य वर्णनं कः करिष्यति ?
दुःखं निवारयेत्तस्मात् सेवनीया स्वतन्त्रता ॥

(५)

पुरातनोऽस्ति देशोऽयं प्राचीना चैव संस्कृतिः ।
संस्कृतेश्च सुरक्षायै रक्षणीया स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

न स्वातन्त्र्यं विना कश्चिद् विकासं कर्तुमर्हति।
सर्वाङ्गीणविकासाय समाराध्या स्वतन्त्रता॥

(७)

यस्याञ्च संस्कृतौ भावः सर्वेषां हितकामना।
तस्याश्च रक्षणार्थं वै संरक्ष्या सा स्वतन्त्रता॥

(८)

संस्कृते रक्षिता सम्यग् यस्य देशस्य संस्कृतिः।
संस्कृतस्य च रक्षार्थं कटिबद्धा स्वतन्त्रता॥

(९)

वैज्ञानिकैर्हि देशस्य 'पोखरणे' परीक्षितम्।
तेन संरक्षिता जाता भारतस्य स्वतन्त्रता॥

(१०)

सर्वेषां सुखमानेतुं सर्वेषां स्वास्थ्यहेतवे।
सर्वशक्तिसुसम्पन्ना भारतीया स्वतन्त्रता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ ओम्प्रकाशठाकुरः
डी-७५७ सरस्वतीविहारः दिल्ली ३४

(१)

पारतन्त्र्यमहो कष्टं
विपदामास्पदं पदम् ।
काम्यतेऽतो नरैर्विश्वे
विस्फुरन्ती स्वतन्त्रता ॥

(२)

आच्छिद्य परदेशानां
कमनीयां स्वतन्त्रतां ।
नन्दन्ति ये सुदण्ड्यास्ते
यतो रक्ष्या स्वतन्त्रता ॥

(३)

कुदृष्ट्या योऽवलोकेत
भारतीं मातरं कुधीः ।
स विनाश्यः द्रुतं ब्रूते
भारतीया स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

सर्वसौविध्ययुक्तोऽपि
रक्षितः स्वर्णपञ्जरे ।
कीरः कामयते मुक्तिं
केषां नेष्टा स्वतन्त्रता ॥

(५)

वयं रोहान् श्रिताः विघ्नो
नैव यां कष्टसन्ततिं ।
सीमासु विषहन्ते तां
तैर्धृतेयं स्वतन्त्रता ॥

(६)

वयं वन्दामहे वीरान्
पुण्यभारत भूमिजान् ।
मुदा प्राणार्पणैर्यैस्तु
प्रापितेयं स्वतन्त्रता ॥

(७)

भारतं भा-रतं भूयाद्
विद्या-वैभव-पूजितम् ।
अभिलाषमिमं धत्ते
रमणीया स्वतन्त्रता ॥

(८)

वन्दनीया न केषां ते
जनकल्याणकर्मसु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवानिशं रताः सन्ति
तैर्विभाति स्वतन्त्रता ॥

(९)

प्रेम्णा चैकतया बन्धो !
सुखं शान्त्या समेधते ।
आकृष्टाः श्रिय आयान्ति
रक्ष्यते च स्वतन्त्रता ॥

(१०)

हृदि संधार्य सन्निष्ठां
राष्ट्ररक्षास्वतन्द्रिताः ।
विधत्ते स्वागतं तेषां
स्मयमाना स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वतन्त्रता

■ डॉ. वैद्यनाथमिश्रः
संस्कृतविभागस्थः जगलाल-चौधरी-महाविद्यालयः
छपरा, सारणः (बिहारः) ८४१३०१

(१)

स्वभारतीयचिन्तने विचारिताऽनया धिया ।
स्वयं परात्मना नियंत्रिते सति स्वतन्त्रता ॥

(२)

समं सुखं सुरक्षितं जनस्य यत्र लभ्यते ।
अखण्डविश्वमण्डले बहुश्रुता स्वतन्त्रता ॥

(३)

यदेह लोकतांत्रिकं प्रवर्तितं तु शासनम् ।
तदा दशाऽनिवार्यतः समागता स्वतन्त्रता ॥

(४)

पुरा हि यावनैः पुनः दुराङ्ग्लदेशशासकैः ।
वशीकृतं स्वभारतं, गता च नः स्वतन्त्रता ॥

(५)

प्रताडिताः प्रवञ्चिताः पदे-पदे च लुण्ठिताः ।
वयं हि भारतीसुताः, विखण्डिता स्वतन्त्रता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

प्रबोध्य देशवासिनः स्वदेशभक्तपुत्रकैः ।
सदाग्रहः प्रचालितः यथा भवेत् स्वतन्त्रता ।।

(७)

शिशुः किशोरकन्यकाः नरः स्त्रियो हृदा मुदा ।
ददुः स्वजीवितानि तां सुवीक्षितुं स्वतन्त्रताम् ।।

(८)

स्वराज्यमस्तु सर्वथा, यथा हि रामराज्यकम् ।
प्रकल्प्य भारतेन वै, समर्जिता स्वतन्त्रता ।।

(९)

पराणुशस्त्रनिर्मितौ परीक्षणे च यान्त्रिके ।
क्वचित् कृषौ तथाऽन्यतो विराजते स्वतन्त्रता ।।

(१०)

तथापि हा दरिद्रता महार्घताऽनियोजनम् ।
कुसंस्कृतिश्च शोषणं, तदास्ति किं स्वतन्त्रता ? ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली-संस्कृत-अकादम्याः समाचाराः

नवम्बर (१९९९) तः जनवरी (२०००) पर्यन्तम्

■ डॉ० जीतरामभट्टः

३२. दिल्लीशिक्षानिदेशालयस्य 'पश्चिम अ' मण्डलस्य षड्दिवसीयसंस्कृत प्रतियोगितानामुद्घाटन-समारोहः

दिल्ल्याम् । रमेशनगरस्थ राजकीय-सर्वोदय-कन्या-विद्यालये दिल्ली-शिक्षा-निदेशालयस्य 'पश्चिम अ' मण्डलस्य विद्यालयानां कृते दिल्ली-संस्कृत-अकादमी नवम्बरमासस्य द्वाविंशतितमे दिनाङ्के षड्दिवसीय-संस्कृत-प्रतियोगितानाम् उद्घाटन-समारोहमायोजितवती, समारोहेऽस्मिन् निगमपार्षदाः श्रीमत्यः उषामेहताः, पश्चिम 'अ' मण्डलस्योपशिक्षा निदेशिका श्रीमत्यः मोहिन्द्रमहोदयाः, शिक्षाधिकारिणः श्रीमन्तः आर. पी. राम. महोदयाः, उपशिक्षाधिकारिणः श्रीमत्यः सविताकालराः उपस्थिताः आसन्, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण-सेमवालमहोदयाः अवसरेऽस्मिन् अवदन् यत् 'छात्राणां विकासः प्रतियोगिताभिः भवति, संस्कृतस्य प्रसाराय प्रतियोगितानामायोजनमावश्यकमस्ति । दिल्ली-संस्कृत-अकादमी प्रतिवर्षं विविधासु विधासु छात्राणां कृते संस्कृतप्रतियोगितानामायोजनं करोति, यासु श्लोकोच्चारणप्रतियोगिता, श्लोकसंगीत-एकल श्लोक-संस्कृतभाषण-वाद-विवाद-संस्कृत-काव्यालि-प्रतियोगिताः उल्लेखनीयाः सन्ति ।' प्रधानाचार्या संयोजिका च श्रीमत्यः सुनीता अरोड़ा महोदया सर्वेषां धन्यवादं ज्ञापितवती । कार्यक्रमेऽस्मिन् श्लोकसंगीतस्य प्रतियोगिता आयोजिता, यस्यां, पञ्चदश विद्यालयानां नवति छात्राः सम्मिलिताः सञ्जाता, षड्दिवसीयान्यासु प्रतियोगितास्वप्येवमेव नैके छात्राः सम्मिलिता अभवन् ।

३३. अखिल-भारतीय-नवोदित-संस्कृत-कवि-प्रतियोगिता

दिल्ल्याम् । झण्डेवालानस्थ-अकादम्याः सभास्थले ११-१२-१९९९ दिनाङ्के दिल्ली-संस्कृत-अकादमी अखिल-भारतीय-नवोदित-संस्कृत-कवि-प्रतियोगितायाः आयोजनमकरोत् । प्रतियोगितायाः उद्घाटनं कुर्वन्त्यः दिल्ली-विधान-सभायाः सदस्याः श्रीमत्यः दर्शनारामकुमार-महोदयाः प्रावोचन् यत् 'संस्कृतस्य कवयः विद्वांसः समाजस्योद्बोधकाः भवन्ति, स्वातन्त्र्ययुद्धे तै एव प्रेरिताः स्वातन्त्र्यसेनानिनो राष्ट्राय समर्पिताः अभवन् ।' अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः अवदन् यत् 'नवोदितानां प्रतिभानां विकासायाकादम्या प्रतिवर्षं प्रतियोगितेयमायोज्यते ।' भारतसंस्कृतपरिषदः महामन्त्रिणः आचार्याः राधाकृष्णमनोड़ीमहोदयाः उक्तवन्तः यत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'कविः मानवतायाः अनुभूतिं प्रेरयति ।' भारतसर्वकारस्य संस्कृतपरामर्शकाः डॉ. नोदनाथमिश्रमहोदयाः, प्रसिद्धाः पत्रकाराः श्रीमन्तः विजयशंकरचतुर्वेदिमहोदया, श्रीमन्तः ओम्प्रकाशठाकुरमहोदयाः, डॉ० रमाकान्तशुक्लमहोदयाः तत्रोपस्थिताः आसन् । कार्यक्रमस्याध्यक्षाः श्रीमन्तः डॉ. श्रीधरवसिष्ठमहोदयाः आसन् । प्रथमपुरस्कारं श्रीकमलेश-मिश्रः श्री परमानन्दश्च प्राप्तवन्तौ । द्वितीयस्थानं श्री सत्यमूर्तिः, तृतीय पुरस्कारं श्रीकान्तमिश्रः, चतुर्थपुरस्कारं श्रीकौशिककुमारश्च प्राप्तवान् ।

३४. विद्यालयीय/महाविद्यालयीयसंस्कृतसेवासम्मानसमारोहः

दिल्ल्याम् । १८-१२-१९९९ दिनाङ्के झण्डेवालानस्थप्राङ्गणे विद्यालयीय/महाविद्यालयीयसंस्कृतसेवा-सम्मानसमारोहः आयोजितोऽभवत् । समारोहस्योद्घाटनं कुर्वन्तः दिल्लीसर्वकारस्य शिक्षामन्त्रिणः माननीयाः श्रीमन्तः नरेन्द्रनाथमहोदयाः प्रावोचन् यत् 'यदा-यदा देशेऽस्मिन् विपत्तिः पतिता तदा-तदा देशस्यास्य शिक्षकाः अस्य देशस्य मार्गदर्शकाः अभवन् । संस्कृतस्य शिक्षकाः वस्तुतः संस्कृतेः संरक्षकाः सन्ति ।' अवसरेऽस्मिन्नकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः अवदन् यत् 'संस्कृतस्य प्रसाराय संस्कृत-शिक्षकाणां सम्मान आवश्यको विद्यते ।' समारोहस्याध्यक्षाः प्रसिद्धाः शिक्षाशास्त्रिणः आचार्यप्रवराः डॉ० जनार्दन-प्रसादद्विवेदिमहोदयाः उक्तवन्तः यत् 'संस्कृतिः राष्ट्रस्याधारशिला भवति । संस्कृतस्य शिक्षका एव संस्कृतेः प्रसारकाः सन्ति ।' विशिष्टातिथयः राज्यशैक्षणिक-अनुसन्धान-परिषदः पूर्व-संयुक्तनिदेशिकाः डॉ. शक्तिकपूर महोदयाः अवदन्, यत् 'संस्कृतभाषा मानवीयसभ्यतायाः प्रथमा भाषा विद्यते ।'

प्रसिद्धाः पत्रकाराः श्रीमन्तः विजयशंकरचतुर्वेदिमहोदयाः, श्रीलालबहादुरशास्त्रीराष्ट्रिय विद्यापीठस्य श्रीमन्तः प्रो. चन्द्रहासशर्ममहोदयाः, उच्चतमन्यायालयस्य वरिष्ठा अधिवक्त्रयः श्रीमत्यः मीना सक्सेना महोदयाः, नैके च संस्कृतप्रेमिणस्तत्रोपस्थिताः आसन् ।

३५. अक्षरश्लोकप्रतियोगिता

दिल्ल्याम्, झण्डेवालनास्थ-अकादम्याः संगोष्ठीकक्षे १९-१२-१९९९ दिनाङ्के दिल्ली-संस्कृत-अकादमी अक्षरश्लोकप्रतियोगितायाः आयोजनमकरोत् । प्रतियोगितायाः उद्घाटनं कुर्वन्तः उत्तर-प्रदेशसंस्कृत-अकादम्याः अध्यक्षाः श्रीमन्तः रामनाथसुमनमहोदयाः प्रावोचन्, यत् 'संस्कृतभाषायां प्रतियोगितायाः आयोजनं प्राचीनकालतः एव गुरुकुलेषु भवति स्म ।' समारोहस्याध्यक्षाः श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतयः डॉ० के.पी.ए. मेनोन् महोदयाः उक्तवन्तः यत् 'संस्कृतभाषा भारतस्य संस्कृतेराधारभूता विद्यते ।' प्रतियोगितायाँः प्रस्तावनायामकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यत् 'प्रतियोगितया छात्राणां प्रतिभायाः विकासो भवति ।' प्रतियोगितायामस्यां शारदादेवीसंस्कृतविद्यापीठं प्रथमपुरस्कारं, हनुमान्-संस्कृतमहाविद्यालयः द्वितीयपुरस्कारं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठञ्च तृतीयं पुरस्कारं प्राप्तवन्तः । अवसरेऽस्मिन् नैके विद्वांसः छात्रश्चोपस्थिताः आसन् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगितायाः उद्घाटने उद्बोधयन्त्यः दिल्ली विधानसभायाः सदस्याः श्रीमत्यः दर्शनारामकुमार महोदयाः, वामतः उपविष्टाः आचार्याः राधाकृष्ण मनोड़ी महोदयाः, डा० नोदनाथ मिश्र महोदयाः, डॉ० श्रीधर वसिष्ठ महोदयाः, डॉ० रमाकान्त शुक्ल महोदयाः, श्रीमन्तः ओम् प्रकाश ठाकुर महोदयाः श्रीमन्तः रामसेवक शर्म महोदयाश्च



अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगितायाः समारोहे पुरस्कारं प्रयच्छन्तः राष्ट्रटाइम्सपत्रस्य सम्पादकाः श्रीमन्तः विजयशंकर चतुर्वेदि महोदयाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अखिल भारतीय नवोदित संस्कृतकवि प्रतियोगिता-समारोहे उपस्थिताः कवयः विद्वांसश्च



विद्यालयीय/महाविद्यालयीय संस्कृत सेवा सम्मान समारोहे दीपं प्रज्ज्वालयन्तः मुख्यातिथयः दिल्ली सर्वकारस्य शिक्षामन्त्रिणः श्रीमन्तः डॉ० नरेन्द्रनाथ महोदयाः, श्रीमन्तः मेहर लाल पँवार महोदयाः, श्रीमत्यः मीना सक्सेना महोदयाः, श्रीमन्तः विजय शंकर चतुर्वेदि महोदयाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयीय/महाविद्यालयीय संस्कृत सेवा सम्मान समारोहे सम्बोधयन्तः मुख्यातिथयः दिल्ली सर्वकारस्य शिक्षामन्त्रिणः श्रीमन्तः डॉ. नरेन्द्र नाथ महोदयाः, मञ्चे वामतः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाः, राष्ट्र टाइम्स पत्रस्य सम्पादकाः श्रीमन्तः विजय शंकर चतुर्वेदि महोदयाः श्रीमत्यः मीना सक्सेना महोदयाश्च

विद्यालयीय/महाविद्यालयीय संस्कृत सेवा सम्मान समारोहे पुरस्कारं प्रयच्छन्तः समारोहाध्यक्षाः प्रसिद्धाः शिक्षाशास्त्रिणः श्रीमन्तः डॉ॰ जनार्दन द्विवेदि महोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयीय/महाविद्यालयीय संस्कृत सेवा सम्मान समारोहे पुरस्कारं प्रयच्छन्त्यः श्रीमत्यः मीना सक्सेना महोदयाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाश्च, मञ्चे उपविष्टाः समारोहाध्यक्षाः श्रीमन्तः डॉ० जनार्दन द्विवेदि महोदयाः

विद्यालयीय/महाविद्यालयीय संस्कृत सेवा सम्मान समारोहे उपस्थिताः विद्वांसः, प्रधानाचार्याः आचार्याश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षर श्लोक प्रतियोगितायाः उद्घाटने मञ्चे उपविष्टाः वामतः आचार्याः श्रीधर प्रसाद बलूनी महोदयाः, आचार्याः रामनाथ सुमन महोदयाः,श्रीमन्तः डॉ० के० पी० ए० मेनन् महोदयाः श्रीमन्तः डॉ० श्रीधर वसिष्ठ महोदयाश्च

अक्षर श्लोक प्रतियोगितायाः उद्घाटने सम्बोधयन्तः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल महोदयाः मञ्चे उपविष्टाः वामतः आचार्याः श्रीधर प्रसाद बलूनी महोदयाः, आचार्याः रामनाथ सुमन महोदयाः,श्रीमन्तः डॉ० के० पी० ए० मेनन् महोदयाः,श्रीमन्तः डॉ० श्रीधर वसिष्ठ महोदयाः,श्रीमन्तः यशपाल खजूरिया महोदयाः,श्रीमन्तः डॉ० रमाकान्त शुक्ल महोदयाः डॉ० रमण कुमार शर्ममहोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



अक्षर श्लोक प्रतियोगितायामुपस्थिताः छात्राः शिक्षकाश्च



महाविद्यालयीय संस्कृत काव्यालि प्रतियोगितायाः उद्घाटनसमारोहे मञ्चे वामतः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल महोदयाः, समारोहाध्यक्षाः विधायकाः श्रीमन्तः रमाकान्त गोस्वामि महोदयाः, मुख्यातिथयः दिल्ली सर्वकारस्य विकास खाद्यापूर्तिसम्भरणमन्त्रिणः श्रीमन्तः डॉ० योगानन्द शास्त्रि महोदयाः प्राचार्याः श्रीमत्यः डॉ० मालती महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाविद्यालयीय संस्कृत काव्याग्लि प्रतियोगितायां संस्कृतकाव्यालि प्रस्तुवन्त्यः महाविद्यालयीयाः छात्राः

महाविद्यालयीय संस्कृत काव्यालि प्रतियोगितायां समुपस्थिताः विद्वांसः विदुष्यः आचार्याः छात्राश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन्द्रीय संस्कृत प्रतियोगिता समारोहे सम्बोधयन्तः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाः, मञ्चे उपविष्टाः वामतः श्रीमन्तः नरेन्द्र पाण्डेय महोदयाः, श्रीमन्तः शब्बीर अहमद महोदयाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, दिल्ली विधान सभायाः सदस्याः श्रीमत्यः दर्शना रामकुमार महोदयाः श्रीमत्यः शक्तिकपूर महोदयाश्च

केन्द्रीय संस्कृत प्रतियोगिता समारोहे काव्यालिं प्रस्तुवन्त्यः छात्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन्द्रीय संस्कृत प्रतियोगितायामुपस्थिताः आचार्याः छात्राश्च

गुरुगोविन्द सिंह जयन्त्युपलक्ष्ये परिचर्चायां मञ्चे उपविष्टाः वामतः दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, श्रीमन्तः प्रो० सत्यव्रत शास्त्रि महोदयाः श्रीमन्तः डॉ० जगवीर सिंह महोदयाः श्रीमन्तः डॉ० आर० डी० आनन्द महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



गुरुगोविन्द सिंह जयन्त्युपलक्ष्ये परिचर्चायामुद्बोधयन्तः दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, मञ्चे उपविष्टाः वामतः डॉ० प्रेमसिंह महोदयाः, डॉ० सत्येन्द्र सिंह नूर महोदयाः, दक्षिणतः डॉ० जगवीर सिंह महोदयाः, डॉ० आर० डी० आनन्द महोदयाश्च ।

गुरुगोविन्द सिंह जयन्त्युपलक्ष्ये परिचर्चायामुपस्थिताः विद्वांसः विदुष्यः संस्कृतप्रेमिणश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयीय/महाविद्यालयीय संस्कृत नाट्यसमारोहे मञ्चे उपविष्टाः वामतः प्रधानाचार्याः श्रीमन्तः ओम् दत्त महोदयाः, प्राचार्याः डॉ० रियाज उमर महोदयाः, दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, श्रीमन्तः कृष्णदत्त शास्त्रि महोदयाः प्रधानाचार्याः श्रीमन्तः नवीन कुमार गोयल महोदयाश्च

विद्यालयीय/महाविद्यालयीय संस्कृत नाट्य समारोहे 'आश्वासन'मित्यस्य नाटकस्य मञ्चनं कुर्वन्तः जाकिर हुसैन महाविद्यालयस्य छात्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयीय/महाविद्यालयीय संस्कृत नाट्य समारोहे 'साक्षात्कारः' इत्यस्य नाटकस्य मञ्चनं कुर्वन्तः पश्चिम एन्क्लेवस्थ डी० ए० वी० सेन्टेनरी पब्लिक विद्यालयस्य छात्राः

विद्यालयीय/महाविद्यालयीय संस्कृत नाट्य समारोहे 'चारुदत्तस्य विजयः' इत्यस्य नाटकस्य मञ्चनं कुर्वन्तः शाहदरास्थ मुखर्जी स्मारक उ० मा० विद्यालयस्य छात्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल भारतीय संस्कृत कवि सम्मेलने मञ्चे उपविष्टाः वामतः डॉ० लीना रस्तोगी महोदयाः,डॉ० शशि तिवारी महोदयाः, डॉ० कृष्णलाल महोदयाः, कविरत्नं श्रीकृष्ण सेमवाल महोदयाः,श्रीमन्तः विजय शंकर चतुर्वेदि महोदयाः,दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, पूर्वकुलपतयः डॉ० मण्डनमिश्र महोदयाः,डॉ० प्रशस्य मित्र शास्त्रि महोदयाः,डॉ. जंगदीश प्रसाद सेमवाल महोदयाः डॉ हरिदत्त भट्ट महोदयाश्च

अखिल भारतीय संस्कृत कवि सम्मेलने मुख्यातिथीनां दिल्ली सर्वकारस्य प्रधान गृह सचिवानां श्रीमतां सेवाराम शर्म महोदयानां सम्मानं कुर्वन्तः दिल्ली सर्वकारस्य पूर्व कार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, वामतः दिल्ली विधान सभायाः सदस्याः श्रीमन्तः रमाकान्त गोस्वामि महोदयाः मञ्चे उपविष्टाः डॉ० जगदीश प्रसाद सेमवाल महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल भारतीय संस्कृत कवि सम्मेलने कविवर्याणां डॉ० जगदीश प्रसाद सेमवाल महोदयानां स्वागतं कुर्वन्तः दिल्ली विधान सभायाः सदस्याः श्रीमन्तः रमाकान्त गोस्वामि महोदयाः दक्षिणतः श्रीमन्तः डॉ० प्रशस्य मित्र शास्त्रि महोदयाश्च

अखिल भारतीय संस्कृत कवि सम्मेलने काव्यपाठं कुर्वन्तः श्रीमन्तः डॉ० रमाकान्त शुक्ल महोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल भारतीय संस्कृत कवि सम्मेलने काव्यपाठं कुर्वन्तः श्रीमन्तः डॉ० इन्द्रमोहन सिंह महोदयाः

अखिल भारतीय संस्कृत कवि सम्मेलने काव्यपाठं कुर्वन्तः श्रीमन्तः डॉ० दलवीर सिंह महोदयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल भारतीय संस्कृत कवि सम्मेलने समुपस्थिता: श्रोतार: श्रोत्र्यश्च



ग्रन्थलोकार्पण समारोहे 'नाट्यमञ्जरी'ति पुस्तकस्य लोकार्पणं कुर्वन्त: दिल्ली सर्वकारस्य प्रधानगृहसचिवा: श्रीमन्त: सेवारामशर्म महोदया:, दक्षिणत: दिल्ली सर्वकारस्य पूर्व कार्यकारिपार्षदा: श्रीमन्त: कुलानन्द भारतीय महोदया:, अकादम्या: सचिवा: श्रीमन्त: श्रीकृष्णसेमवाल महोदया:, पूर्वकुलपतय: डॉ० मण्डनमिश्र महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३६. महाविद्यालयीयसंस्कृतकाव्यालिप्रतियोगिता

दिल्ल्याम्। पटेलनगरस्थकालिन्दीमहाविद्यालयस्य सभागारे २१-१२-१९९९ दिनाङ्के दिल्ली-संस्कृत- अकादमी महाविद्यालयीयसंस्कृतकाव्यालिप्रतियोगितायाः आयोजनमकरोत्। प्रतियोगितायाः उद्घाटनं कुर्वन्तः दिल्लीसर्वकारस्य खाद्यापूर्तिविकासमन्त्रिणः श्रीमन्तः डॉ. योगानन्दशास्त्रिमहोदयाः प्रोक्तवन्तः यद् 'इतिहासस्याध्ययनाय संस्कृतस्याध्ययनमावश्यकमस्ति। वैदिकव्याकरणे वेदमन्त्रेषु चेतिहासस्यानेकानि तथ्यानि सन्ति।' अवसरेऽस्मिन् अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः प्रावोचन् यत् 'अकादमी प्रतिवर्षं महाविद्यालयानां छात्राणां कृते विविधानां प्रतियोगितानामायोजनं करोति। वर्षेऽस्मिन् काव्यालिप्रतियोगितायाः श्लोकाः 'प्रियदर्शिनीयम्' काव्यस्य श्लोकेषु आधारिताः आसन्।' कालिन्दी-महाविद्यालयस्य प्राचार्याः श्रीमत्यः डॉ० मालतीमहोदया प्रोक्तवत्यः यत् 'संस्कृत भाषायां काव्यालिविधायाः आयोजनमत्यधिकं भावपूर्णं भवति।' समारोहस्याध्यक्षाः दिल्लीविधानसभायाः सदस्याः श्रीमन्तः रमाकान्तगोस्वामिमहोदयाः उक्तवन्तः यत् 'संस्कृतभाषा भारतस्य संस्कृतेः सभ्यतायाश्च पोषिका विद्यते।' प्रतियोगितायामस्यां इन्द्रप्रस्थमहाविद्यालयस्य छात्राभिः प्रथमः पुरस्कारः, दौलतराममहाविद्यालयस्य छात्राभिः द्वितीयः पुरस्कारः, मिराण्डाहाउसमहाविद्यालयस्य छात्राभिश्च चतुर्थः पुरस्कारः सम्प्राप्ताः। कार्यक्रमस्य सञ्चालनं कालिन्दीमहाविद्यालयस्योपाचार्या डॉ० सरस्वती बाली अकरोत्। अवसरेऽस्मिन् डॉ० शक्तिकपूरमहोदयाः, श्रीमत्यः वेदवतीधींगरामहोदयाश्चोपस्थिताः आसन्।

३७. केन्द्रीयसंस्कृतप्रतियोगितासमारोहः

दिल्ल्याम्, झण्डेवालानस्थ-अकादम्याः सभास्थले १२.१.२००० दिनाङ्के दिल्ली-संस्कृत-अकादम्याः केन्द्रीयसंस्कृतप्रतियोगितासमारोहः आयोजितः, समारोहस्योद्घाटनं कुर्वन्त्यः दिल्लीविधानसभायाः सदस्याः श्रीमत्यः दर्शनारामकुमारमहोदयाः प्रोक्तवत्यः, यत् 'संस्कृतभाषया एव विश्वस्मिन् जगति भारतस्य प्रतिष्ठा विद्यते। संस्कृतस्य प्रसाराय प्रतियोगिताभिः छात्राणां सर्वाङ्गीणविकासो भवति।' अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः प्रावोचन् यत् 'कस्याः अपि भाषायाः लोकप्रियत्वे प्रतियोगितानां विशिष्टं महत्वं भवति।' समारोहस्याध्यक्षाः दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः प्रोक्तवन्तः यत् 'संस्कृतभाषया एव भारते दिल्लीशिक्षानिदेशालयस्यैकादशमण्डलेष्वायोजितासु प्रतियोगितासु विजयिविद्यालयानां प्रतियोगिता अभवत्। यस्यां संस्कृतकाव्यालिप्रतियोगित्रयां प्रथमस्थानं टैगोरगार्डनस्थ-सर्वोदयकन्याविद्यालयेन, वादविवादप्रतियोगितायां प्रथमः पुरस्कारः पूसारोडस्थरामजसविद्यालयेन, श्लोक-संगीत-प्रतियोगितायां रमेशनगरस्थसर्वोदयकन्याविद्यालयेन, एकलश्लोकसंगीतप्रतियोगितायां प्रथमं स्थानं टैगोरगार्डनस्थराजकीयकन्या उ० मा० विद्यालयेन, श्लोकोच्चारणे लुडलो कैसलस्थशहीद-अवधबिहारीसर्वोदयविद्यालयेन, संस्कृतभाषणप्रतियोगितायाञ्च दर्शनगरस्थराजकीयवरिष्ठकन्याविद्यालयेन प्रथमः पुरस्कारोऽधिगतः। अवसरेऽस्मिन् पूर्वनिदेशकाः श्रीमन्तः डॉ. के. के. मिश्र महोदयाः, श्रीमन्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्बीर-अहमद- महोदया:, डॉ. शक्तिकपूरमहोदया:, डॉ. मोहनचन्द्रमहोदया:, डॉ. श्रीमत्य: सावित्रीगुप्तमहोदया:, डॉ. जयन्ती-प्रसादमिश्रमहोदयाश्चोपस्थिता: आसन्।

३८. गुरुगोविन्दसिंहजयन्त्युपलक्ष्ये परिचर्चा—

१५-१-२००० दिनाङ्के झण्डेवालानस्थ-अकादम्या: संगोष्ठीकक्षे दिल्ली-संस्कृत-अकादमी गुरुगोविन्दसिंहमहोदयानां जयन्त्युपलक्ष्ये परिचर्चामायोजितवती। परिचर्चाया उद्घाटनं कुर्वन्त: दिल्लीसर्वकारस्य पूर्वकार्यकारिपार्षदा: श्रीमन्त: कुलानन्दभारतीयमहोदया: प्रोक्तवन्त: यत् 'संस्कृतमेव भारतीयसभ्यताया: स्रोतोविद्यते। राष्ट्रस्य सभ्यताया: संस्कृते: निर्माणे गुरुगोविन्दसिंहमहोदयानां महत्त्वपूर्णं योगदानं विद्यते।' अकादम्या: सचिवा: श्रीमन्त: श्रीकृष्णसेमवालमहोदया: प्रोक्तवन्त: यद् 'गुरुगोविन्दसिंहमहोदया: न केवलं महायोद्धार: आसन् अपितु समाजसुधारका:, प्रतिष्ठिता: विद्वांस: इतिहासपुरुषाश्चापि आसन्।' समारोहस्याध्यक्षा: सम्मानिता: विद्वांस: डॉ० सत्यव्रतशास्त्रिमहोदया: प्रावोचन् यद् 'गुरुवराणां श्रीमतां गोविन्दसिंहमहोदयानां 'श्रीदशमग्रन्थे' रामावतारग्रन्थे च संस्कृतनिष्ठाया: भाषाया: प्रयोगो: दरीदृश्यते।' अवसरेऽस्मिन् 'दिल्ली के शोले' समाचारपत्रस्य सम्पादका: श्रीमन्त: उजागरसिंहजोशमहोदया: अप्युपस्थिता: आसन्। परिचर्चायामस्यां दिल्लीविश्वविद्यालयस्योपाचार्या: डॉ० जगवीरसिंहमहोदया:, डॉ० आर. के. शर्ममहोदया:, डॉ० सत्येन्द्रनूरमहोदया: आचार्य: नरेन्द्रपाण्डेयमहोदयाश्च गुरुगोविन्दसिंहस्य विषये चर्चामकुर्वन्।

३९. विद्यालयीय/ महाविद्यालयीय संस्कृतनाट्यसमारोह:

दिल्ल्याम्। मण्डीहाउसस्थ-कापरनिक्समार्गस्थ-लिटिलथिएटरग्रुपसभागारे १८-१-२००० दिनाङ्के दिल्ली-संस्कृत-अकादमी विद्यालयीय/महाविद्यालयीय-संस्कृत-नाट्य-समारोहस्यायोजनमकरोत्। समारोहस्योद्घाटनं कुर्वन्त: दिल्ली-सर्वकारस्य पूर्वकार्यकारिपार्षदा: श्रीमन्त: कुलानन्दभारतीयमहोदया: प्रावोचन् यत् 'संस्कृत-वाङ्मये नाट्यशास्त्रस्य विशिष्टं महत्त्वं विद्यते। मनोरञ्जनविधासु नाटकानां लोकप्रियत्वं सर्वे जानन्ति। संस्कृतनाटकानि संस्कारसंस्कृतिप्रधानानि भवन्ति।' अकादम्या: सचिवा: श्रीमन्त: श्रीकृष्ण-सेमवाल महोदया अवसरेऽस्मिन् प्रावोचन् यद् 'नाटकै: भावनानां सम्प्रेषणं सारल्येन भवति। संस्कृतनाटकै: संस्कृते: प्रसार: भवति।' प्रसिद्धा: स्वातन्त्र्ययौद्धार: श्रीमन्त: कृष्णदत्तशास्त्रिमहोदया: प्रावोचन् यत् 'जीवनस्य कृते सर्वेषूपयोगिषु विषयेषु संस्कृते रचना: प्राप्यन्ते। संस्कृतस्य विद्वांस: सम्प्रत्यपि समसामयिकविषयेषु चिन्तनं कुर्वन्ति।' समारोहस्याध्यक्षा: ज़ाकिरहुसैनमहाविद्यालयस्य प्राचार्या: श्रीमन्त: डॉ. रियाज़उमरमहोदया: प्रावोचन् यद् 'व्यक्तित्वस्य विकासे संस्कृतभाषाया: योगदानं महत्त्वपूर्णं विद्यते।' अवसरेऽस्मिन् श्रीमन्तो विजयशङ्करचतुर्वेदि-महोदया:, आचार्या: नरेन्द्रपाण्डेयमहोदया:, प्राचार्या: श्रीमन्त: सुभाषचन्द्र-आनन्द-महोदया: डॉ० आर० के शर्ममहोदया:, डॉ० सुषमाकुलश्रेष्ठमहोदयाश्चोपस्थिता: आसन्। नाट्यसमारोहेऽस्मिन् ज़ाकिरहुसैन महाविद्यालयस्य छात्रै: 'आश्वासनम्' पश्चिम-एन्क्लेवस्थस्य डी. ए. वी. सेन्टेनरी उ.मा. विद्यालयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थलोकार्पण समारोहे 'कथामञ्जरी' इत्यस्य पुस्तकस्य लोकार्पणं कुर्वन्तः दिल्ली सर्वकारस्य प्रधानगृह सचिवाः श्रीमन्तः सेवाराम शर्म महोदयाः, दक्षिणतः दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाः पूर्वकुलपतयः डॉ० मण्डन मिश्र महोदयाश्च

ग्रन्थ लोकार्पण समारोहे उद्बोधयन्तः मुख्यातिथयः दिल्ली सर्वकारस्य प्रधान गृहसचिवाः श्रीमन्तः सेवाराम शर्म महोदयाः उपविष्टाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः, राष्ट्रिय संस्कृत संस्थानस्य निदेशकाः डॉ० कुटुम्ब शास्त्रि महोदयाः, पूर्वनिदेशकाः डॉ० कमलाकान्त मिश्र महोदयाः, अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाः डॉ० शक्तिकपूर महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



ग्रन्थ लोकार्पण समारोहे ग्रन्थयोः परिचयं प्रस्तुवन्तः श्रीमन्तः डॉ० रामकृष्ण शर्म महोदयाः, उपविष्टाः श्रीमन्तः सुभाष विद्यालंकार महोदयाः, श्रीमन्तः शब्बीर अहमद महोदयाः, डॉ० कृष्ण लाल महोदयाः पूर्वकुलपतयः डॉ० मण्डन मिश्र महोदयाश्च

संस्कृत प्रतिभा पुरस्कार वितरण समारोहे मञ्चे उपविष्टाः वामतः डॉ० अवनीन्द्र कुमार महोदयाः, श्रीमन्तः सत्यदेव त्रिवेदि महोदयाः, मुख्यातिथयः विधायकाः श्रीमन्तः रमाकान्त गोस्वामि महोदयाः, विशिष्टातिथयः विधायकाः श्रीमन्तः रूपचन्द महोदयाः, पूर्व विधायका श्रीमन्तः आलोक कुमार महोदयाः पृष्ठे उपविष्टाः श्रीमन्तः विजय शंकर चतुर्वेदि महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत प्रतिभापुरस्कार वितरण समारोहे पुरस्कारं प्रयच्छन्तः मुख्यातिथयः दिल्ली विधानसभायाः सदस्याः श्रीमन्तः रमाकान्त गोस्वामि महोदयाः

संस्कृत प्रतिभा पुरस्कार वितरण समारोहे पुरस्कारं प्रयच्छन्तः विशिष्टातिथयः श्रीमन्तः वेदप्रकाश महोदयाः, वामतः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदया, दक्षिणतः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्द भारतीय महोदयाः दिल्ली विधानसभायाः सदस्याः श्रीमन्तः रूपचन्द महोदयाश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत प्रतिभा पुरस्कार वितरण समारोहे पुरस्कारं प्रयच्छन्तः विशिष्टातिथयः दिल्ली विधान सभायाः सदस्याः श्रीमन्तः रूपचन्द महोदयाः अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्ण सेमवाल महोदयाश्च



संस्कृत प्रतिभा पुरस्कार वितरण समारोहे उपस्थिताः आचार्याः छात्राश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छात्रैः 'साक्षात्कारः' शाहदरास्थस्य मुखर्जीस्मारक उ. मा. विद्यालयस्य छात्रैः 'चारुदत्तस्य विजयः' इति नाट्यत्रयस्य मञ्चनं जातम् । अवसरेऽस्मिन् नैके विद्वांसः छात्राश्चोपस्थिताः आसन् ।

४०. गणतन्त्रदिवसस्योपलक्ष्येऽखिलभारतीयसंस्कृतकविसम्मेलनम्

दिल्ल्याम् । मण्डीहाउसस्थ-कॉपरनिक्समार्गस्थे लिटिलथिएटर-ग्रुपसभागारे २०-१-२००० दिनाङ्के दिल्ली-संस्कृत-अकादमी गणतन्त्रदिवसस्योपलक्ष्येऽखिलभारतीयसंस्कृतकविसम्मेलनमायोजितवती । सम्मेलनस्योद्घाटनं कुर्वन्तः दिल्ली सर्वकारस्य प्रधानगृहसचिवाः श्रीमन्तः सेवारामशर्ममहोदयाः प्रावोचन् यत् 'संस्कृतस्य कवयः एव समाजाय सम्यग्मार्गदर्शनं प्रदातुं सक्षमाः सन्ति ।' अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवाल- महोदयाः उक्तवन्तः यत् 'संस्कृतस्य प्रसाराय संस्कृतकविसम्मेलनस्यायोजनमावश्यकमस्ति ।' सम्मेलनस्याध्यक्षाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीयमहोदयाः प्रावोचन् यत् 'सहस्राब्दिपूर्तौ राष्ट्रिय-संस्कृतकविसम्मेलनस्य विशिष्टं महत्त्वं विद्यते ।' कविसम्मेलनस्योद्घाटन-समारोहे विशिष्टातिथयः विधायकाः श्रीमन्तः रमाकान्तगोस्वामिमहोदयाः पूर्व कुलपतयः डॉ. मण्डनमिश्रमहोदयाश्चाप्युपस्थिताः आसन्, कविसम्मेलनेऽस्मिन् डॉ० राजेन्द्रमिश्रमहोदयैः **'राष्ट्रहितं सर्वोपरि भवतात्,'** डॉ. विन्ध्येश्वरीप्रसादमहोदयैः **'यैश्च छद्मात्मनां राष्ट्रद्रुहां दुश्चेष्टितं हतम्,'** डॉ० मृदुला- महोदयाभिः **'येषु चाशाधारिताऽऽसीद् ग्रामरक्षायाः पुरा'**, डॉ. कृष्णलालमहोदयैः **'जगत्यामद्यापि सर्वत एव'**, डॉ० हरिराम-आचार्यैः **'बन्धु-भावना-सुधा मुदा सदैव पीयताम्'**, डॉ० पुष्पादीक्षितमहोदयाभिः **'यदा सीमासु रक्तै रञ्जिता वीरा विहन्यन्ते'**, डॉ० इच्छारामद्विवेदिमहोदयैः **'नवलसहस्राब्दिं प्रविशति मे माता शुभङ्करा,'** डॉ० प्रशस्यमित्रशास्त्रिमहोदयैः हास्यश्लोकाः, डॉ० हरिदत्तभट्टमहोदयैः **'नेपालादधुना विमान-हरणं क्लैब्यं कथं स्वीकृतम् ।'** डॉ० दलवीरसिंहमहोदयैः **'वन्देऽहं तु दिवानिशं स्वशिरसा देशस्य सेनानिनः'**, डॉ० जगदीशप्रसाद सेमवालमहोदयैः **'पवित्र तीर्थवारि तत् तथैव तीर्थयात्रिभिः, विलोक्य दूषितं महत्मनो न कस्य दूयते,'** डॉ० जनार्दन प्रसादपाण्डेयमहोदयैः **'विकासं तु जाने विलासं तु जाने'** कविरत्नं श्रीकृष्णसेमवालमहोदयैः **'सितशरीरिणां द्रोहकारणात् मुहुरयादियं कृष्णमन्दिरे ।'** डॉ० शशितिवारीमहोदयाभिः स्वरचिता सरस्वतीवन्दनाप्रस्तुता, डॉ. लीनारस्तोगी महोदयाभिः डॉ० शशिनाथ महोदयैः डॉ० इन्द्रमोहनसिंहमहोदयैः, डॉ. सुभाषवेदालंकारमहोदयैः, डॉ० रमाकान्त शुक्लमहोदयैः, डॉ. आर. के. शर्ममहोदयैः, श्री ओम्प्रकाशठाकुरमहोदयैः, श्रीश्रीधरप्रसादबलूनीमहोदयैश्चापि काव्यपाठाः सञ्जाताः । अवसरेऽस्मिन्नैके विद्वांसः संस्कृतप्रेमिणश्चोपस्थिताः आसन् ।

४१. 'कथामञ्जरी' 'नाट्यमञ्जरी'त्यनयोः ग्रन्थयोः लोकार्पणसमारोहः

दिल्लीसर्वकारस्य प्रधानगृहसचिवस्य सभाकक्षे २८-१-२००० दिनाङ्के दिल्ली-संस्कृत-अकादमी 'कथामञ्जरी' 'नाट्यमञ्जरीत्यनयोः ग्रन्थयोः लोकार्पण-समारोहमायोजितवती, समारोहस्योद्घाटनं कुर्वन्तो दिल्ली सर्वकारस्य प्रधान-गृहसचिवाः श्रीमन्तः सेवारामशर्ममहोदयाः उक्तवन्तः यद् 'अकादम्याः प्रकाशिते द्वे पुस्तके 'नाट्यमञ्जरी' 'कथामञ्जरी' च समाजायोपयोगिन्योः स्तः । लघुनाटकैः संस्कृत लघुकथाभिश्च संस्कृतेः सदाचारस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसारो भविष्यति।' समारोहस्याध्यक्षाः दिल्ली सर्वकारस्य पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीय-महोदयाः प्रोक्तवन्तः यत् 'संस्कृतेः साहित्यस्य च संवाहकाः साहित्यकाराः भवन्ति।' अवसरेऽस्मिन् पद्मश्री-पुरस्कारेण विभूषिताः डॉ० मण्डनमिश्रमहोदयाः प्रावोचन् यद् 'दिल्लीसंस्कृतअकादमी संस्कृतस्य प्रसाराय महत्त्वपूर्णं कार्यं करोति।' अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यद् 'अकादमी प्रतिवर्षं विविधानां कार्यक्रमाणामायोजनं करोति। येषु लोकोपयोगिसंस्कृतपुस्तकानां प्रकाशनमपि विधीयते' अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य निदेशकाः डॉ० कुटुम्बशास्त्रिमहोदयाः प्रावोचन् यत् 'समाजे संस्काराणां स्थापना संस्कृतभाषया एव भवितुं शक्नोति।' कार्यक्रमेऽस्मिन् डॉ. सुभाषविद्यालङ्कारमहोदयाः, प्रो० कृष्णलाल महोदयाः, डॉ. के.के.मिश्रमहोदयाः, डॉ० सत्यदेवचौधरीमहोदयाः, श्रीमन्तः शब्बीर-अहमदमहोदयाः, श्रीमत्य-शक्तिकपूर महोदयाः, श्रीमत्यः शशिप्रभागोयलमहोदयाः डॉ. उर्मिलरुस्तगीमहोदयाः, डॉ. क्षेमचन्द्रमहोदयाः श्रीमन्तः ओम्प्रकाशठाकुरमहोदयाः अनेके च संस्कृतविद्वांसः उपस्थिताः आसन्।

४२. संस्कृत-प्रतिभा-पुरस्कार-वितरण-समारोहः

झण्डेवालानस्थे अकादम्याः सभास्थले ३०-१-२००० दिनाङ्के दिल्ली-संस्कृत-अकादमी संस्कृत-प्रतिभा-पुरस्कारवितरणसमारोहमायोजितवती, समारोहस्य मुख्यातिथयः दिल्लीविधानसभायाः सदस्याः श्रीमन्तः रमाकान्तगोस्वामिमहोदयाः प्रावोचन् यत् 'संस्कृतभाषया एव कर्मणोऽभिप्रेरणा प्रसरति। परिश्रमेण साफल्यं प्राप्यते। सफला एव जनाः पुरकारान् प्राप्नुवन्ति।' विशिष्टातिथयः विधायकाः श्रीमन्तः रूपचन्दमहोदयाः प्रोक्तवन्तः यत् 'संस्कृतभाषया एव सर्वधर्मसमभावस्य भावना प्रसरति' अकादम्याः सचिवाः श्रीमन्तः श्रीकृष्णसेमवालमहोदयाः उक्तवन्तः यत्, 'प्रतिभावन्तः छात्राः एव, देशस्योत्तरदायित्वं निर्वहन्ति। अकादमी प्रतिवर्षं संस्कृतविषये प्रतिभावतां छात्राणामभिप्रेरणाय संस्कृत-प्रतिभा-पुरस्कारान् यच्छति, वर्षेऽस्मिन् विद्यालयीयमहाविद्यालयीय-संस्कृतविद्यालयीयेभ्यः पञ्चशत छात्रेभ्यः संस्कृत प्रतिभापुरस्काराः प्रदीयन्ते।' पुरस्कारेष्वेतेषु चतुर्लक्षरूप्यकाणां प्रमाणपत्राणां अकादम्याः संस्कृतनाट्यमञ्जरी कथामञ्जरीति पुस्तकद्वयस्य च वितरणम् जातम्। समारोहस्याध्यक्षाः पूर्वकार्यकारिपार्षदाः श्रीमन्तः कुलानन्दभारतीय-महोदयाः प्रावोचन् यत् 'संस्कृत भाषायाः वाङ्मये सर्वविधं ज्ञानं विद्यते।' विशिष्टातिथयः श्रीमन्तो डॉ० सत्यदेव त्रिवेदिमहोदयाः, स्वातन्त्र्यसेनानिनः श्रीमन्तः कृष्णदत्तशास्त्रिमहोदयाः, डॉ० अवनीन्द्रकुमारमहोदयाः, डॉ. के. के. मिश्रमहोदयाः नैके च संस्कृतविद्वांसः उपस्थिताः आसन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी, (दिल्ली सरकार)

पूर्व भारतीयमहिलामहाविद्यालयभवन

प्लाट सं0-5, झण्डेवालान, करोलबाग नई दिल्ली-110005

दिल्ली संस्कृत अकादमी द्वारा प्रकाशित निम्नलिखित ग्रन्थ एवं पुस्तकें तथा संगीतात्मक कैसेट विक्रय के लिए उपलब्ध होंगे

खण्ड 'क'		मूल्य (रु.)	छूट	मूल्य (रु.)
1. महाबुद्धवत्थु (महाबुद्धवस्तु)	-प्रथम भाग	250.00	25%	187.50
2. महाबुद्धवत्थु (महाबुद्धवस्तु)	-द्वितीय भाग	400.00	25%	300.00
3. महाबुद्धवत्थु (महाबुद्धवस्तु)	-तृतीय भाग	260.00	25%	195.00
4. महाबुद्धवत्थु (महाबुद्धवस्तु)	-चतुर्थ भाग	350.00	25%	265.50
5. महाबुद्धवत्थु (महाबुद्धवस्तु)	-पंचम भाग	100.00	25%	75.00
6. महाबुद्धवत्थु (महाबुद्धवस्तु)	-षष्ठ भाग	500.00	25%	375.00
7. मेघदूतम् (संगीतात्मक कैसेट)	-प्रथम भाग	25.00	50%	12.50
8. मेघदूतम् (संगीतात्मक कैसेट)	-द्वितीय भाग	25.00	50%	12.50
9. मेघदूतम् (संगीतात्मक कैसेट)	-तृतीय भाग	25.00	50%	12.50
10. शंकराचार्य विरचित सौन्दर्यलहली (संगीतात्मक कैसेट)	-प्रथम भाग	50.00	50%	25.00
11. शंकराचार्य विरचित सौन्दर्यलहरी (संगीतात्मक कैसेट)	-द्वितीय भाग	50.00	50%	25.00
12. संस्कृत मञ्जरी (त्रैमासिक पत्रिका)	वार्षिक शुल्क	32.00	-	32.00

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

13. भीमशतकम् (अंग्रेजी, हिन्दी अनुवाद सहित)	100.00	25%	75.00
14. व्यावहारिक संस्कृतम् पुस्तक -प्रथम भाग	5.00	25%	3.75
15. व्यावहारिक संस्कृतम् -प्रथम भाग 16 चार्ट	16.00	25%	12.00
16. व्यावहारिक संस्कृतम् -प्रथम भाग संगीतात्मक कैसेट	15.00	50%	7.50
17. वर्णात्मकभगवतीसुप्रभातम् (संगीतात्मक कैसेट)	25.00	50%	12.50
18. हनुमत्सुप्रभातम् (संगीतात्मक कैसेट)	25.00	50%	12.50
19. सुभाषचन्द्रकाव्यवल्लरी	50.00	25%	37.50
20. संस्कृतसूक्तिसमुच्चय:			
वैदिक खण्ड:	300.00	25%	225.00
ब्राह्मणखण्ड:	200.00	25%	150.00
उपनषिद् खण्ड:	180.00	25%	135.00
आरण्यक खण्ड:	125.00	25%	93.75
21. संस्कृतवाङ्मये विज्ञानम्	175.00	25%	131.25
22. संस्कृतवाङ्मये शासनप्रबन्धनपद्धति:	125.00	25%	93.75
23. प्रियदर्शिनीयम्	140.00	25%	105.00
24. संघे शक्ति: कलौ युगे	100.00	25%	75.00
25. स्वातन्त्र्यस्वर्णसौरभम्	140.00	25%	337.50

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिल्ली संस्कृत अकादमी के आर्थिक सहयोग से प्रकाशित विक्रय हेतु उपलब्ध संस्कृत पुस्तकें

ण्ड 'ख'	मूल्य (रु.)	छूट	मूल्य (रु.)
काव्यम्	300.00	50%	150.00
लैकविंशति:-बाल कथा संग्रह	12.00	50%	6.00
वित्री-नृत्य नाटिका	25.00	50%	12.00
विष्णुभगवतो नाम वैदिकशतकस्त्रोम्	10.00	50%	5.00
भाचरितम्-काव्य	30.00	50%	15.00
रला वासन्ती-बाल कथा संग्रह	50.00	50%	25.00
क्ष्य वेधक: बुद्धिमान्-बाल कथा संग्रह	50.00	50%	25.00
नरिका मुक्तमालिका च-बाल कथा संग्रह	50.00	50%	25.00
कांकिनाट्यद्वयम्	20.00	50%	10.00
तिकथामकरन्द:-बाल कथा संग्रह	60.00	50%	30.00
रिवर्तनम्-एकांकिनाटक	40.00	50%	20.00
मभाष्यम्-टीका	125.00	50%	62.50
विधा (संस्कृत रचना संग्रह)	30.00	50%	15.00
च्छ्वासानां प्रतिच्छाया-उपन्यास	125.00	50%	62.50
नुभूति:-कविता संग्रह	80.00	50%	40.00
तकचतुष्टयम्-काव्य	40.00	50%	20.00
ते आसन् डायनासोरा:	50.00	50%	25.00
श्रीमद्भगवद्विलासम्	60.00	50%	30.00
शतकत्रयम्	45.00	50%	22.00
व्यामोह:- उपन्यास	40.00	50%	20.00
महर्षिमाल्यार्पयणम्	25.00	50%	12.50
श्रीवात्स्यनारायणम्	40.00	50%	20.00
गीतिमञ्जरी	60.00	50%	30.00
पुस्तकालयपरिचर्या प्रसूनम्	200.00	50%	100.00
वेदनावल्लकी	50.00	50%	25.00
वैदिकीय यज्ञविद्या	200.00	50%	100.00

खण्ड 'क' में उल्लिखित पुस्तकों पर एक सैट क्रय करने पर 25% छूट तथा अधिक प्रतियाँ क्रय करने पर अधिक छूट दी जायेगी।

रकारी संस्थाओं के लिए कुल छूट 25% ही होगी

श्रीकृष्ण सेमवाल
सचिव
दिल्ली संस्कृत अकादमी
दूरभाष : 3555676

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-मञ्जरी

एका साहित्यिकी-त्रैमासिकी-पत्रिका

संस्कृत-मञ्जरी

समसामयिकसाहित्यस्य मूल्याङ्कनार्थं वैचारिकी प्रस्तुतिः

संस्कृत-मञ्जरी

भारतस्य प्रसिद्धानां विदुषां सर्जनधर्मिसाधकानां नवोदितप्रतिभानाञ्च सशक्तलेखनीनां संयुक्ता संस्कृतिः

संस्कृत-मञ्जरी

संस्कृतभाषायाः साहित्यस्य च समुन्नयनार्थं सततप्रयत्नशीला दिल्ली-संस्कृत-अकादमी अस्याः साहित्यिक-पत्रिकायाः प्रकाशनं करोति। पत्रिकेयं मानव- संवेदनानां शोधनिबन्धानामुदात्तजीवनमूल्यानाञ्च सङ्गमस्वरूपा प्रतिवर्गस्य पाठकानां कृते पठनीया संग्रहणीया च वर्तते।

मूल्यम्–प्रति पत्रिका १५/- रूप्यकाणि

वार्षिकं शुल्कम् ६०/- रूप्यकाणि

समये-समये प्रकाशितानां विशेषाङ्कानामतिरिक्तं शुल्कं देयं न भवति। सुरुचिमुत्सर्जिकायाः सकारात्मिकाभिव्यक्तेः सूत्रधारिण्याः **'संस्कृत-मञ्जरी'** पत्रिकायाः वार्षिकसदस्याः भवेयुः।

अद्यैव स्वकीयं वार्षिकं शुल्कं धनादेशेन (मनीआर्डर-माध्यमेन) दिल्लीनगरे देययोग्य-ड्राफ्टमाध्यमेन वा प्रेष्य सदस्यतां प्राप्नुयुः। चैकमाध्यमेन प्रेषितं शुल्कमस्वीकार्यमस्ति।

सम्यग्बोधाय सम्पर्कं साधयेयुः

श्रीकृष्णसेमवालः

सचिवः

दिल्ली-संस्कृत-अकादमी

पूर्वभारतीमहिलामहाविद्यालयभवनम्

प्लाट सं० ५, झण्डेवालानम्, करोलबागोपनगरम्

नवदिल्ली-११०००५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Entered in Database

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation